उ० भा०—पुरु, पृथु, अधि—एतेषु; (पूर्वेषु=) पूर्वपदेषु सत्सु; ह्रस्वे च; (पूर्वपद्यान्ते=) पूर्वपद्यस्यान्ते सति; चन्द्रशब्दे च परेऽन्तरा; (शकारः=) शकारागमः; उपजायते। पुरु—"महि क्षेत्रं पुरु श्चन्द्रं विविद्वान् ।"५ पृथु—"पृथु श्चन्द्रमवसे चर्षणिप्राः ।"६ अधि "अधि श्चद्रं बृहत्पृथु ।"७ ह्रस्वे च पूर्वपद्यान्ते—"हरिश्चन्द्रो मरुद्गणः ।"८ ह्रस्वग्रहणं विस्पष्टार्थं दीर्घात्परस्य पद्यस्य चन्द्रशब्दस्याभावात्। पूर्वपद्यान्ते इति कस्मात्? "अभि चन्द्रा भर्तवे नो हिरण्या ॥"९

उ० भा० अ०—पुरु, पृथु, अधि—ये; (पूर्वेषु=) पूर्व-पद हों; ह्रस्वे च=और 'ह्रस्व' 'स्वर' (-वर्ण); (पूर्वपद्यान्ते=) पूर्व-'पद्य' का अन्तिम ('अक्षर') हो तो; चन्द्रशब्दे च परे=और 'चन्द्र' शब्द बाद में हो तो; अन्तरा=(दोनों के) मध्य में;

टि० (क) सम् । ईमिति । विव्याच । सवना । पुरूणि ॥ प० पा०
(ख) संवत्सरे । ववृधे । जग्धम् । ईमिति । पुनरिति ॥ प० पा०
(ग) आ । ईमिति । रिणन्ति । बर्हिषि । प्रियम् । गिरा ॥ प० पा०
(घ) सम् । ईमिति । रथम् । न । भुरिजोः । अहेषत ॥ प० पा०

---

१ ऋ० ३।३६।८ २ ऋ० १।१४०।२ ३ ऋ० ९।७१।६
४ ऋ० ९।७१।५ ५ ऋ० ३।३१।१५ ६ ऋ० ४।२।१३
७ ऋ० ८।६५।११ ८ ऋ० ९।६६।२६ ९ ऋ० ९।९७।५०

शकार उपजायते=शकार का आगम हो जाता है (अर्थात् यदि पूर्व में 'पुरु' हो या 'पृथु' हो या 'अधि' हो या पूर्व-'पद्य' का अन्तिम ('अक्षर') 'ह्रस्व' हो और बाद में 'चन्द्र' शब्द हो तो दोनों के मध्य में एक शकार आ जाता है)। पुरु—"महि क्षेत्रं पुरु श्चन्द्रं विविद्वान्।"[क] पृथु—"पृथु श्चन्द्रमवसे चर्षणिप्राः।"[ख] अधि—"अधि श्चन्द्रं बृहत्पृथु।"[ग] पूर्व-'पद्य' के अन्तिम ('अक्षर') के 'ह्रस्व' होने पर—"हरिश्चन्द्रो मरुद्गणः।"[घ] 'ह्रस्व' (शब्द) का (सूत्र में) ग्रहण स्पष्टता के लिए (किया गया है) क्योंकि 'दीर्घ' 'अक्षर' के बाद में 'चन्द्र' शब्द रूप 'पद्य' का अभाव है।[ङ] "पूर्व-'पद्य' के अन्तिम 'अक्षर' (के 'ह्रस्व' होने पर)"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "अभि चन्द्रा भर्तवे नो हिरण्या।"[च]

## परीति पद्ये कृपरे षकारः ॥८५॥

**सू० अ०—यदि 'परि' 'पद्य' के बाद में 'कृ' हो तो (दोनों के बीच में) षकार (का आगम होता है)।**

उ० भा०—परि इत्येतस्मिन्; (पद्ये=) पूर्वपद्ये; कृपरे सत्यन्तरा; (षकारः=) षकारागमः; उपजायते। "परिष्कृण्वन्ननिष्कृतम्॥"[1]

उ० भा० अ०—परि—यह; (पद्ये=) पूर्व-'पद्य'; कृपरे='कृ' है बाद में जिसके ऐसा हो तो; मध्य में; (षकारः=) षकार का आगम; हो जाता है (तात्पर्य यह है कि यदि

टि० (क) महि। क्षेत्रम्। पुरु। चन्द्रम्। विविद्वान्॥ प० पा०

(ख) पृथु। चन्द्रम्। अवसे। चर्षणिऽप्राः॥ प० पा०

(ग) अधि। चन्द्रम्। बृहत्। पृथु॥ प० पा०

(घ) हरिऽचन्द्रः। मरुत्ऽगणः॥ प० पा०

यहाँ पर पूर्व-'पद्य' 'हरि' का अन्तिम 'अक्षर' (=इकार) 'ह्रस्व' है और इसके बाद में दूसरा 'पद्य' 'चन्द्रः' है। प्रस्तुत सूत्र से दोनों के मध्य में शकार का आगम हो गया है जिससे 'हरिश्चन्द्रः' रूप सम्पन्न हो गया है।

(ङ) तात्पर्य यह है कि ऐसा कोई उदाहरण नहीं मिलता जहाँ पूर्व-'पद्य' के अन्त में 'दीर्घ' 'अक्षर' हो और उसके बाद में दूसरा 'पद्य' 'चन्द्र' शब्द हो। अतएव सूत्र में 'ह्रस्व' शब्द का प्रयोग करना आवश्यक नहीं था तथापि स्पष्टता के लिए उसका प्रयोग कर दिया गया है। उपलब्ध उदाहरणों में पूर्व-'पद्य' के अन्तिम 'अक्षर' के 'ह्रस्व' होने पर ही बाद में 'चन्द्र' शब्द आया है और दोनों के बीच में शकार का आगम हो गया है।

(च) अभि। चन्द्रा। भर्तवे। नः। हिरण्या॥ प० पा०

यहाँ 'अभि' और 'चन्द्रा' के मध्य में शकार का आगम नहीं हुआ है क्योंकि 'चन्द्रा' के पूर्व में पूर्व-'पद्य' का 'ह्रस्व' 'अक्षर' न होकर पूर्व-पद का 'ह्रस्व' 'अक्षर' है।

---

[1] ऋ० ९।३९।२

'परि' पूर्व-'पद' हो और उसके बाद में 'कृ' से आरम्भ होने वाला उत्तर-'पद' हो तो दोनों के बीच में षकार का आगम हो जाता है)। (जैसे) "परिष्कृण्वन्ननिष्कृतम् ।"[क]

## वनेति रेफः सदशब्द उत्तरे ॥८६॥

सू० अ०—'वन' (इस पूर्व-'पद') के बाद में 'सद' शब्द हो तो (दोनों के बीच में) रेफ (का आगम हो जाता है)।

उ० भा०—वन इत्येतस्मिन्पूर्वपदे सदशब्द उत्तरेऽन्तरा रेफो जायते। "तिष्ठद्रथं न धूर्षदं वनर्षदम् ॥"[1]

उ० भा० अ०—वन—यह पूर्व-'पद' हो; सदशब्द उत्तरे='सद' शब्द बाद में हो तो; मध्य में रेफ का आगम हो जाता है (अर्थात् पूर्व-'पद' 'वन' के बाद में 'सद' शब्द हो तो दोनों के बीच में रेफ आ जाता है)। (जैसे) "तिष्ठद्रथं न धूर्षदं वनर्षदम् ।"[ख]

## परिष्कृण्वन्ति वेधसः ॥८७॥

सू० अ०—"परिष्कृण्वन्ति वेधसः" (इस स्थल पर निपातन से षकार का आगम हो गया है)।

उ० भा०—परिष्कृण्वन्ति इति निपात्यते षकारागमः। "तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति वेधसः ।"[2] अपदार्थं वचनम्। वेधसः इति किम्? मृग्यं प्रत्युदाहरणम् ॥

उ० भा० अ०—परिष्कृण्वन्ति में षकार का आगम निपातन से हुआ है। (जैसे) "तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति वेधसः ।"[ग] 'पद' न होने के कारण (पुनः) कथन (किया गया है)।[घ] वेधसः—यह (सूत्र में) क्यों (कहा)? (उत्तर) प्रत्युदाहरण खोजना चाहिए।

## अस्कृतोषसम् ॥८८॥

सू० अ०—"अस्कृतोषसम्" (में सकार का आगम निपातन से हो गया है)।

उ० भा०—अस्कृत इति निपात्यते सकारोपजनः। "निरु स्वसारमस्कृतोषसम् ।"[3] उषसम् इति किम्? "युजं ह्यन्यमकृत प्रवेपनी ॥"[4]

टि० (क) परिऽकृण्वन्। अनिःऽकृतम् ॥ प० पा०

(ख) तिष्ठत्। रथम्। नः। धूःऽसदम्। वनऽसदम् ॥ प० पा०

(ग) तम्। त्वा। विप्राः। वचःऽविदः। परि। कृण्वन्ति। वेधसः ॥ प० पा०

(घ) तात्पर्य यह है कि 'परि' के अनन्तर 'कृ' होने पर षकार के आगम का विधान तो ४।८५ में किया गया है किंतु वह सूत्र 'परि' के पूर्व 'पद' होने पर ही लगता है। प्रस्तुत स्थल में 'परि' पूर्व-'पद' नहीं है, अतः उस सूत्र से प्रस्तुत में षकार का आगम सिद्ध नहीं होता है, जिससे यहाँ उसका पुनः कथन किया गया है।

---

[1] ऋ० १०।१३२।७ [2] ऋ० ९।६४।२३

[3] ऋ० १०।१२७।३ [4] ऋ० ५।३४।८

उ० भा० अ०—अस्कृत में सकार का आगम निपातन से हुआ है। "निरु स्वसारमस्कृतोषसम्।"[क] उषसम्—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "युजं ह्यन्यमकृत प्रवेपनी।"[ख]

## शौद्धाक्षराः संधयः एत उक्ताः ॥८९॥

सू० अ०—(४।८४ से ४।८८ तक) ये 'शौद्धाक्षर' (–संज्ञक) संधियाँ कही गई हैं।

उ० भा०—य एते पुरुपृथ्वादयः संधयस्ते; (शौद्धाक्षराः=) शौद्धाक्षरसंज्ञाः; वेदितव्याः। "शौद्धाक्षरागमोऽपैति"[१] इत्यादि संज्ञाप्रयोजनम्॥

उ० भा० अ०—"पुरुपृथु" (४।८४) से प्रारम्भ करके (४।८८ तक) जो; एते=ये; संधयः=संधियाँ हैं; ते=उन्हें; (शौद्धाक्षराः=) 'शौद्धाक्षर'–संज्ञक; जानना चाहिए। "'शौद्धाक्षर' (–संज्ञक) आगम का लोप हो जाता है" इत्यादि संज्ञा का प्रयोजन है।

(पदान्ते आकारस्य अकारः)

## मेधातिथौ वरुणान्तव्रतान्तौ
## स्पर्शान्तस्थाप्रत्ययौ निर्ह्रसेते ॥९०॥

(पदान्त में आकार का अकार होना)

सू० अ०—मेधातिथि (ऋषि के सूक्तों) में 'वरुणान्त' ('वरुण' शब्द में अन्त होने वाले) और 'व्रतान्त' ('व्रत' शब्द में अन्त होने वाले) (समास) 'ह्रस्व' हो जाते हैं, यदि बाद में 'स्पर्श' या 'अन्तःस्था' हो।

उ० भा०—मेधातिथौ ऋषौ। "अग्निं दूतं वृणीमहे"[२]—इत्यारभ्य—"कस्य नूनम्"[३]—इति यावन्मेधातिथिः। वरुणोऽन्ते यस्य समासस्य स वरुणान्तः। एवमेव व्रतान्तोऽपि गृह्यते। (स्पर्शान्तस्थाप्रत्ययौ=) स्पर्शप्रत्ययेऽन्तःस्थाप्रत्यये; (वरुणान्तव्रतान्तौ) निर्ह्रसेते=ह्रस्वौ भवतः। वरुणान्तः—"इन्द्रावरुण नू नु वाम्।"[४] "इन्द्रावरुण यां हुवे।"[५] व्रतान्तः—"युवं दक्षं धृतव्रत मित्रावरुण दूळभम्।"[६] मेधातिथौ इति किम्? "इन्द्रावरुणा मदे अस्य मायिनः"[७]; "इन्द्रावरुणा युवमध्वराय नः।"[८] स्पर्शान्तःस्थाप्रत्ययौ इति किम्? "ता मित्रावरुणा हुवे॥"[९]

उ० भा० अ०—मेधातिथौ=मेधातिथि ऋषि (के सूक्तों में)। "अग्निं दूतं वृणीमहे"—इससे लेकर—"कस्य नूनम्"—इस (मन्त्र से पहले) तक मेधातिथि (के सूक्त

टि० (क) निः। ऊँ इति। स्वसारम्। अकृत। उषसम्॥ प० पा०
(ख) युजम्। हि। अन्यम्। अकृत। प्रऽवेपनी॥ प० पा०
बाद में 'उषसम्' न होने से यहाँ सकार का आगम नहीं हुआ है।

---

[१] १०।२१ [२] ऋ० १।१२।१ [३] ऋ० १।२४।१
[४] ऋ० १।१७।८ [५] ऋ० १।१७।१ [६] ऋ० १।१५।६
[७] ऋ० ७।८२।३ [८] ऋ० ७।८२।१ [९] ऋ० १।२३।५

हैं)। 'वरुण' (शब्द) है अन्त में जिस समास के वह वरुणान्त है। उसी प्रकार व्रतान्त का भी ग्रहण होता है (अर्थात् 'व्रत' शब्द है अन्त में जिस समास के वह व्रतान्त है)। (स्पर्शान्तःस्थाप्रत्ययौ=) 'स्पर्श' बाद में होने पर और 'अन्तःस्था' बाद में होने पर; (वरुणान्तव्रतान्तौ='वरुणान्त' और 'व्रतान्त' समास) निह्नसेते='ह्रस्व' हो जाते हैं (अर्थात् 'स्पर्श' या 'अन्तःस्था' बाद में होने पर 'वरुणान्त' और 'व्रतान्त' समासों का अन्तिम 'दीर्घ' 'स्वर'-वर्ण 'ह्रस्व' हो जाता है)। वरुणान्त (समासों के उदाहरण)—"इन्द्रावरुण नू नु वाम्"क; "इन्द्रावरुण यां हुवे।"ख; व्रतान्त (का उदाहरण)—"युवं दक्षं धृतव्रत मित्रावरुण दूळभम्।ग "मेधातिथि (के सूक्तों) में"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "इन्द्रावरुणा मदे अस्य मायिनः"घ; "इन्द्रावरुणा युवमध्वराय नः।"ङ " 'स्पर्श' और 'अन्तःस्था' बाद में होने पर"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "ता मित्रा-वरुणा हुवे।"च

## आदित्या देवा वरुणासुरेति येत्यादिषु ॥६१॥

सू० अ०—(४।९३ में उल्लिखित) 'या' इत्यादि (शब्द) बाद में हों तो 'आदित्या', 'देवा', 'वरुणा' और 'असुरा' (ये पद 'ह्रस्व' हो जाते हैं)।

उ० भा०—आदित्या, देवा, वरुणा, असुरा—एतानि पदानि ह्रस्वानि भवन्ति या इत्यादिषु पदेषु परभूतेषु। तानि तूपरिष्टाद्वक्ष्यति; अत उपरिष्टादेवोदाहरिष्यामः॥

उ० भा० अ०—आदित्या, देवा, वरुणा और असुरा—ये पद 'ह्रस्व' हो जाते हैं; या इत्यादिषु='या' इत्यादि पद बाद में होने पर (अर्थात् ४।९३ में निर्दिष्ट पदों में से कोई भी पद बाद में हो तो प्रस्तुत सूत्र में निर्दिष्ट पदों का अन्तिम 'स्वर'-वर्ण 'ह्रस्व' हो जाता है)। (सूत्रकार) उन (पदों) को आगे (४।९३ में) कहेंगे; इसलिए हम आगे (अर्थात् ४।९३ के भाष्य में) ही उदाहरण देंगे।

## वयमित्यत्र मित्रा ॥९२॥

सू० अ०—'वयम्' यह पद बाद में हो तो 'मित्रा' (का अन्तिम 'स्वर'-वर्ण) ('ह्रस्व' हो जाता है)।

टि० (क) इन्द्रावरुणा। नु। नु। वाम्॥ प० पा०

(ख) इन्द्रावरुणा। याम्। हुवे॥ प० पा०

इन दोनों उदाहरणों में 'इन्द्रावरुणा' प्रस्तुत सूत्र से 'इन्द्रावरुण' हो गया है।

(ग) युवम्। दक्षम्। धृतऽव्रता। मित्रावरुणा। दुःऽदभम्॥ प० पा०

यहाँ 'धृतव्रता' प्रस्तुत सूत्र से 'धृतव्रत' हो गया है।

(घ) इन्द्रावरुणा। मदे। अस्य। मायिनः॥ प० पा०

(ङ) इन्द्रावरुणा। युवम्। अध्वराय। नः॥ प० पा०

ये दोनों ही मन्त्र मेधातिथि के नहीं हैं, अतः 'इन्द्रावरुणा' का 'इन्द्रावरुण' नहीं हुआ है। भाष्यकार ने 'धृतव्रता' का प्रत्युदाहरण प्रस्तुत नहीं किया है।

(च) ता। मित्रावरुणा। हुवे॥ प० पा०

यद्यपि यह मन्त्र मेधातिथि ऋषि का है तथापि 'इन्द्रावरुणा' का 'इन्द्रावरुण' नहीं हुआ है क्योंकि 'मित्रवरुणा' के बाद में हकार है जो न 'स्पर्श' है और न 'अन्तःस्था' है।

उ० भा०—वयम् इति; अत्र=एतस्मिन् पदे परभूते; मित्रा इत्येतत्पदं ह्रस्वीभवति। "मित्र वयं च सूरयः ॥"[१]

उ० भा० अ०—वयम्; अत्र=यह पद बाद में हो तो; मित्रा—यह पद 'ह्रस्व' हो जाता है (अर्थात् 'वयम्' पद बाद में होने पर 'मित्रा' पद का अन्तिम 'स्वर'-वर्ण 'ह्रस्व' हो जाता है)। (जैसे) "मित्र वयं च सूरयः।"[क]

या सुप्रतीकं निष्कृतं पुरोहितिः
क्षत्रं दाशति शवसा भिषज्यथः ॥९३॥

सू० अ०—(४।९१ में सूचित 'या' आदि पद ये हैं)—'या', 'सुप्रतीकम्', निष्कृतम्', 'पुरोहितिः', 'क्षत्रम्', 'दाशति', 'शवसा' (और) 'भिषज्यथः'।

उ० भा०—या, सुप्रतीकम्, निष्कृतम्, पुरोहितिः, क्षत्रम्, दाशति, शवसा, भिषज्यथः—एते ते यादयो येऽधस्तादुपदिष्टाः। या—"प्र सा क्षितिरसुर या महि प्रिया।"[२-ख] सुप्रतीकम्—"उद्वां चक्षुर्वरुण सुप्रतीकम्।"[३-ग] निष्कृतम्—"बळित्था देव निष्कृतमादित्या।"[४-घ] पुरोहितिः—"इयं देव पुरोहितिर्युवभ्याम्।"[५-ङ] क्षत्रम्—"युवं नो येषु वरुण क्षत्रम्।"[६-च] दाशति—"इन्द्रा यो वां वरुण दाशति त्मन्।"[७-छ] शवसा—"य आदित्य शवसा वां नमस्वान्।"[८-ज] भिषज्यथः—"यद्वा देव भिषज्यथः॥"[९-झ]

उ० भा० अ०—या, सुप्रतीकम्, निष्कृतम्, पुरोहितिः, क्षत्रम्, दाशति, शवसा, भिषज्यथः—ये वे 'या' आदि पद हैं जिनका पहले (४।९१) में संकेत किया गया है।....।

(विसर्जनीयसंधिविषये निपातनानि)

सो चिन्न्वगस्त्ये दशमे च मण्डले ॥९४॥

(विसर्जनीय संधि के विषय में निपातन)

सू० अ०—अगस्त्य (ऋषि-के सूक्तों) में और दशम मण्डल में 'सो चिन्नु' (यह निपातन से होता है)।

टि० (क) मित्रा। वयम्। च। सूरयः॥ प० पा०
(ख) प्र। सा। क्षितिः। असुरा। या। महि। प्रिया॥ प० पा०
(ग) उत्। वाम्। चक्षुः। वरुणा। सुऽप्रतीकम्॥ प० पा०
(घ) वट्। इत्था। देवा। निःऽकृतम्। आदित्या॥ प० पा०
(ङ) इयम्। देवा। पुरःऽहितिः। युवऽभ्याम्॥ प० पा०
(च) युवम्। नः। येषु। वरुणा। क्षत्रम्॥ प० पा०
(छ) इन्द्रा। यः। वाम्। वरुणा। दाशति। त्मन्॥ प० पा०
(ज) यः। आदित्या। शवसा। वाम्। नमस्वान्॥ प० पा०
(झ) यत्। वा। देवा। भिषज्यथः॥ प० पा०

---

[१] ऋ० ५।६६।६ [२] ऋ० १।१५१।४ [३] ऋ० ७।६१।१
[४] ऋ० ५।६७।१ [५] ऋ० ७।६०।१२ [६] ऋ० ५।६४।६
[७] ऋ० ६।६८।५ [८] ऋ० ७।८५।४ [९] ऋ० ८।९।६

उ० भा० – सो चित् इति निपात्यत ओत्वं विसर्जनीयस्य; (अगस्त्ये=) अगस्त्य ऋषौ; दशमे मण्डले च । "सो चिन्नु न मराति नो वयम् ।"[१] "सो चिन्नु सख्या नर्य इन स्तुतः ।"[२] अगस्त्ये दशमे च मण्डले इति किम् ? "स चिन्वासां पती रयीणाम्"[३]; "स चिद्विवेद निहितम् ॥"[४]

उ० भा० अ०—सो चित्—(यहाँ पर) विसर्जनीय का ओकार निपातन से होता है; (अगस्त्ये=) अगस्त्य ऋषि (के सूक्तों) में); दशमे मण्डले च=और दशम मण्डल में (अर्थात् अगस्त्य ऋषि के सूक्तों में और दशम मण्डल में 'सो चित्' इस स्थल पर विसर्जनीय निपातन से ओकार होता है)। (जैसे) "सो चिन्नु न मराति नो वयम् ।"[क] "सो चिन्नु सख्या नर्य इन स्तुतः ।"[ख] "अगस्त्य (ऋषि के सूक्तों) में और दशम मण्डल में"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "स चिन्वासां पती रयीणाम्"[ग]; "स चिद्विवेद निहितम् ।"[घ]

## सा न्वीयते ॥६५॥

सू० अ०—'सा न्वीयते' (में 'सः' का विसर्जनीय निपातन से आकार हो गया है)।

उ० भा०—सा न्वीयते इति विसर्जनीयस्य आत्वं निपात्यते- -"स चिकित्वाँ ईयते सा न्वीयते ।"[५] ईयते इति किम् ? प्रत्युदाहरणं प्रत्येष्यम् ॥

टि० (क) सः । चित् । नु । न । मराति । नो इति । वयम् ॥ प० पा०

२।११ के अनुसार 'सः' के विसर्जनीय का लोप होकर "स चिन्नु" रूप होना चाहिए था किंतु अगस्त्य ऋषि के सूक्त में होने के कारण प्रकृत सूत्र से विसर्जनीय का ओकार हो गया जिससे "सो चिन्नु" रूप निष्पन्न हो गया है।

(ख) सः । चित् । नु । सख्या । नर्यः । इनः । स्तुतः ॥ प० पा०

दशम मण्डल में होने के कारण निपातन से 'सो चिन्नु' रूप निष्पन्न हो गया है।

(ग) सः । चित् । नु । आसाम् । पतिः । रयीणाम् ॥ प० पा०

यह मन्त्र न तो अगस्त्य ऋषि (ऋ० १।१६५–१९१) का है और न दशम मण्डल का है, इसलिए 'सः' के विसर्जनीय का लोप २।११ से हो गया है।

(घ) सः । चित् । विवेद । निऽहितम् ॥ प० पा०

यह मन्त्र न तो अगस्त्य ऋषि का है और न दशम मण्डल का है, इसलिए 'सः' के विसर्जनीय का लोप २।११ से हो गया है। वास्तव में यह प्रत्युदाहरण पूर्णतया ठीक नहीं है क्योंकि 'चित्' के बाद में यहाँ 'नु' नहीं है। 'सः' का विसर्जनीय निपातन से तभी ओकार होता है जब 'सः' के बाद में 'चित्' और 'नु' ये दो पद हों। अगस्त्य ऋषि के सूक्तों में और दशम मण्डल में होने पर भी प्रस्तुत प्रत्युदाहरण में 'सः' के विसर्जनीय का ओकार न होता।

---

[१] ऋ० १।१९१।१० [२] ऋ० १०।५०।२ [३] ऋ० १।६८।४
[४] ऋ० ९।८७।३ [५] ऋ० १।१४५।१

उ० भा० अ०—सा न्वीयते में विसर्जनीय का आकार निपातन से हो गया है। (जैसे) "स चिकित्वाँ ईयते सा न्वीयते।"[क] ईयते—यह (सूत्र में) क्यों (कहा) ? (उत्तर) प्रत्युदाहरण खोजना चाहिए।

## सः पलिक्नीः ॥९६॥

सू० अ०—"सः पलिक्नीः" (यहाँ 'सः' के विसर्जनीय का लोप न होना निपातन से सिद्ध है)।

उ० भा०—(सः पलिक्नीः) विसर्जनीयस्यालोपो निपातितः। "न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीः॥"[1]

उ० भा० अ०—(सः पलिक्नीः—यहाँ पर) विसर्जनीय का अलोप निपातन से हुआ है। (जैसे) "न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीः।"[ख]

## हि षस्तव ॥९७॥

सू० अ०—"हि षस्तव" (में विसर्जनीय का लोप न होना निपातन से सिद्ध है)।

उ० भा०—(हि षस्तव) अत्र विसर्जनीयस्यालोपो निपात्यते। "नहि षस्तव नो मम।"[2] हि इति किम् ? "स तवोती गोषु गन्ता।"[3] नहीत्येतत्पदे हीति यत्पदावयवग्रहणं तच्छन्दोभङ्गभयात्॥

उ० भा० अ०—(हि षस्तव) यहाँ निपातन से विसर्जनीय का अलोप हुआ है। (जैसे) "नहि षस्तव नो मम।"[ग] हि—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "स तवोती गोषु गन्ता।"[घ] 'नहि' इस पद में से जो पद के अवयव 'हि' का (सूत्र में) ग्रहण किया गया है वह छन्दः के भङ्ग के भय से (किया गया है)।[ङ]

टि० (क) सः। चिकित्वान्। ईयते। सः। नु। ईयते॥ प० पा०

(ख) न। ताः। अगृभ्रन्। अजनिष्ट। हि। सः। पलिक्नीः॥ प० पा०
२।११ के अनुसार 'सः' के विसर्जनीय का लोप प्राप्त होता है किंतु प्रस्तुत सूत्र के अनुसार 'सः' के विसर्जनीय का लोप नहीं हुआ है।

(ग) नहि। सः। तव। नो इति। मम॥ प० पा०
२।११ से 'सः' के विसर्जनीय का लोप प्राप्त होता है किंतु प्रस्तुत सूत्र के अनुसार निपातन से विसर्जनीय का लोप नहीं हुआ और तब वह विसर्जनीय ४।३१ से सकार हो गया है।

(घ) सः। तव। ऊती। गोषु। गन्ता॥ प० पा०
यहाँ 'सः' के पूर्व में 'हि' नहीं है अतः २।११ के अनुसार विसर्जनीय का लोप हो गया है। 'हि' पूर्व में होने पर ही 'सः' के विसर्जनीय का लोप नहीं होता है।

(ङ) तात्पर्य यह है कि 'नहि' पूर्व में होने पर ही 'सः' के विसर्जनीय का लोप नहीं होता है जैसा कि उदाहरण से स्पष्ट है। ऐसी वस्तुस्थिति होने पर भी सूत्र में 'नहि' के स्थान पर 'हि' का संनिवेश छन्दोभङ्ग के भय से किया गया है। सूत्र में 'नहि' पद रखने पर छन्दः का भङ्ग हो जाता है।

---

[1] ऋ० ५।२।४ [2] ऋ० ८।३३।१६ [3] ऋ० ८।७१।५

(अन्यानि निपातनानि=धकारस्य दकारो घकारस्य गकारश्च)

जुगुक्षतो दुदुक्षन्गा अदुक्षद्
दुक्षन्वृधेऽस्य दुक्षतानु दक्षि ।
दक्षन्न पत्मन्दक्षुषोऽभि दक्षत्
कृष्णासो दक्षि हियानस्य दक्षोः ॥६८॥

(अन्य निपातन=धकार का दकार और घकार का गकार)

सू० अ०—(अधोलिखित पद जैसे सूत्र में उल्लिखित है वैसे ही निपातन से संहिता-पाठ में उपलब्ध होते हैं) 'जुगुक्षतः', 'दुदुक्षन्', 'गा अदुक्षत्', 'दुक्षन्वृधे', 'अस्य दुक्षत', 'अनु दक्षि', 'दक्षन्न', 'पत्मन्दक्षुषः', 'अभि दक्षत्', 'कृष्णासो दक्षि' (और) 'हियानस्य दक्षोः'।

उ० भा०—यथापठितान्येतानि निपातितानि । जुगुक्षतः "सुमतिं न जुगुक्षतः ।"[१-क] दुदुक्षन्—"सहस्रधारां बृहतीं दुदुक्षन् ।"[२-ख] गा अदुक्षत्—"निर्ज्योतिषा तमसो गा अदुक्षत् ।"[३-ग] गा इति किम् ? "अधुक्षत्पिप्युषीमिषम् ।"[४-घ] दुक्षन्वृधे—"हरिं यत्ते मन्दिनं दुक्षन्वृधे ।"[५-ङ] वृधे इति किम् ? "निर्धुक्षन्वक्षणाभ्यः ।"[६-च] अस्य दुक्षत-"विश्वाहा शुक्रं पयो अस्य दुक्षत ।"[७-छ] अस्य इति किम् ? "भरद्वाजायाव धुक्षत द्विता ।"[८-ज] अनु दक्षि—"त्वं वि भास्यनु दक्षि दावने ।"[९-झ] अनु इति किम् ? "नीचा तं धक्ष्यतसं न शुष्कम् ।"[१०-ञ] दक्षन्न-"धक्षन्न विश्वं ततृषाणमोषति ।"[११-ट] न इति किम् ? "द्रविर्न

टि० (क) सुऽमतिम् । न । जुघुक्षतः ॥ प० पा०

(ख) सहस्रऽधाराम् । बृहतीम् । दुघुक्षन् ॥ प० पा०

(ग) निः । ज्योतिषा । तमसः । गाः । अधुक्षत् ॥ प० पा०

(घ) अधुक्षत् । पिप्युषीम् । इषम् ॥ प० पा०

(ङ) हरिम् । यत् । ते । मन्दिनम् । धुक्षन् । वृधे ॥ प० पा०

(च) निः । धुक्षन् । वक्षणाभ्यः ॥ प० पा०

(छ) विश्वाहा । शुक्रम् । पयः । अस्य । धुक्षत् ॥ प० पा०

(ज) भरत्ऽवाजाय । अव । धुक्षत । द्विता ॥ प० पा०

(झ) त्वम् । वि । भासि । अनु । धक्षि । दावने ॥ प० पा०

(ञ) नीचा । तम् । धक्षि । अतसम् । न । शुष्कम् ॥ प० पा०

(ट) धक्षत् । न । विश्वम् । ततृषाणम् । ओषति ॥ प० पा०

---

[१] ऋ० ८।३१।७ [२] ऋ० १०।७४।४ [३] ऋ० १।३३।१०
[४] ऋ० ८।७२।१६ [५] ऋ० १।१२१।८ [६] ऋ० ८।१।१७
[७] ऋ० १।१६०।३ [८] ऋ० ६।४८।१३ [९] ऋ० २।१।१०
[१०] ऋ० ४।४।४ [११] ऋ० १।१३०।८

द्रावयति दारु धक्षत् ।"[१-क] पत्मन्दृक्षुषः—"तस्य पत्मन्दक्षुषः ।"[२-ख] पत्मन् इति किम् ? प्रत्युदाहरणं मृग्यम् । अभि दक्षत्—"स यो व्यस्यादभि दक्षदुर्वीम् ।"[३-ग] अभि इति किम् ? "द्रविर्न द्रावयति दारु धक्षत् ।"[४-घ] कृष्णासो दक्षि—"आदस्य ते कृष्णासो दक्षि सूरयः ।"[५-ङ] कृष्णास इति किम् ? "नीचा तं धक्ष्यतसं न शुष्कम् ।"[६-च] ह्वियानस्य दक्षोः—"संदृष्टिरस्य ह्वियानस्य दक्षोः ।"[७-छ] ह्वियानस्य इति किम् ? "धक्षोर्न वाताः परि सन्त्यच्युताः ॥"[८-ज]

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्रउवटकृतौ
प्रातिशाख्यभाष्ये चतुर्थपटलम् ।

उ० भा० अ०—ये (पद) जैसे (सूत्र में) उल्लिखित हैं वैसे निपातन से (संहिता-पाठ में उपलब्ध) होते हैं ।......... ।

आनन्दपुर निवासी वज्रट के पुत्र उवट की कृति पार्षदव्याख्यात्मक
प्रातिशाख्यभाष्य में चतुर्थ पटल समाप्त हुआ ।

टि० (क) द्रविः । न । द्रवयति । दारु । धक्षत् ॥ प० पा०
(ख) तस्य । पत्मन् । धक्षुषः ॥ प० पा०
(ग) सः । यः । वि । अस्यात् । अभि । धक्षत् । उर्वीम् ॥ प० पा०
(घ) द्रविः । न । द्रवयति । दारु । धक्षत् ॥ प० पा०
(ङ) आत् । अस्य । ते । कृष्णासः । धक्षि । सूरयः ॥ प० पा०
(च) नीचा । तम् । धक्षि । अतसम् । न शुष्कम् ॥ प० पा०
(छ) सम्ऽदृष्टिः । अस्य । ह्वियानस्य । धक्षोः ॥ प० पा०
(ज) धक्षोः । न । वाताः । परि । सन्ति । अच्युताः ॥ प० पा०

इस सूत्र के ग्यारह स्थलों में से प्रथम स्थल में धकार गकार हो गया है । अन्य दस स्थलों में धकार दकार हो गया है । सभी प्रत्युदाहरणों में धकार दकार न होकर धकार ही रहा है ।

———

[१] ऋ० ६।३।४ [२] ऋ० १।१४१।७ [३] ऋ० २।४।७
[४] ऋ० ६।३।४ [५] ऋ० १।१४१।८ [६] ऋ० ४।४।४
[७] ऋ० २।४।४ [८] ऋ० १०।११५।४

## ५ : नति-पटलम्

नतिसंधेरधिकारसूत्रम्

नतिव्यापत्त्योः पौर्वापर्यम्

नतिसंधिः (=सकारस्य षकारः)

नतिसंधिः (=षकारपूर्वस्य तवर्गस्य टवर्गः)

नतिसंधिः (=सकारस्य षकारः) (पूर्वानुवृत्तः)

नतिसंधिः (=नकारस्य णकारः)

नतिसंधिविषयकनिपातनानि

नतिसंधिः (=नकारस्य णकारः) (पूर्वानुवृत्तः)

नतिसंज्ञा

(नतिसंधेरधिकारसूत्रम्)

**अन्तःपादं नाम्युपधः सकारः षकारमप्यूष्म-**
**परैर्यथोक्तम् । अन्यैरेकारात् ॥१॥**

(नतिसंधि का अधिकारसूत्र)

सू० अ०—पाद के मध्य में, एकार से अन्य 'नामि' (–'स्वर'–वर्णों) से बाद में स्थित सकार षकार (हो जाता है) जैसा (परवर्ती सूत्रों में) कहा गया है, चाहे (उन पूर्ववर्ती 'नामि'–'स्वर'–वर्णों से) बाद में विसर्जनीय ('ऊष्मन्') भी हो।

उ० भा०—अन्तःपादम्=पादस्य मध्ये । (नाम्युपधः सकारः)=नामिनो यस्योपधाभूताः स तथोक्तः सकारः । "ऋकारादयो दश नामिनः स्वराः"[1] इत्युक्तम् । सकारः षकारम् आपद्यत इत्येतदधिकृतं वेदितव्यम् । ऊष्मपरैः नामिभिरुपहितः । अप्यनूष्मपरैरिति अपिशब्दः । यथोक्तम् इत्यधिकारोपसंहारवचनम् । अन्यैरेकारात् इति नामिसामान्यप्रसक्तावस्य निवृत्तिवचनम् ।

"यच्च गोषु दुष्ष्वप्न्यम् ।"[2] अन्तःपादम् इति किम् ? "तम इन्द्रस्तद्वरुणस्त-दग्निस्तत् ।"[3] नाम्युपधः इति किम् ? "परः सोऽस्तु तन्वा तना च ।"[4] यथोक्तग्रहणं किम् ? "ताभिर्याति स्वयुक्तिभिः ।"[5] अन्यैरेकारात् इति किम् ? "ये स्था मनोर्य-ज्ञियाः ॥"[6]

उ० भा० अ०—अन्तःपादम्=पाद के मध्य में । (नाम्युपधः सकारः)='नामि' ('स्वर'-वर्ण) जिसकी उपधा (=अव्यवहित पूर्ववर्ती) हैं वह इस प्रकार का सकार । "ऋकार से प्रारम्भ करके दस 'स्वर' (-वर्ण) 'नामिन्' हैं"—यह (१।६५ में) कहा जा चुका है । सकारः षकारम्=सकार षकार हो जाता है—इसे अधिकार जानना चाहिए । ऊष्मपरैः=विसर्जनीय ('ऊष्मन्') हैं बाद में जिनके ऐसे 'नामि'-'स्वर' (-वर्णों) से; बाद में स्थित । अपि शब्द (यह बतलाने के लिए सूत्र में प्रयुक्त है कि) विसर्जनीय ('ऊष्मन्') जिनके बाद में नहीं हैं ऐसे 'नामि' (-'स्वर'-वर्णों) से बाद में स्थित तो (सकार षकार हो ही जाता है) (अर्थात् सकार षकार हो जाता है यदि (१) सकार के अव्यवहित पूर्व में 'नामि' 'स्वर' हो अथवा (२) पूर्ववर्ती 'नामि'-'स्वर' और सकार के मध्य में विसर्जनीय का व्यवधान हो) । यथोक्तम्=जैसे (परवर्ती सूत्रों में) कहा गया है – यह अधिकार के उपसंहार का वाचक है ।[क] अन्यैरेकारात्=एकार से अन्य ('नामि'-'स्वर'-वर्णों)

टि० (क) सकार के षकार होने का जो अधिकार है वह उन्हीं स्थलों तक सीमित है जिन्हें आगे वाले सूत्रों में प्रतिपादित किया गया है । 'नामि'–'स्वर'–वर्ण के बाद में आने पर भी सकार सर्वदा सामान्य रूप से षकार नहीं हो जाता है । यह विकार (सकार का षकार होना) केवल वहीं-वहीं होता है जहाँ-जहाँ परवर्ती सूत्रों में कहा गया है । तुलना कीजिए—७।१ पर उवट-भाष्य ।

---

[1] १।६५ [2] ऋ० ८।४७।१४ [3] ऋ० १।१०७।३
[4] ऋ० ७।१०४।११ [5] ऋ० १।५०।९ [6] ऋ० १०।३६।१०

से ( बाद में )—इसके द्वारा 'नामि'-सामान्य से प्राप्त ( एकार की ) निवृत्ति की गई है।[क]

(उदाहरण) "यच्च गोषु दुष्ष्वप्न्यम्"[ख] "पाद के मध्य में"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "तन्न इन्द्रस्तद्वरुणस्तदग्निस्तत्।"[ग] " 'नामि' (–'स्वर'–वर्ण) के बाद में विद्यमान"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "परः सो अस्तु तन्वा तना च।"[घ] " 'यथोक्त' (शब्द) का ग्रहण" (सूत्र में) क्यों (किया) ? (उत्तर) "ताभि-र्याति स्वयुक्तिभिः।"[ङ] "एकार से अन्य ('नामि'–'स्वर'–वर्णों से)"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "ये स्था मनोर्यज्ञियाः।"[च]

टि० (क) एकार भी 'नामि'–'स्वर' है। अतः 'नामि'–'स्वर' कहने से उसकी भी प्राप्ति हो रही थी। "अन्यैरेकारात्" के द्वारा एकार की निवृत्ति हो गई जिससे ज्ञात हुआ कि एकार से बाद में आने वाला सकार षकार नहीं होता है। यदि "अन्यैरेकारात्" का सूत्र में ग्रहण न किया जाता तो एकार के बाद में स्थित सकार भी षकार हो जाता।

(ख) यत्। च। गोषु। दुःऽस्वप्न्यम्॥ प० पा०

यहाँ पर 'स्वप्न्यम्' के सकार और पूर्ववर्ती 'नामि'-'स्वर' (=उकार) के मध्य में विसर्जनीय का व्यवधान होने पर भी 'स्वप्न्यम्' का सकार ५।२१ से षकार हो गया है।

(ग) तत्। नः। इन्द्रः। तत्। वरुणः। तत्। अग्निः।
तत्।·····································॥ प० पा०

यहाँ 'अग्निस्' का सकार ५।३३ के अनुसार षकार होना चाहिए किंतु यह सकार षकार नहीं होता है क्योंकि यह पाद के मध्य में न होकर पाद के अन्त में है।

(घ) परः। सः। अस्तु। तन्वा। तना। च॥ प० पा०

यहाँ 'सः' तथा अस्तु' का सकार षकार नहीं हुआ है क्योंकि सकार के पूर्व में 'नामि' 'स्वर'-वर्ण नहीं है।

(ङ) ताभिः। याति। स्वयुक्तिऽभिः॥ प० पा०

'यथोक्त' के द्वारा यह बतलाया गया है कि 'नामि'-'स्वर'-वर्ण के बाद में आने पर भी सकार सर्वदा षकार नहीं होता है। यह सकार केवल वहाँ षकार होता है जहाँ परवर्ती सूत्रों में कह दिया गया है। बाद वाले सूत्रों में से किसी भी सूत्र के द्वारा 'स्वयुक्तिभिः' का सकार षकार नहीं होता है।

(च) ये। स्थ। मनोः। यज्ञियाः॥ प० पा०

'स्थ' का सकार षकार नहीं हुआ है क्योंकि इसके पूर्व में एकार से अन्य 'नामि'-'स्वर'-वर्ण न होकर एकार ही है। यदि पूर्व में एकार से अन्य कोई 'नामि'-'स्वर'-वर्ण होता तो ५।१२ के अनुसार 'स्थ' का सकार षकार हो जाता। एकार पूर्व में होने पर सकार षकार नहीं होता है।

(नतिव्यापत्त्योः पौर्वापर्यम्)

## नतिरत्र पूर्वा ततो व्यापत्तिर्भवतीति विद्यात् ॥२॥

(नति और व्यापत्ति का पौर्वापर्य)

सू० अ०—(यहाँ पर अर्थात् जब 'नामि'–'स्वर'–वर्ण के बाद में विसर्जनीय हो) यह जान लेना चाहिए कि 'नति' (=सकार का षकार होना='मूर्धन्यभाव') पहले होती है और 'व्यापत्ति' (=विसर्जनीय का 'ऊष्मन्' होना='ऊष्मभाव') तदनन्तर होती है।

उ० भा०--एकस्मिन् विषये यत्र कार्यद्वयं प्रवर्तते तत्रावश्यंभावी क्रमः। तत्र यथा-योगं कार्यक्रमो भवतीत्येतद्दर्शनायाह–नतिरत्र पूर्वा (ततो व्यापत्तिर्भवति) इति। यदि हि व्यापत्तिः पूर्वं क्रियेत पश्चान्नतिस्तदा—"तमेवोष्माणमूष्मणि"[1] इति सकारो नम्यस्य सकारस्य व्यवधायकः स्यान्नामिभिः सह ततो न प्रवर्तेत नतिः। अतः पूर्वमेव नतिः क्रियते पश्चात्—"तमेवोष्माणमूष्मणि"[2] इति ॥

उ० भा० अ०—एक स्थल में जहाँ दो कार्य प्रवृत्त होते हैं वहाँ क्रम निश्चित करना आवश्यक होता है। वहाँ पर परिस्थिति के अनुसार (यथायोगम्) (दोनों) कार्यों का क्रम होता है—यह दिखलाने के लिए (सूत्रकार ने) कहा है—नतिरत्र पूर्वा (ततो व्यापत्ति-र्भवति)=यहाँ 'नति' ('मूर्धन्यभाव') पहले होती है (और 'व्यापत्ति' बाद में)। क्योंकि यदि 'व्यापत्ति' (='विसर्जनीय' का 'ऊष्मन्' होना) पहले की जावे और 'नति' (=मूर्धन्य-भाव') बाद में तब—" 'ऊष्म' (-वर्ण) बाद में होने पर विसर्जनीय वही 'ऊष्म' (-वर्ण) (हो जाता है)"—(इस सूत्र के अनुसार विसर्जनीय के स्थान पर आने वाला सकार 'नामि'–'स्वर'-वर्णों के साथ 'नम्य' ('मूर्धन्यभाव' से प्रभावित होने वाले) सकार का व्यवधायक हो जायेगा, जिससे 'मूर्धन्यभाव' ('नति') प्रवृत्त नहीं होगा।[क] इसलिए 'मूर्धन्यभाव' ('नति') पहले ही कर लिया जाता है और (इसके) पश्चात्—" 'ऊष्म' (—वर्ण) बाद में होने पर विसर्जनीय वही 'ऊष्म' (—वर्ण) हो जाता है" (यह सूत्र प्रवृत्त होता है)।

टि० (क) तात्पर्य यह है कि विसर्जनीय के स्थान पर सकार ('व्यापत्ति') पहले कर लेने पर 'नामि'-'स्वर'-वर्ण और 'नम्य' सकार के मध्य में विसर्जनीय के स्थान पर आने वाले सकार का व्यवधान हो जायेगा जिससे 'नामि'-स्वर'-वर्ण 'नम्य' सकार को षकार नहीं कर सकेगा क्योंकि प्रस्तुत सूत्र के अनुसार केवल विसर्जनीय का व्यवधान ही 'मूर्धन्यभाव' में बाधक नहीं होता है। इसलिए सकार के षकार-भाव और विसर्जनीय के 'ऊष्मभाव' इन दोनों को उपपन्न करने के लिए पहले सकार का षकारभाव कर लिया जाता है और तब विसर्जनीय का 'ऊष्मभाव' किया जाता है।

---

[1] ४।३२ [2] ४।३२

( नतिसंधिः=सकारस्य षकारः )

## सूती नकिः स्वैर्व्युरु नह्यभि त्री नि हीति सः ॥३॥

( नतिसंधि=सकार का षकार होना )

सू० अ०—'सु', 'ऊती', 'नकिः', 'स्वैः', 'वि', 'उरु', 'नहि', 'अभि', 'त्री', 'नि' (और) 'हि'—(इन शब्दों में से कोई भी पूर्व में हो तो) 'सः' ('मूर्धन्यभाव' को प्राप्त हो जाता है अर्थात् 'सः' का सकार षकार हो जाता है)।

उ० भा०—सु, ऊती, नकिः, स्वैः, वि, उरु, नहि, अभि, त्री, नि, हि—इत्येतैर्नामिभिरुपहितः सः इति सकारः षकारमापद्यते। सु—"प्र सु ष विभ्यो मरुतः।"[१-क] ऊती—"ऊती ष बृहतो दिवः।"[२-ख] नकिः—"नकिष्षो अस्त्यरणो जहुर्हि तम्।"[३-ग] स्वैः—"स्वैष्ष एवै रिरिषीष्ट युर्जनः।"[४-घ] वि—"ओभे अप्रा रोदसी वि ष आवः।"[५-ङ] उरु—"उरु ष सरथं सारथये कः।"[६-च] नहि—"नहि षस्तव नो मम।"[७-छ] अभि—"अभि ष द्युम्नैरुत।"[८-ज] त्री—"त्री ष पवित्रा हृद्यन्तरा दधे।"[९-झ] नि—"नि ष हीयतां तन्वा तना च।"[१०-ञ] हि—"यूपावमुञ्चो अशमिष्ट हि षः॥"[११-ट]

उ० भा० अ०—सु, ऊती, नकिः, स्वैः, वि, उरु, नहि, अभि, त्री, नि (और) हि—इन 'नामि' (-पदों) (अर्थात् 'नामि'-'स्वर'-वर्णान्त इन पदों में से किसी भी पद) से बाद में आने वाले 'सः' इस (पद) का सकार षकार हो जाता है।······।

टि० (क) प्र। सु। सः। विऽभ्यः। मरुतः॥ प० पा०

'सु' से बाद में आने के कारण 'सः' का सकार संहिता-पाठ में षकार हो गया है। आगे के सभी उदाहरणों को ऐसे ही समझ लेना चाहिए।

(ख) ऊती। सः। बृहतः। दिवः॥ प० पा०

(ग) नकिः। सः। अस्ति। अरणः। जहुः। हि। तम्॥ प० पा०

(घ) स्वैः। सः। एवैः। रिरिषीष्ट। युः। जनः॥ प० पा०

(ङ) आ। उभे इति। अप्राः। रोदसी इति। वि। सः। आवरित्यावः॥ प० पा०

(च) उरु। सः। सऽरथम्। सारथये। कः॥ प० पा०

(छ) नहि। सः। तव। नो इति। मम॥ प० पा०

(ज) अभि। सः। द्युम्नैः। उत॥ प० पा०

(झ) त्री। सः। पवित्रा। हृदि। अन्तः। आ। दधे॥ प० पा०

(ञ) नि। सः। हीयताम्। तन्वा। तना। च॥ प० पा०

(ट) यूपात्। अमुञ्चः। अशमिष्ट। हि। सः॥ प० पा०

---

[१] ऋ० ४।२६।४. [२] ऋ० ६।२।४ [३] ऋ० २।२४।७
[४] ऋ० ८।१८।१३ [५] ऋ० १।९७।३८ [६] ऋ० ६।२०।५
[७] ऋ० ८।३३।१६ [८] ऋ० ८।२०।१६ [९] ऋ० ९।७३।८
[१०] ऋ० ७।१०४।१० [११] ऋ० ५।२।७

## द्व्यक्षरेणैव सत्स्थः ॥४॥

सू० अ०—दो अक्षरों वाले ही (पद) से (बाद में आने वाले) 'सत्' और 'स्थः' (का सकार षकार होता है)।

उ० भा०—द्व्यक्षरेणैव पदेन नाम्यन्तेनोपहितः सत् स्थः इत्येतयोः सकारः षकारमापद्यते। सत्—"दिवि षद् भूम्या ददे।"[१] स्थः—"यदिन्द्राग्नी दिवि ष्ठो यत्पृथिव्याम।"[२] द्व्यक्षरेणैव इति किम्? "युवं हि स्थः स्वर्पती॥"[३]

उ० भा० अ०—'नामि'-'स्वर'-वर्णान्त; द्व्यक्षरेणैव=दो अक्षरों वाले ही पद से; बाद में आने वाले सत् और स्थः—इन दोनों (पदों) का सकार षकार हो जाता है। सत्—"दिवि षद् भूम्या ददे।"[क] स्थः—"यदिन्द्राग्नी दिवि ष्ठो यत्पृथिव्याम्।"[ख] "दो अक्षरों वाले ही (पद) से"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "युवं हि स्थः स्वर्पती।"[ग]

## स्वबह्वक्षरेण ॥५॥

सू० अ०—अबह्वक्षर (बहु 'अक्षर' नहीं है जिसमें ऐसे पद) से (बाद में विद्यमान) 'सु' ('मूर्धन्यभाव' को प्राप्त होता है अर्थात् 'सु' का सकार षकार हो जाता है)।

उ० भा०—सु इत्येतत्पदं नम्यते अबह्वक्षरेण नामिनोपहितं चेत्। "मो ष्वद्य दुर्हणावान्"[४]; "अभी ष्वर्यः पौंस्यैर्भवेम।"[५] अबह्वक्षरेण इति किम्? "सुदीतिभिः सु दीदिहि॥"[६]

उ० भा० अ०—यदि अबह्वक्षर 'नामिन्' (='मूर्धन्यभाव' करने वाले 'स्वर'-वर्ण में अन्त होने वाले पद) से बाद में आवे तो सु—यह पद 'मूर्धन्यभाव' को प्राप्त होता है (अर्थात् इस पद का सकार षकार हो जाता है)। (उदाहरण) "मो ष्वद्य दुर्हणावान्"[घ];

टि० (क) दिवि। सत्। भूमिः। आ। ददे॥ प० पा०

(ख) यत्। इन्द्राग्नी इति। दिवि। स्थः। यत्। पृथिव्याम्॥ प० पा०
दो अक्षरों वाले 'दिवि' पद से बाद में विद्यमान 'सत्' और 'स्थः' का सकार षकार हो गया है।

(ग) युवम्। हि। स्थः। स्वःपती इति स्वःऽपती॥ प० पा०
यहाँ 'स्थः' का सकार षकार नहीं हुआ है क्योंकि पूर्व में दो अक्षरों वाला पद नहीं, अपितु एक 'अक्षर' वाला ('हि') पद है।

(घ) मो इति। सु। अद्य। दुःऽहनावान्॥ प० पा०

---

[१] ऋ० ९।६१।१०
[२] ऋ० १।१०८।११
[३] ऋ० ९।१९।२
[४] ऋ० ८।२।२०
[५] ऋ० १०।५९।३
[६] ऋ० ६।४८।३

"अभी ष्वर्यः पौंस्यैर्भवेम ।"क "अबह्वक्षर (पद) से"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "सुदीतिभिः सु दीदिहि ।"ख

## पदादयश्च स्यिति स्किति स्निति ॥६॥

सू० अ०—पद के आदि में विद्यमान 'स्य्', 'स्क्' और 'स्न्' भी ('मूर्धन्य-भाव' को प्राप्त होते हैं यदि इनके पूर्व में अवह्वक्षर 'नामि'-पद हो) ।

उ० भा०—पदानामाविभूताः सकाराः षकारमापद्यन्ते यकारककारनकारपराः सन्तः । इतिकरणः प्रकारार्थः । स्यिति—"गोभिष्ष्याम सधमादः ।"[1] स्किति—"यजु ष्कन्नं प्रथमं देवयानम् ।"[2] स्निति—"अधि ष्णुना धन्व सानो अव्ये ।"[3] अबह्वक्षरेणैवेत्येव—"तव प्रियासः सूरिषु स्याम"[4]; "उप द्यां स्कम्भथु स्कम्भनेन ॥"[5]

उ० भा० अ०—पदों के आदि में विद्यमान सकार षकार हो जाते हैं यदि (सकार के) बाद में यकार, ककार अथवा नकार स्थित हों । ('स्य्', 'स्क्' और 'स्न्' के बाद में लगा हुआ) 'इति' शब्द प्रकार के लिए है (अर्थात् 'स्यिति' का अर्थ है 'स्य्' से प्रारम्भ होने वाला कोई भी पद) । स्य्—"गोभिष्ष्याम सधमादः ।"ग स्क्—"यजु ष्कन्नं प्रथमं देवयानम् ।"घ स्न्—"अधि ष्णुना धन्व सानो अव्ये ।"ङ अवह्वक्षर ('नामि'-पद) से ही (बाद में आने पर सकार षकार होता है)—"तव प्रियासः सूरिषु स्याम"; च"उप द्यां स्कम्भथु स्कम्भनेन ।"छ

## अरेफस्य च स्मिति ॥७॥

सू० अ०—रेफरहित (पद) के (आदि में विद्यमान) 'स्म्' (भी 'मूर्धन्यभाव' को प्राप्त होता है यदि इसके पूर्व में अवह्वक्षर 'नामि'-पद हो) ।

टि० (क) अभि । सु । अर्यः । पौंस्यैः । भवेम ॥ प० पा०

(ख) सुदीतिऽभिः । सु । दीदिहि ॥ प० पा०

यहाँ 'सु' का सकार षकार नहीं हुआ है क्योंकि इसके पूर्व में अवह्वक्षर (एक या दो अक्षरों वाला) पद न होकर बह्वक्षर पद है ।

(ग) गोभिः । स्याम । सधऽमादः ॥ प० पा०

(घ) यजुः । स्कन्नम् । प्रथमम् । देवऽयानम् ॥ प० पा०

(ङ) अधि । स्नुना । धन्व । सानौ । अव्ये ॥ प० पा०

(च) तव । प्रियासः । सूरिषु । स्याम ॥ प० पा०

(छ) उप । द्याम् । स्कम्भथुः । स्कम्भनेन ॥ प० पा०

'स्याम' और 'स्कम्भनेन' का सकार षकार नहीं हुआ है क्योंकि पूर्व में अवह्वक्षर (एक या दो अक्षरों वाला) पद नहीं अपितु बह्वक्षर पद हैं ।

---

[1] ऋ० ५।२०।४ [2] ऋ० १०।१८१।३ [3] ऋ० ९।९७।१६
[4] ऋ० ७।१९।७ [5] ऋ० ६।७२।२

उ० भा०—अरेफस्य च पदस्य स्मिति पदादिर्नम्यते। "नहि ष्मा ते शतं चन।"[१] अरेफस्य इति किम्? "प्रति स्मरेथां तुजयद्भिरेवैः।"[२] अबह्वक्षरेणैवेत्येव—"वहामि स्म पूषणमन्तरेण॥"[३]

उ० भा० अ०—अरेफस्य च स्मिति=रेफरहित (पद) का 'स्म्' भी, पद के आदि में विद्यमान होने पर, 'मूर्धन्यभाव' को प्राप्त होता है। (उदाहरण) "नहि ष्मा ते शतं चन।"[क] "रेफरहित (पद) का"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "प्रति स्मरेथां तुजयद्भिरेवैः।"[ख] अबह्वक्षर (एक या दो अक्षरों वाले) ('नामि'-पद) से ही (बाद में होने पर सकार षकार होता है)—"वहामि स्म पूषणमन्तरेण।"[ग]

## एकारेणापि स्विति नःपरं चेत् ॥८॥

सू० अ०—यदि 'नः' बाद में हो तो 'सु' ('मूर्धन्यभाव' को प्राप्त होता है, चाहे वह 'सु') एकार से भी (बाद में विद्यमान हो)।

उ० भा०—(एकारेणापि=) एकारान्तेनापि; नामिनोपहितं सु इति एतत्पदं नम्यते; (नःपरम्=) नःपदं परम्; चेत् भवति। "ते षु णो मरुतो मृळयन्तु।"[४] नःपरम् इति किम्? "त्वे सु पुत्र शवसः।"[५] अप्राप्तप्राप्तिवचनो अपि शब्दः॥

उ० भा० अ०—(एकारेणापि=) एकार में अन्त होने वाले भी; 'नामि'-पद से बाद में विद्यमान; सु इति='सु'-यह पद; 'मूर्धन्यभाव' को प्राप्त होता है; चेत्=यदि; नःपरम्='नः' पद ('सु' के) बाद में होता है (अर्थात् एकार के बाद में विद्यमान 'सु' का सकार षकार हो जाता है यदि बाद में 'नः' पद हो)। (उदाहरण) "ते षु णो मरुतो मृळयन्तु।"[घ] "'नः' बाद में हो तो"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "त्वे सु पुत्र शवसः।"[ङ] अपि शब्द अप्राप्त (एकार) की प्राप्ति का वाचक है।[च]

टि० (क) नहि। स्म। ते। शतम्। चन॥ प० पा०

(ख) प्रति। स्मरेथाम्। तुजयत्ऽभिः। एवैः॥ प० पा०

'स्मरेथाम्' का सकार षकार नहीं हुआ है क्योंकि यह पद रेफरहित नहीं है।

(ग) वहामि। स्म। पूषणम्। अन्तरेण॥ प० पा०

यहाँ 'स्म्' का सकार षकार नहीं हुआ है क्योंकि पूर्व में अबह्वक्षर (एक या दो अक्षरों वाला) पद नहीं अपितु बह्वक्षर पद है।

(घ) ते। सु। नः। मरुतः। मृळयन्तु॥ प० पा०

पूर्व में एकार तथा बाद में 'नः' होने के कारण 'सु' का सकार षकार हो गया है।

(ङ) त्वे इति। सु। पुत्र। शवसः॥ प० पा०

'सु' पद का सकार षकार नहीं हुआ है क्योंकि 'सु' के बाद में 'नः' पद नहीं है।

(च) तात्पर्य यह है कि ५।१ में यह बतलाया गया था कि एकार के बाद में आने पर सकार षकार नहीं होता है। इस प्रकार एकार के बाद में अप्राप्त ('मूर्धन्यभाव'; 'षत्व') की प्राप्ति के लिए ही इस सूत्र में 'अपि' शब्द का ग्रहण किया गया है। यहाँ पर एकार के बाद में विद्यमान भी सकार षकार हो जाता है।

---

[१] ऋ० ४।३१।९ [२] ऋ० ७।१०४।७ [३] ऋ० १०।३३।१

[४] ऋ० १।१६९।५ [५] ऋ० ८।९२।१४

## दीर्घो न स्यिति ॥९॥

सू० अ०—(पूर्ववर्ती) 'दीर्घ' ('स्वर') 'स्य्' को ('मूर्धन्य') नहीं (बनाता है)।

उ० भा०—दीर्घो नाम्युपधाभूतोऽपि स्यिति पदादि न नमयति। "वीरैः स्याम सधमादः।"[१] दीर्घग्रहणं किम् ? "गोभिष् ष्याम सधमादः ॥"[२]

उ० भा० अ०—दीर्घः='दीर्घ' 'नामि' (-'स्वर'-वर्ण), पूर्व में होने पर भी, पद के आदि में विद्यमान; स्यिति='स्य्' को; न=नहीं; 'मूर्धन्य' बनाता है (अर्थात् 'दीर्घ' 'नामि'-'स्वर'-वर्ण पूर्व में हो तो 'स्य्' का सकार षकार नहीं होता है)। (उदाहरण) "वीरैः स्याम सधमादः।"[क] " 'दीर्घ' शब्द का (सूत्र में) ग्रहण क्यों किया ? (उत्तर) "गोभिष् ष्याम सधमादः।"[ख]

## उ च नास्पर्शपूर्वम् ॥१०॥

सू० अ०—यदि 'स्पर्श' (-'व्यञ्जन') पूर्व में न हो तो 'उ' भी (परवर्ती पद के आदि में विद्यमान 'स्य्' को 'मूर्धन्य' नहीं बनाता है)।

उ० भा०—उ–इत्येतत्पदं पूर्वं स्यिति पदादि न नमयति; (अस्पर्शपूर्वम्=) स्पर्शपूर्वं यदि न भवति। "एष उ स्य पुरुव्रतः।"[३] अस्पर्शपूर्वम् इति किम् ? "उदु ष्य शरणे दिवः ॥"[४]

उ० भा० अ०—उ–यह पद, पूर्व में स्थित होने पर, (परवर्ती) पद के आदि में विद्यमान 'स्य्' को; न=नहीं; 'मूर्धन्य' बनाता है; (अस्पर्शपूर्वम्=) यदि (उस 'उ' के) पूर्व में 'स्पर्श' (-'व्यञ्जन') नहीं होता है (अर्थात् 'स्पर्श' पूर्व में न हो तो 'उ' भी पद के आदि में विद्यमान 'स्य्' के सकार को षकार नहीं बनाता है)। (उदाहरण) "एष उ स्य पुरुव्रतः।"[ग] " 'स्पर्श' पूर्व में न हो तो"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "उदु ष्य शरणे दिवः।"[घ]

टि० (क) वीरैः। स्याम। सधऽमादः ॥ प० पा०

यह सूत्र ५।६ का अपवाद है। यहाँ 'स्याम' का सकार षकार नहीं हुआ है क्योंकि 'स्याम' के पूर्व में 'दीर्घ' 'स्वर' ऐकार है।

(ख) गोभिः। स्याम। सधमादः ॥ प० पा०

यहाँ 'स्याम' का सकार ५।६ से षकार हो गया है क्योंकि 'स्याम' के पूर्व में 'दीर्घ' 'स्वर' नहीं अपितु 'ह्रस्व' 'स्वर' इकार है।

(ग) एषः। ॐ इति। स्यः। पुरुऽव्रतः ॥ प० पा०

यह सूत्र ५।६ का अपवाद है। यहाँ 'स्यः' का सकार षकार नहीं हुआ है क्योंकि 'स्यः' के पूर्व में स्थित 'नामि-पद' 'उ' के पूर्व में 'स्पर्श'-'व्यञ्जन' नहीं अपितु 'ऊष्म'-'व्यञ्जन' षकार है।

(घ) उत्। ॐ इति। स्यः। शरणे। दिवः ॥ प० पा०

यहाँ पूर्ववर्ती 'उ' ने परवर्ती 'स्यः' के सकार को ५।६ के अनुसार षकार बना दिया है क्योंकि 'उ' के पूर्व में 'स्पर्श'–'व्यञ्जन' दकार है।

---

[१] ऋ० ५।२०।४ [२] ऋ० ५।२०।४

[३] ऋ० ९।३।१० [४] ऋ० ८।२५।१९

(नतिसंधिः=षकारपूर्वस्य तवर्गस्य टवर्गः)

**तकारवर्गस्तु टकारवर्ग-**

**मन्तःपदस्थोऽपि षकारपूर्वः ॥११॥**

(नतिसंधि=षकारपूर्व तवर्ग का टवर्ग होना)

सू० अ०—एक पद के मध्य में विद्यमान भी (और भिन्न पद में विद्यमान भी) तकारवर्ग टकारवर्ग हो जाता है, यदि षकार पूर्व में हो ।

उ० भा०—तकारवर्गस्तु पुनः टकारवर्गम् आपद्यते यथासंख्यम् । अन्तः-पदस्थोऽपि नानापदस्थोपि षकारपूर्वः चेत् । "कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसः ।"[1] "आपो हि ष्ठा मयोभुवः ।"[2] "नकिष्टं घ्नन्त्यन्तितो न दूरात् ।"[3] षकारपूर्वः इति किम् ? "युवं हि स्थः स्वर्पती ॥"[4]

उ० भा० अ०—तकारवर्गस्तु=तकारवर्ग तो पुनः; टकारवर्गम्=टकारवर्ग; हो जाता है क्रम से (अर्थात् तवर्ग का प्रथम वर्ण टवर्ग के प्रथम वर्ण में परिणत हो जाता है, द्वितीय वर्ण द्वितीय वर्ण में, इत्यादि)। अन्तःपदस्थोऽपि=पद के मध्य में (अर्थात् एक पद में) स्थित होने पर भी; भिन्न पद में स्थित होने पर भीक; षकारपूर्वः=यदि षकार (तकारवर्ण के) पूर्व में विद्यमान हो । (उदाहरण) "कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसः"[ख]; "आपो हि ष्ठा मयोभुवः ।"[ग] "नकिष्टं घ्नन्त्यन्तितो न दूरात् ।"[घ] "षकार पूर्व में विद्यमान हो तो"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "युवं हि स्थः स्वर्पती ।"[ङ]

टि० (क) इस सूत्र में यह विधान किया गया है कि पूर्ववर्ती षकार के प्रभाव से परवर्ती तवर्गीय वर्ण इन दो परिस्थितियों में टवर्गीय वर्ण हो जाता है—(१) जब षकार और तवर्गीय वर्ण—ये दोनों— एक ही पद में विद्यमान हों अथवा (२) जब षकार और तवर्गीय वर्ण—ये दोनों—भिन्न-भिन्न पदों में विद्यमान हों । दूसरी परिस्थिति में षकार पदान्त होता है और तवर्गीय वर्ण पदादि होता है ।

(ख) कः । स्वित् । वृक्षः । निःऽस्थितः । मध्ये । अर्णसः ॥ प० पा०

(ग) आपः । हि । स्थ । मयःऽभुवः ॥ प० पा०

इन दोनों उदाहरणों में षकार ने उसी पद में स्थित थकार को ठकार बना दिया है ।

(घ) नकिः । तम् । घ्नन्तिः । अन्तित । न । दूरात् ॥ प० पा०

यहाँ पदान्त षकार ने पदादि तकार को टकार बना दिया है ।

(ङ) युवम् । हि । स्थः । स्वःपती इति स्वःऽपती ॥ प० पा०

यहाँ थकार ठकार नहीं हुआ है क्योंकि थकार के पूर्व में षकार न होकर सकार है ।

---

[1] ऋ० १।१८२।७ [2] ऋ० १०।९।१ [3] २।२७।१३. [4] ऋ० ९।१९।२

(नतिसंधिः=नकारस्य णकारः) (पूर्वानुवृत्तः)

सितां सधस्थात्स्तनिहि स्तवाम
स्तवे स्तुवन्ति स्तुहि सीं स्तुत स्थ ।
साहि स्त स्तुप्सत्सि सत्सत्स्वनीति
स्तोमेत्यादिश्चापि बह्वक्षरान्त्यैः ॥१२॥

(नतिसंधि=नकार का णकार) (पूर्वानुवृत्त)

सू० अ०—'सिताम्', 'सधस्थात्', 'स्तनिहि', 'स्तवाम', 'स्तवे', 'स्तुवन्ति', 'स्तुहि', 'सीम्', 'स्तुतः', 'स्थ', 'साहि', 'स्तः', 'स्तुप्', 'सत्सि', 'सत्सत्', 'स्वनि'— इनका और 'स्तोम' इस (के सभी रूपों) का आदि (=प्रथम वर्ण अर्थात् सकार) ('मूर्धन्यभाव' को प्राप्त हो जाता है अर्थात् षकार हो जाता है), चाहे (वह सकार) बहुत अक्षरों वाले (पद) के अन्त में विद्यमान ('नामि'-'स्वर') से भी (बाद में हो) ।

उ० भा०—सिताम्, सधस्थात्, स्तनिहि, स्तवाम, स्तवे, स्तुवन्ति, स्तुहि, सीम्, स्तुतः, स्थ, साहि, स्तः, स्तुप्, सत्सि, सत्सन्, स्वनि—इत्येतेषां पदानाम् आदिः, स्तोम इत्येतस्य च पदस्य सप्रवादस्य आदिः नम्यते । अपि बह्वक्षरान्त्यैः नामिभिरुपहितः । अप्यबह्वक्षरान्त्यैरिति अपिशब्दः ।

सिताम्—"पदि षितामममुञ्चता यजत्राः ।"[१-क] सधस्थात्—"निष्षीमद्भ्यो धमथो निष्षधस्थात् ।"[२-ख] स्तनिहि—"नि ष्टनिहि दुरिता बाधमानः ॥"[३-ग] स्तवाम—"तमु ष्टवाम यं गिरः ।"[४-घ] स्तवे—"विश्वा यद्वामनु ष्टवे ।"[५-ङ] स्तुवन्ति—"अनु ष्टुवन्ति पूर्वथा ।"[६-च] स्तुहि—"तमु ष्टुहीन्द्रं यो ह सत्वा ।"[७-छ] सीम्—"निष्षीमद्भ्यो धमथो निष् षधस्थात् ।"[८-ज] स्तुतः—"नू ष्टुत इन्द्र नू गृणानः ।"[९-झ] स्थ—"आपो हि ष्ठा

टि० (क) पदि । सिताम् । अमुञ्चत । यजत्राः ॥ प० पा०
(ख) निः । सीम् । अत्ऽभ्यः । धमथः । निः । सधऽस्थात् ॥ प० पा०
(ग) निः । स्तनिहि । दुःऽइता । बाधमानः ॥ प० पा०
(घ) तम् । ऊँ इति । स्तवाम । यम् । गिरः ॥ प० पा०
(ङ) विश्वा । यत् । वाम् । अनु । स्तवे ॥ प० पा०
(च) अनु । स्तुवन्ति । पूर्वऽथा ॥ प० पा०
(छ) तम् । ऊँ इति । स्तुहि । इन्द्रम् । यः । ह । सत्वा ॥ प० पा०
(ज) निः । सीम् । अत्ऽभ्यः । धमथः । निः । सधऽस्थात् ॥ प० पा०
(झ) नु । स्तुतः । इन्द्र । नु । गृणानः ॥ प० पा०

---

[१] ऋ० ४।१२।६ [२] ऋ० ५।३१।९ [३] ऋ० ६।४७।३०
[४] ऋ० ८।९५।६ [५] ऋ० ५।७३।४ [६] ऋ० ८।३।८
[७] ऋ० १।१७३।५ [८] ऋ० ५।३१।९ [९] ऋ० ४।१६।२१

मयोभुवः ।"[१-क] साहि:—"वि षाह्यग्ने गृणते मनीषाम् ।"[२-ख] स्तः—"नास्य ते महिमानं परि ष्टः ।"[३-ग] स्तुप् –"सोमो विराजमनु राजति ष्टुप् ।"[४-घ] सत्सि—"अग्ने नि षत्सि नमसाधि बर्हिषि ।"[५-ङ] सत्सत्—"नि हि षत्सदन्तरः पूर्वो अस्मत् ।"[६-च] स्वनि—"यदि क्लोशमनु ष्वणि ।"[७-छ] स्तोभेत्यादिः—"परि ष्टोभत विंशतिः"[८-ज]; "परि ष्टोभन्तु नो गिरः ॥"[९-झ]

उ० भा० अ०—सिताम्, सधस्थात्, स्तनिहि, स्तवाम, स्तवे, स्तुवन्ति, स्तुहि, सीम्, स्तुतः, स्थ, साहि, स्तः, स्तुप्, सत्सि, सत्सत् (और) स्वनि—इन पदों का; आदिः=प्रथम वर्ण=सकार और स्तोभ—इस पद के किसी भी रूप का; आदिः=प्रथम वर्ण=सकार; 'मूर्धन्यभाव' को प्राप्त हो जाता है (अर्थात् षकार हो जाता है)। अपि बह्वक्षरान्त्यैः=बहुत अक्षरों वाले (पदों) के अन्त में विद्यमान 'नामि' (–'स्वर'–वर्णों) से; बाद में स्थित भी। अपि –शब्द (यह बतलाने के लिए सूत्र में प्रयुक्त है कि) अबह्वक्षर (पदों) के अन्त में विद्यमान ('नामि'–स्वर–वर्णों) से भी (बाद में स्थित सकार षकार हो जाता है) (तात्पर्य यह है कि सूत्रोक्त पदों के आदि में विद्यमान सकार षकार हो जाता है चाहे इस सकार के पूर्व में ऐसा 'नामि'–'स्वर'–वर्ण हो जो बह्वक्षर पद के अन्त में स्थित है और चाहे ऐसा 'नामि'–'स्वर'–वर्ण हो जो अबह्वक्षर पद के अन्त में स्थित है)।.........।

## नि परीति स्व सीत्यादी चकारवर्गीयोदयौ ॥१३॥

**सू० अ०—'नि' (और) 'परि' (ये दो 'नामि'-पद) (पद के) आदि में विद्यमान 'स्व' और 'सि' को ('मूर्धन्य' बना देते हैं), यदि ('स्व' और 'सि' के) बाद में चवर्ग का कोई वर्ण हो।**

उ० भा०—नि परि इत्येतौ नामिनौ स्व सि; (इत्यादी=) इत्यंभूतौ पदादी; नमयतः। किमविशेषेण ? नेत्याह –चकारवर्गीयोदयौ चेत्स्याताम्=चकारवर्गवर्ण-

टि० (क) आपः । हि । स्थ । मयःऽभुवः ॥ प० पा०
(ख) वि । साहि । अग्ने । गृणते । मनीषाम् ॥ प० पा०
(ग) न । अस्य । ते इति । महिमानम् । परि । स्त इति स्तः ॥ प० पा०
(घ) सोमः । विऽराजम् । अनु । राजति । स्तुप् ॥ प० पा०
(ङ) अग्ने । नि । सत्सि । नमसा । अधि । बर्हिषि ॥ प० पा०
(च) नि । हि । सत्सत् । अन्तरः । पूर्वः । अस्मत् ॥ प० पा०
(छ) यदि । क्लोशम् । अनु । स्वनि ॥ प० पा०
(ज) परि । स्तोभत । विंशतिः ॥ प० पा०
(झ) परि । स्तोभन्तु । नः । गिरः ॥ प० पा०

---

[१] ऋ० १०।९।१ [२] ऋ० ४।११।२ [३] ऋ० १।६१।८
[४] ऋ० ९।९६।१८ [५] ऋ० ८।२३।२६ [६] ऋ० १०।५३।१
[७] ऋ० ६।४६।१४ [८] ऋ० १।८०।९ [९] ऋ० ८।९२।१९

चवर्गीयार्थः। नि—"महान्तं कोशमुदचा नि षिञ्च।"[१-क] परि—"सहस्रधारः परि षिच्यते हरिः।"[२-ख] "परि ष्वजध्वं दश कक्ष्याभिः"[३-ग]; "परि ष्वजन्ते जनयो यथा पतिम्।"[४-घ] चवर्गीयोदयौ इति किम्? "व्युच्छन्ती परि स्वसुः॥"[५]

उ० भा० अ०—नि (और) परि—ये दो 'नामि' (-पद); स्व सि; (इत्यादी=) इस प्रकार के पदादियों को; 'मूर्धन्य' बना देते हैं। क्या बिना किसी विशेष के? (उत्तर) नहीं, (सूत्रकार) ने कहा है—चवर्गीयोदयौ=यदि ('स्व' और 'सि' के) बाद में चकारवर्गीय हो=बाद में चकारवर्ग (=चवर्ग) का कोई वर्ण हो तो—यह अर्थ है (तात्पर्य यह है कि 'सि' और 'स्व' का सकार षकार हो जाता है यदि(?)'सि' और 'स्व' के पूर्व में 'नि' या 'परि' हो और बाद में चवर्ग का कोई भी वर्ण हो)।............। "बाद में चवर्ग का (कोई वर्ण) हो"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "व्युच्छन्ती परि स्वसुः।"[ङ]

## दकारे चोत्तरे परान्से स सीति स्वरोदये ॥१४॥

सू० अ०—('नि' और 'परि') परवर्ती (=पदादियों)—'से', 'स' (और) 'सी' (को 'मूर्धन्य' बना देते हैं), यदि ('से', 'स' और 'सी' के) बाद में ऐसा दकार हो जिसके बाद में 'स्वर' (-वर्ण) है।

उ० भा०—दकारे चोत्तरे। चकारः समुच्चयार्थीयो निपरी समुच्चिनोति। परान्=पदादीन्; नमयतः। कथं भूतान्पदादीन्? अत आह—से, स, सी। इतिकरणः प्रकारार्थः। स्वरोदये—दकारस्य विशेषणमेतत्। से, स, सी—इति पदादीन्दकारे स्वरपरे निपरी नमत इत्यर्थः।

से—"परि षद्मं नि षेदुः।"[६] स—"नि षदा पीतये मधु"[७]; "शुनं नरः परि षदन्नुषासम्।"[८] सी—"नि षीद होत्रमृतुथा यजस्व।"[९] निपरी इति किम्? "इमं यम प्रस्तरमा हि सीद।"[१०] दकारे इति किम्? "नि समना भूमिः।" स्वरोदये इति किम्? "दिवश्चरन्ति परि सद्मा अन्तान्॥"[११]

टि० (क) महान्तम्। कोशम्। उत्। अच। नि। सिञ्च॥ प० पा०
(ख) सहस्रऽधारः। परि। सिच्यते। हरिः॥ प० पा०
(ग) परि। स्वजध्वम्। दश। कक्ष्याभिः॥ प० पा०
(घ) परि। स्वजन्ते। जनयः। यथा। पतिम्॥ प० पा०
(ङ) विऽउच्छन्ती। परि। स्वसुः॥ प० पा०
'परि' के बाद में आने पर भी 'स्व' का सकार षकार नहीं हुआ है क्योंकि 'स्व' के बाद में चवर्ग का कोई वर्ण न होकर सकार है।

---

[१] ऋ० ५।८३।८ [२] ऋ० ९।८६।३३ [३] ऋ० १०।१०१।१०
[४] ऋ० १०।४३।१ [५] ऋ० ४।५२।१ [६] ऋ० ४।५६।७
[७] ऋ० ८।९७।८ [८] ऋ० ४।३।११ [९] ऋ० १०।९८।४
[१०] ऋ० १०।१४।४ [११] ऋ० ५।४७।४

उ० भा० अ०—दकारे चोत्तरे=दकार बाद में होने पर भी। समुच्चयार्थीय चकार 'नि' और 'परि' का समुच्चय करता है। परान्=बाद में आने वालों को=पदादियों को; 'मूर्धन्य' बना देते हैं। किस प्रकार के पदादियों को (यह प्रश्न उठता है)? इसलिए (सूत्रकार) ने कहा है—से, स, सी को। इति—शब्द (सूत्र में) प्रकार के लिए (प्रयुक्त है) (अर्थात् 'से', 'स' अथवा 'सी' से प्रारम्भ होने वाले किसी भी पद के सकार को पूर्ववर्ती 'नि' और 'परि' 'मूर्धन्य' बना देते हैं)। स्वरोदये='स्वर' (-वर्ण) बाद में होने परे—यह दकार का विशेषण है। पद के आदि में विद्यमान 'से', 'स' (और) 'सी' को (पूर्ववर्ती) 'नि' और 'परि' 'मूर्धन्य' बना देते हैं, यदि ('से', 'स' और 'सी' के) बाद में ऐसा दकार हो जिसके बाद में 'स्वर' (-वर्ण) हो—यह अर्थ है।

से—"परि यज्ञं नि षेदथुः।"[क] स—"नि षदा पीतये मधु"[ख] "शुनं नरः परि षदन्नुषासम्।"[ग] सी—नि षीद होत्रमृतुथा यजस्व।"[घ] "'नि' और 'परि'"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "इमं यम प्रस्तरमा हि सीद।"[ङ] "दकार बाद में होने पर"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "नि समना भूमिः।"[च] "'स्वर' (-वर्ण) बाद में होने पर"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "दिवश्चरन्ति परि सद्यो अन्तान्।"[छ]

टि० (क) परि। यज्ञम्। नि। सेदथुः॥ प० पा०

(ख) नि। सद। पीतये। मधु॥ प० पा०

(ग) शुनम्। नरः। परि। सदन्। उषसम्॥ प० पा०

(घ) नि। सीद। होत्रम्। ऋतुऽथा। यजस्व॥ प० पा०

इन चारों उदाहरणों में पूर्ववर्ती 'नि' और 'परि' ने परवर्ती पदों के आदि सकार को षकार बना दिया है।

(ङ) इमम्। यम। प्रऽस्तरम्। आ। हि। सीद॥ प० पा०

यहाँ 'सीद' का सकार षकार नहीं हुआ है क्योंकि इसके पूर्व में न 'नि' है और न 'परि' अपितु 'हि' है।

(च) यद्यपि पूर्व में 'नि' विद्यमान है तथापि 'समना' का सकार षकार नहीं हुआ है क्योंकि 'स' के बाद में दकार न होकर मकार है।

"नि समना भूमिः" यह उद्धरण न तो ऋग्वेद में उपलब्ध होता है और न किसी अन्य ग्रन्थ में। "वि समना भूमि"—यह उद्धरण तो ऋग्वेद (२।११।१७) में उपलब्ध होता है किंतु यह स्थल प्रकृत सूत्र का उदाहरण नहीं बन सकता है क्योंकि 'स' के पूर्व में 'नि' होना चाहिए, 'वि' नहीं। हो सकता है कि भाष्यकार ने भ्रान्ति से 'वि' को 'नि' समझ कर यह उद्धरण प्रस्तुत किया हो। किसी-किसी हस्तलेख में 'नि' के स्थान पर 'वि' लिखा है और किसी-किसी हस्तलेख में इस प्रत्युदाहरण के स्थान पर "मृग्यं प्रत्युदाहरणम्"—ये शब्द लिखे हुए मिलते हैं।

(छ) दिवः। चरन्ति। परि। सद्यः। अन्तान्॥ प० पा०

यहाँ पर यद्यपि 'सद्यः' के सकार के पूर्व में 'परि' है और बाद में दकार है तथापि सकार षकार नहीं हुआ है क्योंकि दकार के बाद में 'स्वर'-वर्ण नहीं अपितु यकार है।

## सेध स्वापय सस्वजे सस्वजाते ससाद च ॥१५॥

सू० अ०—'सेध', 'स्वापय', 'सस्वजे', 'सस्वजाते' और 'ससाद' (इन पदों के आदि में विद्यमान सकार को भी 'नि' और 'परि' 'मूर्धन्य' बना देते हैं)।

उ० भा०—सेध: स्वापय, सस्वजे, सस्वजाते, ससाद—चकारोच्चारणादेतान्यवादीन्निपरी नमयतः। सेध—"वाचस्पते नि षेधेमान्।"[१-क] स्वापय—"नि ष्वापया मिथूदृशा।"[२-ख] सस्वजे—"तमिन्दुः परि षस्वजे।"[३-ग] सस्वजाते—"समानं वृक्षं परि षस्वजाते।"[४-घ] ससाद—"नि षसाद धृतव्रतः॥"[५-ङ]

उ० भा० अ०—सेध, स्वापय, सस्वजे, सस्वजाते, ससाद—(सूत्र में) चकार के उच्चारण से (यह अर्थ हुआ कि) इन पदों के आदियों (=सकार) को 'नि' और 'परि' 'मूर्धन्य' बना देते हैं। ............।

## सन्तं सन्तः सन्ति पूर्वीः स्थु स्था स्थादिति चोत्तरः ॥१६॥

सू० अ०—(इन 'नि' और 'परि' में से) बाद वाला (अर्थात् 'परि') 'सन्तम्', 'सन्तः', 'सन्ति पूर्वीः', 'स्थुः', 'स्थाः' और 'स्थात्'—इन (पदों के सकार को षकार बना देता है)।

उ० भा० - सन्तम्, सन्तः, सन्ति पूर्वीः, स्थुः, स्थाः, स्थात् इति च पदादिसकारान् उत्तरो नामी नमयति। कश्चोत्तरः? पाठक्रमेण परीति। सन्तम्—"अस्मे वत्सं परि षन्तं न विन्दन्।"[६-च] सन्तः—"नाद्रयः परि षन्तो वरन्त।"[७-छ] सन्ति पूर्वीः—"ता ईं विश्वतः परि षन्ति पूर्वीः।"[८-ज] पूर्वीः इति किम्? "वक्षोर्न वाताः परि सन्त्यच्युताः।"[९-झ] स्थुः—

टि० (क) वाचः। पते। नि। सेध। इमान्॥ प० पा०
(ख) नि। स्वापय। मिथुऽदृशा॥ प० पा०
(ग) तम्। इन्दुः। परि। सस्वजे॥ प० पा०
(घ) समानम्। वृक्षम्। परि। सस्वजाते इति॥ प० पा०
(ङ) नि। ससाद। धृतऽव्रतः॥ प० पा०
पूर्ववर्ती 'नि' और 'परि' ने सूत्रोक्त पदों के आदि सकार को षकार बना दिया है।
(च) अस्मे इति। वत्सम्। परि। सन्तम्। न। विन्दन्॥ प० पा०
(छ) न। अद्रयः। परि। सन्तः। वरन्त॥ प० पा०
(ज) ताः। ईम्। विश्वतः। परि। सन्ति। पूर्वीः॥ प० पा०
(झ) वक्षोः। न। वाताः। परि। सन्ति। अच्युताः॥ प० पा०
उदाहरण में 'पूर्वीः' बाद में होने के कारण 'सन्ति' का सकार षकार हो गया है जब कि प्रत्युदाहरण में 'पूर्वीः' बाद में न होने के कारण 'सन्ति' का सकार षकार नहीं हुआ है।

[१] ऋ० १०।१६६।३ [२] ऋ० १।२९।३ [३] ऋ० ९।१२।५
[४] ऋ० १।१६४।२० [५] ऋ० १।२५।१० [६] ऋ० १।७२।२
[७] ऋ० ३।३२।१६ [८] ऋ० ९।८९।५ [९] ऋ० १०।११५।४

"अर्णो न द्वेषो धृषता परि ष्ठुः।"[१-क] स्थाः—"परि ष्ठा इन्द्र मायया।"[२-ख] स्थात्—"मा नो मर्तस्य दुर्मतिः परि ष्ठात्॥"[३-ग]

उ० भा० अ० - सन्तम्, सन्तः, सन्ति पूर्वीः, स्थुः, स्थाः, स्थात्—इति च=इन पदों के भी, आदि सकारों को; उत्तरः—बाद वाला; 'नामि'—पद 'मूर्धन्य' बना देता है। बाद वाला कौन है ? (उत्तर) पाठ-क्रम से (जो बाद में स्थित है अर्थात्) 'परि'; (तात्पर्य यह है कि 'परि' यह 'नामि'—पद सूत्रोक्त पदों के सकार को षकार बना देता है)।······।

हि षिञ्च तू षिञ्च रजःसु षीद-
न्नितो षिञ्चताभि षतः किमु ष्वित्।
सूरिभिष्ष्याम दिवि षन्तु के ष्ठ
प्रति ष्फुर त्री षधस्था कमु ष्वित्॥१७॥

सू० अ०—(अधोलिखित स्थलों पर सकार निपातन से षकार हुआ है) 'हि षिञ्च', 'तू षिञ्च', 'रजःसु षीदन्', 'इतो षिञ्चत', 'अभि षतः', 'किमु ष्वित्', 'सूरिभिष्ष्याम', 'दिवि षन्तु', 'के ष्ठ', 'प्रति ष्फुर', 'त्री षधस्था' (और) 'किमु ष्वित्'।

उ० भा०—हि षिञ्च, तू षिञ्च, रजःसु षीदन्, इतो षिञ्चत, अभि षतः, किमु ष्वित्, सूरभिष्ष्याम, दिवि षन्तु, के ष्ठ, प्रति ष्फुर, त्री षधस्था, कमु ष्वित्—एतानि यथागृहीतानि निपात्यन्ते। हि षिञ्च—"अध्वर्यवा तु हि षिञ्च।"[४-घ] तू षिञ्च—"आ तु षिञ्च हरिमीं द्रोरुपस्थे।"[५-ङ] रजःसु षीदन्—"बुध्ने नदीनां रजःसु षीदन्।"[६-च] इतो षिञ्चत—"परीतो षिञ्चता सुतम्"[७-छ]–ओत्वं षत्वं च निपात्यते।

टि० (क) अर्णः। न। द्वेषः। धृषता। परि। स्थुः॥ प० पा०

(ख) परि। स्थाः। इन्द्र। मायया॥ प० पा०

(ग) मा। नः। मर्तस्य। दुःऽमतिः। परि। स्थात्॥ प० पा०

(घ) अध्वर्यो इति। आ। तु। हि। सिञ्च॥ प० पा०

(ङ) आ। तु। सिञ्च। हरिम्। ईम्। द्रोः। उपऽस्थे॥ प० पा०

(च) बुध्ने। नदीनाम्। रजःसु। सीदन्॥ प० पा०

(छ) परि। इतः। सिञ्चत। सुतम्॥ प० पा०

४।३४ के अनुसार 'इतः' का विसर्जनीय अविकृत रहता है जिससे संहिता-पाठ में "इतः सिञ्चत" रूप होना चाहिए किंतु यहाँ निपातन से 'इतः' का विसर्जनीय ओकार हो गया है और 'सिञ्चत' का सकार षकार हो गया है जिससे संहिता-पाठ में उपलब्ध "इतो षिञ्चत" रूप सम्पन्न हो गया है।

---

[१] ऋ० १।१६७।९ [२] ऋ० ४।३०।१२ [३] ऋ० ३।१५।६
[४] ऋ० ८।३२।२४ [५] ऋ० १०।१०१।१० [६] ऋ० ७।३४।१६
[७] ऋ० ९।१०७।१

अभि षतः—"महो विश्वाँ अभि षतः"[१-क]; अभी षतस्तदाभर।"[२-ख]

उ० भा० अ०—हि षिञ्च, तू षिञ्च, रजःसु षीदन्, इतो षिञ्चत, अभि षतः, किमु ष्वित्, सूरिभिष्ष्याम, दिवि षन्तु, के ष्ठ, प्रति ष्फुर, त्री षधस्था (और) कमु ष्वित्—ये (द्वैपद या त्रैपद) जैसे (सूत्र में) उल्लिखित हैं वैसे (संहिता-पाठ में) निपातन से उपलब्ध होते हैं।.........। (विसर्जनीय का) ओकार तथा (सकार का) षकार—ये दोनों निपातन से होते हैं। अभि षतः—"महो विश्वाँ अभि षतः"; "अभी षतस्तदा भर।"

नन्वभि षत इति निपातनं च यथाश्रुतमेव ग्रहीतुं न्याय्यम्। अतः—"अभी षतस्तदा भर"[३]—इत्यत्र षत्वं न प्राप्नोत्यभिशब्दस्य दीर्घत्वात्। सत्यमेवमेतत् यदि नामाधस्तादेव परिभाषितं यथा सामवशाः संधयो नियतविषयापवादका भवन्ति, न तु सर्वत्र। सामवशा इति चैवापवादाञ्जानीयादनुलोमानामन्वक्षरसंधीनां नान्येषां केषाञ्चिदिति। तथा च ज्ञापकं भवति—"नु ष प्र"[४] इति। "भसन्नु ष प्र पूर्व्यः"[५] इत्युदाहरणम्। अत्र प्रेति यद्विशेषणं तत्—"प्र नू स मर्तः शवसा"[६]—इत्यस्य निर्धारणार्थम्। यदि नुशब्दो दीर्घोऽपि विघातं षत्वस्य न कुर्यात्तदा प्रशब्दग्रहणं सार्थकं स्यादिति। तस्मात्सामवशाः संधयोऽपवादका अनुलोमानामन्वक्षरसंधीनां नान्यत्रेति सिद्धम्।

(ख) जनि। अभिवृताऽइव। श्रथय ॥ प० पा०

(ग) 'जनि' में दीर्घत्व नहीं हुआ है क्योंकि बाद में 'पूर्व्यः' नहीं है।

(घ) सह्न्। सहाः। नक्तोषसा। उषसम् ॥ प० पा०

(ङ) प्रऽसहम् ॥ प० पा० ॥ १।२७ का अपवाद। एकाक्षर पद 'प्र' पूर्व में होने पर भी 'सह' का प्रथम 'अक्षर' 'दीर्घ' हो गया है।

(च) 'प्रासहम्' (प्रऽसहम् ॥ प० पा०) में दीर्घत्व नहीं हुआ है क्योंकि इसके पूर्व में 'जहृंषन्त' नहीं है।

(छ) 'उषसम्' में दीर्घत्व नहीं हुआ है क्योंकि इसके पूर्व में 'सूर्यम्' नहीं है।

[१] ऋ० ८।१८।१३ [२] ऋ० ८।७।३६ [३] ऋ० १।१४१।१
[४] ऋ० १०।७३।२ [५] ऋ० २।२८।५ [६] ऋ० ६।७३।२
[७] ऋ० ८।२०।२० [८] १।२७ [९] ऋ० ६।१७।४
[१०] ऋ० १।१२९।४ [११] ऋ० १।१३।७ [१२] ऋ० ७।९९।४
[१३] ऋ० ७।४४।१

इति कस्मात् ? "येभिः सूर्यमुषसं[क] मन्दसानः।"[१] परिरापः—"बृहस्पते वि परिरापो[ख] अर्दय।"[२] सूनृते जारयन्ती—"रेवत्स्तोत्रे सूनृते जारयन्ती[ख]।"[३] सूनृते इति कस्मात् ? "जरयन्ती[ग] वृजनं पद्वत्।"[४] शुश्रूयातम्—"शुश्रूयात[ख]-मिमं हवम्।"[५] यूयुविः—"द्विषो युयोतु यूयुविः[ख]।"[६] सादना ते—"तेऽत्रा यमः सादना[ख] ते मिनोतु।"[७] ते इति कस्मात् ? "पितृभ्य आ सदने[घ] जोहुवाना॥"[८]

उ० भा० अ०—साह्वन्.........सादना ते—इनमें भी दीर्घत्व हुआ है।.........।

करन्सुषाहा घृतवान्ति साह्वा-
नृजूयेव सूयवसाद् वृषाय।
उषासानक्ता पृथुजाघने च
राथ्येभी रीरिषत ग्लापयन्ति॥४६॥

सू० अ०—(अधोलिखित में भी दीर्घत्व हुआ है)—'करन् सुषाहा', 'घृतवान्ति', 'साह्वान्', 'ऋजूयेव', 'सूयवसात्', 'वृषाय', 'उषासानक्ता', 'पृथुजाघने', 'राथ्येभिः', 'रीरिषत' (और) 'ग्लापयन्ति'।

उ० भा०—करन्सुषाहा, घृतवान्ति, साह्वान्, ऋजूयेव, सूयवसात्, वृषाय, उषासानक्ता, पृथुजाघने च, राथ्येभिः, रीरिषत, ग्लापयन्ति—इत्येते च प्लवन्ते। करन्सुषाहा इति—"एकाक्षरचर्षणिधन्ववर्जम्" इति निषेधे प्राप्ते। करन्सुषाहा—"करन्सुषाहा[ङ] विथुरं न शवः।"[९] करन् इति कस्मात् ? "सुषहा[च] सोम तानि ते।"[१०] घृतवान्ति—"अव द्रोणानि घृतवान्ति[छ] सीद।"[११] साह्वान्—"साह्वा[छ]-न्विश्वा अभियुजः।"[१२] ऋजूयेव—"विशं न विष्टामृजूयेव[छ] यन्ता।"[१३] सूयवसात्—"सूयवसा[छ]-द्भगवती हि भूयाः।"[१४] वृषाय—

टि० (क) 'उषसम्' में दीर्घत्व नहीं हुआ है क्योंकि इसके बाद में 'अग्निम्' नहीं है।
(ख) परिऽरपः। जरयन्ती। शुश्रुयातम्। युयुविः। सदना॥ प० पा०
(ग) 'जरयन्ती' में दीर्घत्व नहीं हुआ है क्योंकि इसके पूर्व में 'सूनृते' नहीं है।
(घ) 'सदने' में दीर्घत्व नहीं हुआ है क्योंकि बाद में 'ते' नहीं है।
(ङ) सुऽसहा॥ प० पा०॥ ९।२७ का अपवाद। एकाक्षर पद 'सु' पूर्व में होने पर भी 'सह' का प्रथम 'अक्षर' 'दीर्घ' हो गया है।
(च) 'सह' में दीर्घत्व नहीं हुआ है क्योंकि इसके पूर्व में 'करन्' नहीं है।
(छ) घृतऽवन्ति। सह्वान्। ऋजुयाऽइव। सुयवसऽअत्॥ प० पा०

[१] ऋ० ६।१७।५ [२] ऋ० २।२३।१४ [३] ऋ० १।११२४।१०
[४] ऋ० १।४८।५ [५] ऋ० ५।७४।१० [६] ऋ० ५।५०।३
[७] ऋ० १०।१८।१३ [८] ऋ० ५।४७।१ [९] ऋ० १।१८६।२
[१०] ऋ० ९।२९।३ [११] ऋ० ९।९६।१३ [१२] ऋ० ३।११।६
[१३] ऋ० १।१८३।५ [१४] ऋ० १।१६४।४०

"स पर्जन्यं शंतनवे वृषाय[क] ।"[१] उषासानक्ता—"उषासानक्ता[क] बृहती सुपेशसा ।"[२] पृथुजाघने च—"पृथुष्टो पृथुजाघने[क] ।"[३] चकारः समुच्चयार्थः । राथ्येभिः—"अथो ह त्यो रथ्या राथ्येभिः[क] ।"[४] रीरिषत—"मा नो मघ्या रीरिषता[क]-युर्गन्तोः ।"[५] ग्लापयन्ति—"ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति[क] ॥"[६]

उ० भा० अ०—करत्सुषाहा......ग्लापयन्ति—इनमें भी दीर्घत्व हुआ है ।......।

अध्वानयद्रीरिषत्प्रावणेभी
रथीयन्तीवादमायः ससाहे ।
सासाह यूयुधिरिवाश्रथायः
पूरुषघ्नं रोरिषः पूरुषादः ॥५०॥

सू० अ०—(अधोलिखित में भी दीर्घत्व हुआ है)—'अध्वानयत्', रीरिषत्', 'प्रावणेभिः', 'रथीयन्तीव', 'अदमायः', 'ससाहे', 'सासाह', यूयुधिरिव', 'अश्रथायः', 'पूरुषघ्नम्', 'रीरिषः' (और) 'पूरुषादः' ।

उ० भा०—अध्वानयत्, रीरिषत्, प्रावणेभिः, रथीयन्तीव अदमायः, ससाहे, सासाह, यूयुधिरिव, अश्रथायः, पूरुषघ्नम्. रोरिषः, पूरुषादः—इत्येतानि प्लवन्ते । अध्वानयत्—"अध्वानयद्[ख] दुरिता दम्भयच्च ।"[७] रीरिषत्—"मा च हा मा च रीरिषत्[ख] ।"[८] प्रावणेभिः—'प्रावणेभिः[ख] सजोषसः ।"[९] रथीयन्तीव—"रथीयन्तीव[ख] प्र जिहीत ओषधिः ।"[१०] अदमायः—'त्वं ह नु त्यददमायो[ख] दस्यून्।"[११] ससाहे इतीह च—"ससाहे यवया वधम्"[१२] इत्यत्र च द्विः कस्मान्निपात्यते ? श्रावयादिप्लुतेः प्रतिषेधार्थं तत्र । द्वितीयस्य प्लुतिविधानार्थमिह[ग]। ससाहे—"ससाहे[ख] शक्रः पृतना अभिष्टिः ।"[१३] सासाह—"सासाह[ख] यो युधा नृभिः ।"[१४] यूयुधिरिव—"गावइव ग्रामं यूयुधिरिवा[ख]-श्वान् ।"[१५] अश्रथायः—"सतीनमन्युरश्रथायः[ख] ।"[१६] पूरुषघ्नम्—'आरे ते गोघ्नमुत पूरुषघ्नम्[ख] ।"[१७] रीरिषः—"मा नो गोषु मानो अश्वेषु रीरिषः[ख] ।"[१८] पूरुषादः—"ततो वयः प्र पतान्पूरुषादः[ख] ॥"[१९]

टि० (क) वृपय । उषसानक्ता । पृथुऽजघने । रथ्येभिरिति रथ्येभिः । रिरिषत । ग्लपयन्ति ॥ प० पा०

(ख) अध्वनयत् । रिरिषत् । प्रवणेभिः । रथियन्तिऽइव । अदमयः । ससहे । ससाह । युयुधिःऽइव । अश्रथयः । पुरुषऽघ्नम् । रिरिषः । पुरुषऽअदः ॥ प० पा०

[१] ऋ० १०।९८।१ [२] ऋ० १०।३६।१ [३] ऋ० १०।८६।८ [४] ऋ० १।१५७।६
[५] ऋ० १।८९।९ [६] ऋ० १।१६४।१० [७] ऋ० ६।१८।१०
[८] ऋ० ३।५३।२० [९] ऋ० ३।२२।४ [१०] ऋ० १।१६६।५
[११] ऋ० ६।१८।३ [१२] ९।४५ [१३] ऋ० १०।१०४।१०
[१४] ऋ० ५।२५।६ [१५] ऋ० १०।१४९।४ [१६] ऋ० १०।११२।८
[१७] ऋ० १।११४।१० [१८] ऋ० १।११४।८ [१९] ऋ० १०।२७।२२

उ० भा० अ०—अध्वानयत्·········पूरुषाद:—इनमें दीर्घत्व हुआ है।·········।
(पू०) 'ससाहे' इस (पद) का यहाँ (=प्रस्तुत सूत्र में) भी और "ससाहे यवया वधम्"—(९।४५) यहाँ पर भी—दो वार निपातन किसलिए किया गया है? (सि०) (९।३२ में विहित) आवयादि दीर्घत्व के प्रतिषेध के लिए वहाँ (९।४५ में) (निपातन किया गया है)। द्वितीय ('अक्षर') के दीर्घत्व के विधान के लिए यहाँ (निपातन किया गया है)।······।

अपूरुषं जाहृषाणेन रीषत
ऋतायुभी रथीनां साहिषीमहि।
पवीतारः कियात्ये पूरुषत्वत
ऋतावरीरिव हव्यानि गामय ॥५१॥

सू० अ०—(अधोलिखित में भी दीर्घत्व हुआ है)—'अपूरुषम्', 'जाहृषाणेन', 'रीषते', 'ऋतायुभिः', 'रथीनाम्', 'साहिषीमहि', 'पवीतारः', 'कियात्या', 'ई पूरुषत्वता', 'ऋतावरीरिव' (और) 'हव्यानि गामय'।

उ० भा० - अपूरुषम्, जाहृषाणेन, रीषते, ऋतायुभिः, रथीनाम्, साहिषीमहि, पवीतारः, कियात्या, ई पूरुषत्वता, ऋतावरीरिव, हव्यानि, गामय—इत्येतानि च प्लवन्ते। अपूरुषम्—"सिन्धोः पारे अपूरुषम्[क]।"[१] जाहृषाणेन—"यो व्यंसं जाहृषाणेन[क]।"[२] रीषते—"मा रीषते[क] सहसावन्।"[३] ऋतायुभिः—"पवमान ऋतायुभिः[क]।"[४] रथीनाम्—"रथीतमं रथीनाम्[क]।"[५] साहिषीमहि—"वीळु चित्साहिषीमहि[क]।[६] पवीतारः—"पवीतारः[क] पुनीतन।"[७] कियात्या—"अहरहर्यात्यक्तुरपां किया[क]-त्या।"[८] एष आकारः प्रत्युदाहरणार्थो यदन्यदस्ति कियतीति ह्रस्वान्तम्। अथ नास्ति ततो विशेषणार्थः। "कियती योषा"[९] इत्येतदप्याकारेऽक्रियमाणे सांशयिकं स्यात्। ईकारादि हि परतः प्रतिकण्ठग्रहणं भवति। ई पूरुषत्वता—"दीनैर्दक्षैः प्रभूती पूरुषत्वता[क]।"[१०] ईकारोपधग्रहणं

(५५४ग) 'ससाहे' पद का ग्रहण ९।४५ में और प्रस्तुत सूत्र में किया गया है। इस पद का दो बार ग्रहण क्यों किया गया है? भाष्यकार का उत्तर है कि इस पद को दो बार ग्रहण करने के उद्देश्य भिन्न-भिन्न हैं। ९।३२ के अनुसार 'ससाहे' के प्रथम 'अक्षर' को 'दीर्घ' होना चाहिए किंतु ९।४५ 'ससाहे' के प्रथम 'अक्षर' के 'दीर्घ' होने का निषेध करता है। प्रस्तुत सूत्र 'ससाहे' के द्वितीय सकार के बाद में विद्यमान 'अकार' के दीर्घत्व का विधान करता है। अतः इस पद के दो बार ग्रहण करने में कोई दोष नहीं है।

(क) अपुरुषम्। जहृषाणेन। रिषते। ऋतयुऽभिः। रथिनाम्। सहिषीमहि। पवितारः। कियति। पुरुषत्वता ॥ प० पा०

[१] ऋ० १०।१५५।३ [२] ऋ० १।१०१।२ [३] ऋ० १।१८९।५
[४] ऋ० ९।३।३ [५] ऋ० १।११।१ [६] ऋ० ८।४०।१
[७] ऋ० ९।४।४ [८] ऋ० २।३०।१ [९] ऋ० १०।२७।१२
[१०] ऋ० ४।५४।३

किमयंम् ? "न तस्य विश्म पुरुषत्वता[क] वयम् ।"[१] ऋतावरीरिव—"ऋतावरीरिव[ख] संक्रोशमानाः ।"[२] हव्यानि गामय—"तत्र हव्यानि गामय[ख] ।"[३] हव्यानि इति कस्मात् ? "अपरं गमया[ग] तमः ॥"[४]

उ० भा० अ०—अपूरुषम्·········गामय—इनमें भी दीर्घत्व हुआ है ।·········। ('कियात्या' में) यह आकार प्रत्युदाहरण के लिए है जो 'ह्रस्व' (इकार) में अन्त होने वाला अन्य 'कियति' है। यदि (ऐसा अन्य 'कियति' संहिता में) न हो तो (यह आकार) ('कियति' के) विशेषण के लिए है। यदि (सूत्र में 'कियति' के बाद में) आकार का ग्रहण न किया जाता तो "कियती योषा"—यह भी संशय से युक्त हो जाता क्योंकि (सूत्र में) परवर्ती निपातन का ग्रहण ईकार से प्रारम्भ करके किया गया है ।[घ]·········।

**वृषायस्व प्रसवीता ससाहिषे**
**तातृपाणा तातृपिं सादनस्पृशः ।**
**साह्यामेयान्तिं पशुमान्ति जागृधुः**
**पवीतारं सूर्य्यमुषासमीमहे ॥५२॥**

सू० अ०—(अधोलिखित में भी दीर्घत्व हुआ है)—'वृषायस्व', 'प्रसवीता', 'ससाहिषे', 'तातृपाणा', 'तातृपिम्', 'सादनस्पृशः', 'साह्याम', 'इयान्ति', 'पशुमान्ति', 'जागृधुः', 'पवीतारम्', और 'सूर्यमुषासमीमहे' (='सूर्यम्' पूर्व में और 'ईमहे' बाद में हो तो 'उषासम्') ।

टि० (क) 'पुरुषत्वता' का प्रथम उकार 'दीर्घ' नहीं हुआ है क्योंकि पूर्व में 'ई' नहीं है ।
(ख) ऋतवरीःऽइव । गमय ॥ प० पा०
(ग) 'गमय' का प्रथम अकार 'दीर्घ' नहीं हुआ है क्योंकि पूर्व में 'हव्यानि' नहीं है ।
(घ) सूत्र में 'कियति' के बाद में 'आ' का ग्रहण यह बतलाने के लिए किया गया है कि बाद में 'आ' न हो तो 'कियति' में दीर्घत्व नहीं होता है । यदि कोई ऐसा स्थल संहिता में न मिले जहाँ 'कियति' के बाद में 'आ' न हो तब सूत्र में 'आ' का ग्रहण इस वस्तुस्थिति को बतलाता है—'आ' बाद में होने पर ही 'कियति' में दीर्घत्व होता है । यदि सूत्र में 'कियति' के बाद में 'आ' न रखा जाता तो सूत्र में उल्लिखित परवर्ती 'ई' के साथ मिलकर 'कियति' का 'कियती' ('कियाती') हो जाता । तब यह जानना कठिन हो जाता कि सूत्रोक्त पद 'कियति' है या 'कियती' । इससे "कियती योषा" जैसे स्थलों में भी 'कियती' (के 'य') के 'दीर्घ' होने का प्रसङ्ग उपस्थित हो जाता । इस संशय की निवृत्ति के लिए ही सूत्र में 'कियति' के बाद में 'आ' रखा गया है । (प्रश्न) इस सूत्र में 'कियति' के बाद आकार लगाने पर संधि में 'कियात्या' होगा । फिर भी संशय हो सकता है कि यह 'कियात्या'='कियति+आ' है अथवा 'कियती+आ' है । यदि 'कियती+आ' हो तो यहाँ भी 'कियाती' होगा या नहीं ? (उत्तर) संहिता में 'कियती+आ' नहीं मिलता है । अतः 'कियती+आ' में दीर्घत्व का संशय नहीं होता है ।

---

[१] ऋ० ५।४८।५ [२] ऋ० ४।१८।६ [३] ऋ० ५।५।१० [४] ऋ० १०।१५२।४

उ० भा०—वृषायस्व, प्रसवीता, ससाहिषे, तातृपाणा, तातृपिम्, सादनस्पृशः, साह्याम, इयान्ति, पशुमान्ति, जागृधुः, पवीतारम्, सूर्यमुषासमीमहे—इत्येतानि च प्लवन्ते। वृषायस्व —"वृषायस्वायूया वाहुभ्याम्।"[१] प्रसवीता —"उद्वेति प्रसवीता[क] जनानाम्।"[२] ससाहिषे इत्यस्याप्युभयत्र निपातने प्रयोजनं पूर्ववद् द्रष्टव्यम्। ससाहिषे —"प्र ससाहिषे[क] पुरुहूत।"[३] तातृपाणा —"तावेवेदं तातृपाणा[क]।"[४] तातृपिम् —"पिबा वृषस्व तातृपिम्[क]।"[५] सादनस्पृशः—"मा नो निर्भाग्वसुनः सादनस्पृशः[क]।"[६] साह्याम—"साह्याम[क] दासमार्यम्।"[७] इयान्ति —"गन्तेयान्ति[क] सवना हरिभ्याम्।"[८] पशुमान्ति —"परि सद्मेव पशुमान्ति[क] होता।"[९] जागृधुः—"निरामिणो रिपवोऽन्नेषु जागृधुः[क]।"[१०] पवीतारम्—"अवन्त्यस्य पवीतार[क]-माशवः।"[११] सूर्यमुषा-समीमहे—"अनागास्त्वं सूर्यमुषा[क]-समीमहे।"[१२] सूर्यम् इति किम्? "दधिक्रां वः प्रथममश्विनोषसम्[ख]।"[१३] ईमहे इति किम्? "येभिः सूर्यमुषसं[ख] मन्दसानः॥"[१४]

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्रउवटकृतौ
प्रातिशाख्यभाष्ये नवमं पटलम्॥
॥ प्रातिशाख्यार्धम्॥

उ० भा० अ०—वृषायस्व ...... सूर्यमुषासमीमहे—इनमें भी दीर्घत्व हुआ है। .........। ससाहिषे—इसके भी दो बार निपातन में प्रयोजन पूर्ववत (अर्थात् ९।४५ तथा ९।५० में उल्लिखित 'ससाहे' की भाँति) समझना चाहिए।[ग].........।

आनन्दपुर निवासी वज्रट के पुत्र उवट की कृति पार्षदव्याख्यात्मक
प्रातिशाख्यभाष्य में नवम पटल समाप्त हुआ।
आधा प्रातिशाख्य समाप्त हुआ।

टि० (क) प्रऽसविता। ससहिषे। ततृपाणा। ततृपिम्। सदनऽस्पृशः। सह्याम। इयन्ति। पशुऽमन्ति। जगृधुः। पवितारम्। उषसम्॥ प० पा०

(ख) 'उपसम्' में दीर्घत्व तभी होता है जब इसके पूर्व में 'सूर्यम्' हो और बाद में 'ईमहे' हो। यह शर्त पूरी न होने के कारण इन दोनों स्थलों पर 'उषसम्' में दीर्घत्व नहीं हुआ है।

(ग) 'ससाहिषे' पद का ग्रहण दो सूत्रों (९।४३ और ९।५२) में भिन्न-भिन्न उद्देश्य से किया गया है। दोनों स्थलों पर ९।३२ के अनुसार 'ससाहिषे' के प्रथम 'अक्षर' को 'दीर्घ' होना चाहिए किंतु ९।४३ में 'ससाहिषे' के प्रथम 'अक्षर' के 'दीर्घ' होने का निषेध कर दिया गया है। प्रस्तुत सूत्र का सम्बन्ध 'ससाहिषे' के प्रथम 'अक्षर' के साथ नहीं है। यह सूत्र तो द्वितीय सकार के बाद में विद्यमान अकार के दीर्घत्व का विधान करता है। इस प्रकार इस पद के दो बार ग्रहण करने में कोई दोष नहीं है।

---

[१] प्रै० पृ० १४६ [२] ऋ० ७।६३।२ [३] ऋ० १०।१८०।१ [४] ऋ० १०।९५।१६
[५] ऋ० ३।४०।२ [६] ऋ० ९।७२।८ [७] ऋ० १०।८३।१ [८] ऋ० ६।२३।४
[९] ऋ० ९।९२।६ [१०] ऋ० २।२३।१६ [११] ऋ० ९।८३।२ [१२] ऋ० १०।३५।२
[१३] ऋ० ७।४४।१ [१४] ऋ० ६।१७।५

## १० : क्रम-पटलम्

क्रमपाठस्य अधिकारसूत्रम्

क्रमपाठस्य सामान्यनियमः

क्रमपाठेऽनवसानीयपदानि

क्रमपाठे विकृतरूपविषयकनियमौ

क्रमपाठे पदविशेषाणां परिग्रहः

उपस्थितसंज्ञा

स्थितसंज्ञा

स्थितोपस्थितसंज्ञा

परिग्रहविषयेऽन्ये नियमाः

क्रमपाठेऽर्धर्चयोः संधिनिषेधः

क्रमपाठे समयैः सह संधेः प्रकारः

परिग्रहे संधिविशेषाणां प्रकृतिभावः

( क्रमपाठस्य अधिकारसूत्रम् )

**क्रमः ॥१॥**

( क्रम-पाठ का अधिकार-सूत्र )

सू० अ०—(अब) क्रम-पाठ (प्रारम्भ किया जाता है)।

उ० भा०—क्रमःइत्यधिकारो वेदितव्यो यदित ऊर्ध्वमनुक्रमिष्यामः ॥

उ० भा० अ०—यहाँ से आगे जो कहेंगे वहाँ क्रम-पाठ का अधिकार जानना चाहिए।[क]

( क्रमपाठस्य सामान्यनियमः )

**(पद्भ्यां) द्वाभ्यामभिक्रम्य प्रत्यादायोत्तरं तयोः ।**
**उत्तरेणोपसंदध्यात्तथार्धर्चं समापयेत् ॥२॥**

( क्रम-पाठ का सामान्य नियम )

सू० अ०—दो (पदों) से प्रारम्भ करके; उन दो (पदों) में से बाद वाले (पद अर्थात् द्वितीय पद) का पुनः ग्रहण करके (इसकी) बाद वाले (पद अर्थात् तृतीय पद) के साथ संधि (मेल) करे। इस प्रक्रिया से आधी ऋचा को समाप्त करे।

उ० भा०—द्वाभ्यां (पद्भ्यां)=पदाभ्याम्; अभिक्रम्य=आरभ्य—इत्यर्थः। तयोः द्वयोरभिक्रान्तयोः उत्तरं पदम्; प्रत्यादाय=पुनर्गृहीत्वा; ताभ्याम् उत्तरेण पदेन उपसंदध्यात्। तथा=एतेन कल्पेन; अर्धर्चं समापयेत्। "पर्जन्याय प्र। प्र गायत। गायत दिवः। दिवस्पुत्राय। पुत्राय मीळ्हुषे। मीळ्हुष इति मीळ्हुषे॥"[१]

उ० भा० अ०—द्वाभ्याम्=दो पदों से; अभिक्रम्य=अभिक्रमण करके=आरम्भ करके—यह अर्थ है। तयोः=जिन दो पदों से प्रारम्भ किया था उनमें से; उत्तरम्=बाद वाले पद का (को); प्रत्यादाय=पुनः ग्रहण करके; (उसकी) उन दोनों से; उत्तरेण=बाद वाले पद के साथ; उपसंदध्यात्=संधि (मेल) करे। तथा=इस प्रक्रिया से; अर्धर्चं समापयेत्=आधी ऋचा को समाप्त करे।[ख] (जैसे) "पर्जन्याय प्र। प्र गायत। गायत दिवः। दिवस्पुत्राय। पुत्राय मीळ्हुषे। मीळ्हुष इति मीळ्हुषे।"[ग]

टि० (क) क्रम-पाठ का अधिकार दशम और एकादश पटलों के सभी सूत्रों में लागू होता है।

(ख) क्रम-पाठ में दो-दो पदों की संधि (मेल) होती है। अर्धर्च के प्रारम्भ वाले दो पदों का पहला वर्ग बनाया जाता है। तत्पश्चात् उस पहले वर्ग के द्वितीय पद और अर्धर्च के तृतीय पद को मिलाकर द्वितीय वर्ग बनाया जाता है। इस प्रक्रिया से आधी ऋचा को पूरा किया जाता है। फिर दूसरी आधी ऋचा के उसी प्रकार वर्ग बनाये जाते हैं।

(ग) पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे॥ सं० पा०
पर्जन्याय। प्र। गायत। दिवः। पुत्राय। मीळ्हुषे॥ प० पा०
पर्जन्याय प्र। प्र गायत। गायत दिवः। दिवस्पुत्राय। पुत्राय मीळ्हुषे। मीळ्हुष इति मीळ्हुषे॥ क्र० पा०

---

[१] ऋ० ७।१०२।१

( क्रमपाठेऽनवसानीयपदानि )

एकवर्णमनोकारं नते सु स्मेति नःपरे ।
पदेन च व्यवेतं यत्पदं तच्च व्यवायि च ॥
ईं लुप्तान्तं प्लुतादीनि स्कम्भनेनेति लुप्तवत् ।
इतो षिश्नतावर्तमः पूर्वं द्वैपदयोर्द्वयोः ॥
स्वसारमस्कृतेत्युभे परं वीरास एतन ।
अतीत्यैतान्यवस्यन्ति ॥३॥

( क्रम-पाठ में अवसान में न आने वाले पद )

सू० अ०—(आचार्य लोग) इन (अधोलिखित) का अतिक्रमण करके (इनसे बाद वाले पदों से क्रम-वर्गों का) अवसान करते हैं—(१) ओकार के अतिरिक्त एक वर्ण ('अक्षर') वाला (पद); (२) 'मूर्धन्यभाव' ('नति') को प्राप्त 'सु' और 'स्म' (ये दो पद) यदि (इनके) बाद में 'नः' (पद) हो; (३) (किसी अन्य) पद के द्वारा पृथक् किया गया जो पद है वह भी और पृथक् करने वाला (पद) भी; (४) 'ईम्' जब इसका अन्त (=अन्तिम वर्ण=मकार) लुप्त हो जाता है; (५) (वे पद) जिनके आदि (=प्रथम 'अक्षर') दीर्घत्व ('प्लुति') को प्राप्त हो जाते हैं; (६) 'स्कम्भनेन' जब (इसका सकार) लुप्त हो जाता है; (७) 'इतो षिश्नत' और 'आवर्तमः'–इन दो द्वैपदों के प्रथम (पद); (८) 'स्वसारमस्कृत'—ये दोनों पद और (९) 'वीरास एतन' में बाद वाला (पद) ।[क]

उ० भा०–एकवर्णम्=पदमेकाक्षरम्–इत्यर्थः । (अनोकारम्=) ओकारं वर्जयित्वा= आ ॐ इति इत्येते पदे; अतीत्यावस्यन्ति । "आ मन्द्रम् । मन्द्रमा वरेण्यम् ।"[१] "उद्धेति ।"[२] "उदु त्यम् । ॐ इत्यूं । त्यं जातवेदसम् ।"[३] अनोकारम् इति कस्मात् ? "अभूदो ।"[४]

उ० भा० अ०—(अनोकारम्=) ओकार को छोड़कर; एकवर्णम्=एक वर्ण वाले (पद) का (को)=एक 'अक्षर' वाले पद का (को)='आ' (और) 'ॐ'—इन दो पदों[ख] का (को); अतीत्यावस्यन्ति=अतिक्रमण करके (इनसे बाद वाले पद से क्रम-वर्ग का) अवसान करते हैं; (अर्थात् 'आ' और 'ॐ' को क्रम-वर्ग के अन्त में नहीं रखा जाता है) ।

टि० (क) प्रस्तुत सूत्र (१०।३) पूर्ववर्ती सूत्र (१०।२) का अपवाद है । इस सूत्र में उन पदों को बतलाया गया है जो क्रम-वर्ग के अन्त में स्थित नहीं हो सकते हैं । इन पदों को पूर्ववर्ती तथा परवर्ती पदों के मध्य में रखा जाता है । इन सभी स्थलों पर दो से अधिक पदों का एक क्रम-वर्ग बनता है ।

(ख) ऋग्वेद में एकाक्षर पद तीन हैं—आ, ॐ और ओ । प्रस्तुत सूत्र के अनुसार 'ओ' क्रम-वर्ग के अन्त में स्थित हो सकता है किंतु 'आ' और 'ॐ' क्रम-वर्ग के अन्त में स्थित नहीं हो सकते हैं ।

---

[१] ऋ०क० ९।६५।२९ [२] ऋ०क० ७।६३।२ [३] ऋ०क० १।५०।१ [४] ऋ०क० १।११३।११

(उदाहरण) "आ मन्द्रम् । मन्द्रमा वरेण्यम् ।"[क] "उद्वेति ।"[ख] "उदु त्यम् । ऊँ इत्यूँ । त्यं जातवेदसम् ।"[ग] "ओकार को छोड़कर"-- यह (सूत्र में) क्यों (कहा) ? (उत्तर) "अभूदो ।"[घ]

उ० भा०—**नते सु स्मेति नःपरे**—नते=षत्वभूते; सु स्म इत्येते नःपरे; अतीत्यावस्यन्ति । "मो षु णः ।"[१] "आसु ष्मा णः ।"[२] नते इति कस्मात् ? "प्र सू न आयुर्जीवसे ।"[३] "इन्द्र सूरीन्कृणुहि स्मा नो अर्धम् ।"[४] नःपरे इति कस्मात् ? "मो षु त्वा वाघतश्चन ।"[५] "त्वं हि ष्मा च्यावयन्नच्युतानि ।"

उ० भा० अ०—**नते सु स्मेति नःपरे**—नते='मूर्धन्यभाव' ('नति') को प्राप्त='षत्व' को प्राप्त; 'सु' और 'स्म' के बाद में 'नः' होने पर इनका (अर्थात् 'सु' और 'स्म' का); **अतीत्यावस्यन्ति**=अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं; (अर्थात् 'सु' और 'स्म' को क्रम-वर्ग के अन्त में नहीं रखा जाता है यदि (१) 'सु' और 'स्म' का सकार 'मूर्धन्य' (=षकार) हो गया हो और (२) 'सु' और 'स्म' के बाद में 'नः' हो) । (उदाहरण) "मो षु णः ।"[ङ] "आसु ष्मा णः ।"[च] "'मूर्धन्यभाव' ('नति') को प्राप्त"—

टि० (क) आ मन्द्रमा वरेण्यम् ॥ सं० पा० ॥ आ । मन्द्रम् । आ । वरेण्यम् ॥ प० पा०
आ मन्द्रम् । **मन्द्रमा वरेण्यम्** ॥ क्र० पा०

१०।२ के अनुसार "मन्द्रमा"—यह क्रम-वर्ग होना चाहिए था किंतु १०।३ के अनुसार 'आ' क्रम-वर्ग के अन्त में स्थित नहीं हो सकता है । अतः दो पदों के क्रम-वर्ग के स्थान पर तीन पदों का क्रम-वर्ग बना है ।

(ख) उद्वेति ॥ सं० पा० ॥ उत् । ऊँ इति । एति ॥ प० पा० ॥ उद्वेति ॥ क्र० पा०

(ग) उदु त्यं जातवेदसम् ॥ सं०पा० ॥ उत् । ऊँ इति । त्यम् । जातऽवेदसम् ॥ प०पा०
उदु त्यम् । ऊँ इत्यूँ । त्यं जातवेदसम् ॥ क्र० पा०

'ऊँ' क्रम-वर्ग के अन्त में स्थित नहीं हो सकता है । अतः दोनों ही स्थलों पर तीन-तीन पदों के क्रम-वर्ग बने हैं ।

(घ) अभूदो ॥ सं० पा० ॥ अभूत् । ओ इति ॥ प० पा० ॥ **अभूदो** ॥ क्र० पा०

१०।३ के अनुसार एकाक्षर पद 'ओ' क्रम-वर्ग के अन्त में स्थित हो सकता है । अतः यहाँ दो पदों का ही क्रम-वर्ग बना है ।

(ङ) मो षु णः ॥ सं० पा० ॥ मो इति । सु । नः ॥ प० पा०
**मो षु णः** ॥ क्र० पा०

(च) आसु ष्मा णः ॥ सं० पा० ॥ आसु । स्म । नः ॥ प० पा०
**आसु ष्मा णः** ॥ क्र० पा०

इन दोनों उदाहरणों में 'षत्व' को प्राप्त 'सु' ('षु') और 'स्म' ('ष्म') के बाद में 'नः' विद्यमान है । अतः १०।३ से 'षु' और 'ष्म' क्रम-वर्गों के अन्त में स्थित नहीं हो सकते हैं । इससे दोनों स्थलों पर तीन-तीन पदों के क्रम-वर्ग बने हैं ।

---

[१] ऋ० क्र० १।३८।६ [२] ऋ० क्र० ६।४४।१८ [३] ऋ० ८।१८।२२
[४] ऋ० ६।४४।१८ [५] ऋ० ७।३२।१ [६] ऋ० ३।३०।४

यह (सूत्र में) क्यों (कहा) ? (उत्तर) "प्र सू न आयुर्जीवसे ।"[क] "इन्द्र सूरीन्कृणुहि स्मा नो अर्धम् ।"[ख] " 'नः' बाद में होने पर"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "मो षु त्वा वाघतश्चन ।"[ग] "त्वं हि ष्मा च्यावयन्नच्युतानि ।"[घ]

उ० भा०—पदेन च व्यवेतं यत्पदं तच्च व्यवायि च=पदेन च व्यवेतं यत्पदं यच्च व्यवैति ते उभे; अतीत्यावस्यन्ति । "ईयते नरा च शंसं दैव्यम् ।"[१]

ई लुप्तान्तम्=ईमित्येतत्पदं लुप्तान्तम्; अतीत्यावस्यन्ति । "यमी गर्भम् ।"[२] लुप्तान्तम् इति कस्मात् ? "समीं रेभासः ।"[३]

उ० भा० अ०—पदेन च व्यवेतं यत्पदं तच्च व्यवायि च=(किसी अन्य) पद के द्वारा पृथक् किया गया जो पद है वह और जो पृथक् करने वाला (पद) है—इन दोनों का (को); अतीत्यावस्यन्ति=अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं; (अर्थात् जो पद किसी अन्य पद के द्वारा दो भागों में पृथक् किया गया है वह पद तथा पृथक् करने वाला पद—इन दोनों में से कोई भी क्रम-वर्ग के अवसान में नहीं रखा जाता है)। (उदाहरण) "ईयते नरा च शंसं दैव्यम् ।"[ङ]

टि० (क) प्र सू न आयुर्जीवसे ॥ सं० पा० ॥ प्र । सु । नः । आयुः । जीवसे ॥ प० पा०
प्र सु । सु नः । न आयुः । आयुर्जीवसे ॥ क्र० पा०

(ख) इन्द्र सूरीन्कृणुहि स्मा नो अर्धम् ॥ सं० पा०
इन्द्र । सूरीन् । कृणुहि । स्म । नः । अर्धम् ॥ प० पा०
इन्द्र सूरीन् । सूरीन् कृणुहि । कृणुहि स्म । स्मा नः । नो अर्धम् ॥ क्र० पा०
उपर्युक्त दोनों प्रत्युदाहरणों में 'सु' और 'स्म' के बाद में 'नः' तो विद्यमान है किंतु 'सु' और 'स्म' के सकार 'मूर्धन्य' (षकार) नहीं हुए हैं। अतः 'सु' और 'स्म' के द्वारा क्रम-वर्गों का अवसान किया गया है। इससे यहाँ दो-दो पदों के ही क्रम-वर्ग बने हैं।

(ग) मो षु त्वा वाघतश्चन ॥ सं०पा० ॥ मो इति । सु । त्वा । वाघतः । चन ॥ प०पा०
मो षु । मो इति मो । सु त्वा । त्वा वाघतः । वाघतश्चन ॥ क्र० पा०

(घ) त्वं हि ष्मा च्यावयन्नच्युतानि ॥ सं० पा०
त्वम् । हि । स्म । च्यवयन् । अच्युतानि ॥ प० पा०
त्वं हि । हि ष्म । स्मा च्यावयन् । च्यावयन्नच्युतानि ॥ क्र० पा०
उपर्युक्त दोनों प्रत्युदाहरणों में 'सु' और 'स्म' के सकार 'मूर्धन्य' (षकार) तो हो गए हैं किंतु 'सु' और 'स्म' के बाद में 'नः' नहीं है। अतः 'सु' और 'स्म' के द्वारा क्रम-वर्गों का अवसान किया गया है। इससे यहाँ दो-दो पदों के ही क्रम-वर्ग बने हैं।

(ङ) ईयते नरा च शंसं दैव्यम् ॥ सं०पा० ॥ ईयते । नराशंसम् । च । दैव्यम् ॥ प० पा०
ईयते नरा च शंसं दैव्यम् ॥ क्र० पा०

---

[१] ऋ० क्र० १।४६।४२ [२] ऋ० क्र० १।१०२।६ [३] ऋ० ८।९७।११

ईं लुप्तान्तम्=लुप्त हो गया है अन्त (=अन्तिम वर्ण=मकार) जिसका ऐसे 'ईम्' पद का (को); अतीत्यावस्यन्ति=अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं; (अर्थात् जिस 'ईम्' पद के मकार का लोप हुआ हो उसे क्रम-वर्ग के अवसान में नहीं रखा जाता है)। (उदाहरण) "यमी गर्भम्।"क "लुप्त हो गया है अन्त (=मकार) जिसका"— यह (सूत्र में) क्यों (कहा)? (उत्तर) "समीं रेभासः।"ख

उ० भा० – प्लुतादीनि=प्लुतादीनि पदानि चातीत्यावस्यन्ति। "योनिमारैगप।"[१] "कुरुश्रवणमावृणि राजानम्।"[२]

स्कम्भनेनेति लुप्तवत्=स्कम्भनेनेत्येतत्पदं लुप्तवत् अतीत्यावस्यन्ति। "चित्कम्भनेन स्कभीयान्।"[३] लुप्तवत् इति कस्मात्? "अयं महान्महता स्कम्भनेन।"[४]

उ० भा० अ० – प्लुतादीनि=दीर्घत्व ('प्लुति') को प्राप्त हो गया है आदि (=प्रथम 'अक्षर') जिनका ऐसे पदों का (को); अतीत्यावस्यन्ति=अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं; (अर्थात् जिन पदों का प्रथम 'ह्रस्व' 'अक्षर' 'दीर्घ' हो गया हो उन पदों को क्रम-वर्गों के अवसान में नहीं रखा जाता है)। (उदाहरण) "योनिमारैगप"ग; "कुरुश्रवणमावृणि राजानम्।"घ

(५६४ङ) संहिता-पाठ में 'नराशंसम्' पद २।७८ के अनुसार 'च' पद के द्वारा पृथक् किया गया है। अतः 'नराशंसम्' (पृथक् किया गया पद) और 'च' (पृथक् करने वाला पद) – इन दोनों में किसी से क्रम-वर्ग का अवसान नहीं किया गया है। इससे यहाँ चार पदों का एक क्रम-वर्ग बना है।

टि० (क) यमी गर्भम्॥ सं० पा०॥ यम्। ईमिति। गर्भम्॥ प० पा०
**यमी गर्भम्॥ क्र० पा०**

यहाँ पर 'ईम्' के मकार का लोप४।८३से हो गया है। यह पद अब क्रम-वर्ग के अवसान में स्थित नहीं हो सकता है, जिससे यहाँ तीन पदों का क्रम-वर्ग बना है।

(ख) समीं रेभासः॥ सं० पा०॥ सम्। ईम्। रेभासः॥ प० पा०
**समीम्। ईं रेभासः॥ क्र० पा०**

यहाँ 'ईम्' के मकार का लोप नहीं हुआ है। अतः 'ईम्' से क्रम-वर्ग का अवसान हो गया है जिससे यहाँ पर दो पदों का ही क्रम-वर्ग बना है।

(ग) योनिमारैगप॥ सं० पा०॥ योनिम्। अरैक्। अप॥ प० पा०
**योनिमारैगप॥ क्र० पा०**

(घ) कुरुश्रवणमावृणि राजानम्॥सं०पा०॥ कुरुऽश्रवणम्। अवृणि। राजानम्॥ प०पा०
**कुरुश्रवणमावृणि राजानम्॥ क्र० पा०**

'अरैक्' और 'अवृणि' – इन दो पदों के प्रथम 'अक्षर' क्रमशः २।७५ और २।७७ से 'दीर्घ' हो गये हैं। अतः इन पदों से क्रम-वर्गों का अवसान नहीं हुआ है जिससे तीन-तीन पदों के क्रम-वर्ग बने हैं।

---

[१] ऋ० क्र० १।१२४।८ [२] ऋ० क्र० १०।३३।४
[३] ऋ० क्र० १०।१११।५ [४] ऋ० ६।४७।५

स्कम्भनेनेति लुप्तवत् = लुप्त हो गया है (सकार) जिसका ऐसे 'स्कम्भनेन' पद क (को); अतीत्यावस्यन्ति = अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं; (अर्थात जिस 'स्कम्भनेन' पद के सकार का लोप हो गया हो वह 'स्कम्भनेन' पद क्रम-वर्ग के अवसा में नहीं रखा जाता है)। (उदाहरण) "चित्कम्भनेन" स्कभीयान्।"[क] "लुप्त हो गया है (सकार) जिसका"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "अयं महान्महता स्कम्भनेन।"[ख]

उ० भा०—इतो षिञ्चतावर्तमः पूर्वे द्वैपदयोर्द्वयोः = इतो षिञ्चत, आवर्तमः—इत्येतयोर्द्वैपदयोः पूर्वे पदे; अतीत्यावस्यन्ति। इतो षिञ्चत—"परीतो षिञ्चत।"[1] आवर्तमः—"उषा आवर्तमः।"[2]

स्वसारमस्कृतेत्युभे = स्वसारमस्कृत उभे इत्येते पदे; अतीत्यावस्यन्ति। "निर स्वसारमस्कृतोषसम्।"[3]

परं वीरास एतन = वीरास एतन—इत्येतस्य द्वैपदस्य परं पदम्; अतीत्यावस्यन्ति। वीरास एतन—"परा वीरासः। वीरास एतन मर्यासः॥"[4]

उ० भा० अ०—इतो षिञ्चतावर्तमः पूर्वे द्वैपदयोर्द्वयोः = "इतो षिञ्चत" और "आवर्तमः"—इन दो द्वैपदों के प्रथम पदों का (को); अतीत्यावस्यन्ति = अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं; [अर्थात् "इतो षिञ्चत" और "आवर्तमः" में से प्रत्येक के प्रथम पद (= 'इतो' तथा 'आवर्') को क्रम-वर्ग के अवसान में नहीं रखा जाता है]। इतो षिञ्चत—"परीतो षिञ्चत।"[ग] आवर्तमः—"उषा आवर्तमः।"[घ]

टि० (क) चित्कम्भनेन स्कभीयान्॥ सं० पा०
चित्। स्कम्भनेन। स्कभीयान्॥ प० पा०
चित्कम्भनेन स्कभीयान्॥ क्र० पा०
'चित्कम्भनेन' में 'स्कम्भनेन' के सकार का ४।२१ से लोप हो गया है। अतः 'स्कम्भनेन' से क्रम-वर्ग का अवसान नहीं हुआ है जिससे यहाँ तीन पदों का एक क्रम-वर्ग बना है।

(ख) अयं महान्महता स्कम्भनेन॥ सं० पा०
अयम्। महान्। महता। स्कम्भनेन॥ प० पा०
अयं महान्। महान्महता। महता स्कम्भनेन॥ क्र० पा०
यहाँ पर 'स्कम्भनेन' के सकार का लोप नहीं हुआ है। अतः दो पदों का एक क्रम-वर्ग बना है।

(ग) परीतो षिञ्चत॥ सं० पा०॥ परि। इतः। सिञ्चत॥ प० पा०
परीतो षिञ्चत॥ क्र० पा०

(घ) उषा आवर्तमः॥ सं० पा०॥ उषाः। आवरित्यावः। तमः॥ प० पा०
उषा आवर्तमः॥ क्र० पा०

---

[1] ऋ० क्र० ९।१०७।१ [2] ऋ० क्र० १।९२।४ [3] ऋ० क्र० १०।१२७।३
[4] ऋ० क्र० ५।६१।४

**स्वसारमस्कृतेत्युभे**="स्वसारमस्कृत"—इन दोनों पदों का (को); **अतीत्यावस्यन्ति**=अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं; [अर्थात् "स्वसारमस्कृत" के दोनों पदों ('स्वसारम्' और 'अस्कृत') को क्रम-वर्ग के अवसान में नहीं रखा जाता है]। (उदाहरण) "निरु स्वसारमस्कृतोषसम् ।"[क]

**परं वीरास एतन**="वीरास एतन"—इस द्वैपद के बाद वाले पद का (को); **अतीत्यावस्यन्ति**=अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं; [अर्थात् "वीरास एतन" का द्वितीय पद ('एतन') क्रम-वर्ग के अवसान में नहीं रखा जाता है]। **वीरास एतन**—"परा वीरासः। वीरास एतन मर्यासः।"[ख]

## प्लुतादिप्रभृतीनि च ॥४॥

**सू० अ०—दीर्घत्व ('प्लुति') को प्राप्त हो जाते हैं आदि (=प्रथम 'स्वर' वर्ण) जिनके (२।७५-७७ में उल्लिखित) उन पदों से आगे आने वाले (अर्थात् २।७८ में उल्लिखित पदों) का (को) भी (अतिक्रमण करके क्रम-वर्ग का अवसान किया जाता है)।**

उ० भा०—(प्लुतादिप्रभृतीनि=) तानि; अतीत्यावस्यन्ति। "शुनश्चिच्छेपं निदितम्"[१]; "नरा वा शंसं पूषणम्।"[२] किमर्थमिदमुच्यते? ननु—"पदेन च व्यवेतं यत्पदं तच्च व्यवायि च"[३]—इत्येव सिद्धम्। न सिध्यति। कथम्? "क्रमो द्वाभ्यामभिक्रम्य"[४]—इति प्राप्तावसानानि हि—"एकवर्णमनोकारम्"[५]—इत्येवमादीन्यवसानादपोद्यन्ते। तस्माद्यत्रोभे व्यवायिव्यवेते पदे प्राप्तावसाने तत्रैव स्यात्—"ईयते नरा च शंसं दैव्यम्"[६] इति। अन्यत्र न स्यात्—एवमर्थमिदमुच्यते। एवमेके वर्णयन्ति।

(५६७घ) "इतो षिञ्चत" और "आवर्तमः"—इन दोनों द्वैपदों के पूर्व-पद ('इतः' और 'आवः') क्रम-वर्ग के अन्त में स्थित नहीं हो सकते हैं। अतः दोनों ही स्थलों पर तीन-तीन पदों के क्रम-वर्ग बने हैं।

टि० (क) निरु स्वरसारमस्कृतोषसम् ॥ सं० पा०
नि:। ऊँ इति। स्वसारम्। अकृत। उषसम् ॥ प० पा०
**निरु स्वसारमस्कृतोषसम् ॥** क्र० पा०
"स्वसारमस्कृत"—ये दोनों ही क्रम-वर्ग के अन्त में स्थित नहीं हो सकते हैं। एकाक्षर पद 'उ' (ऊँ) भी क्रम-वर्ग के अन्त में स्थित नहीं हो सकता है। अतः यहाँ पाँच पदों का एक क्रम-वर्ग बना है।

(ख) परा वीरास एतन ॥ सं० पा० ॥ परा। वीरासः। इतन ॥ प० पा०
परा वीरासः। **वीरास एतन मर्यासः ॥** क्र० पा०
"वीरास एतन" का द्वितीय पद ('एतन') क्रम-वर्ग के अन्त में स्थित नहीं हो सकता है। अतः यहां तीन पदों का एक क्रम-वर्ग बना है।

---

[१] ऋ० क्र० ५।२।७ [२] ऋ० क्र० १०।६४।३ [३] १०।३
[४] १०।२ [५] १०।३ [६] ऋ० क्र० ९।८६।४२

उ० मा० अ०—(प्लुतादिप्रभृतीनि=दीर्घत्व को प्राप्त हो गये हैं प्रथम 'स्वर'-वर्ण जिनके उनसे बाद वाले पदों को=) उनका (उनको); अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं; (अर्थात् २।७८ में उल्लिखित पदों को क्रम-वर्ग के अवसान में नहीं रखा जाता है)। (उदाहरण) "शुनश्चिच्छेपं निदितम्"[क]; "नरा वा शंसं पूषणम्।"[ख] (पू०) यह (सूत्र) किसलिये कहा गया है ? ये (उदाहरण) तो "(किसी अन्य) पद के द्वारा पृथक् किया गया जो पद है वह और जो पृथक् करने वाला (पद) है"—इस (सूत्र) से ही सिद्ध हैं।"[ग] (सि०) (इससे) सिद्ध नहीं होता है। (पू०) क्यों (सिद्ध नहीं होता है) ? (सि०) "दो (पदों) से प्रारम्भ करके"—इसके अनुसार प्राप्त है अवसान जिनमें उन ओकार से अतिरिक्त एकाक्षर (पदों) आदि को अवसान से हटाया गया है। इसलिये जहाँ पृथक् करने वाले और पृथक् होने वाले—इन दोनों में अवसान प्राप्त हो वहाँ पर ही (१०।३ से कार्य सिद्ध) होगा।[घ] (जैसे) "ईयते नरा च शंसं दैव्यम्।"[ङ] अन्यत्र नहीं होगा।

टि० (क) शुनश्चिच्छेपं निदितम् ॥ सं० पा० ॥ शुनःऽशेपम् । चित् । निऽदितम् ॥ प० पा०
**शुनश्चिच्छेपं निदितम् ॥ क्र० पा०**

(ख) नरा वा शंसं पूषणम् ॥ सं० पा० ॥ नराशंसम् । वा । पूषणम् ॥ प० पा०
**नरा वा शंसं पूषणम् ॥ क्र० पा०**

२।७८ में उल्लिखित 'शुनःशेपम्' और 'नराशंसम्' पदों को क्रम-वर्गों के अवसान में नहीं रखा जाता है। अतः तीन-तीन पदों का एक-एक क्रम-वर्ग बना है।

(ग) पू०—१०।३ में यह विधान किया गया है कि किसी अन्य पद के द्वारा पृथक् किया गया पद और पृथक् करने वाला पद—इन दोनों के द्वारा क्रम-वर्ग का अवसान नहीं किया जाता है। प्रस्तुत उदाहरणों में भी 'शुनःशेपम्' पद को 'चित्' और 'नराशंसम्' पद को 'वा' पद के द्वारा पृथक् किया गया है। अतः 'शुनःशेपम्' और 'नराशंसम्' के द्वारा क्रम-वर्ग का अवसान न होना तो १०।३ से ही सिद्ध हो जाता है। तो फिर प्रस्तुत सूत्र के द्वारा इन पदों के क्रम-वर्ग के अवसान में न होने का जो पुनः विधान किया गया है वह व्यर्थ है।

(घ) सि०—१०।३ के द्वारा किया गया निषेध वहीं लागू होता है जहाँ पृथक् होने वाला पद और पृथक् करने वाला पद—इन दोनों की क्रम-वर्ग के अवसान में प्राप्ति हो। पृथक् होने वाले 'शुनःशेपम्' और 'नराशंसम्' (ऋ० १०।६४।३) पद अर्धर्च के प्रथम पद हैं। इससे उनकी क्रम-वर्ग के अवसान में प्राप्ति ही नहीं हो सकती। अतः इन दोनों स्थलों पर १०।३ से निषेध नहीं होता है। इन स्थलों पर निषेध करने के लिये ही प्रस्तुत सूत्र का निर्माण किया गया है।

(ङ) ईयते नरा च शंसं दैव्यम् ॥सं०पा०॥ ईयते । नराशंसम् । च । दैव्यम् ॥ प० पा०
**ईयते नरा च शंसं दैव्यम् ॥ क्र० पा०**

'नराशंसम्' पद यहाँ अर्धर्च का प्रथम पद नहीं है जिससे 'नराशंसम्' और 'वा'—इन दोनों की अवसान में प्राप्ति होती है। अतः यहाँ १०।३ से निषेध हो गया है।

इसलिये यह (सूत्र) कहा गया है। इस प्रकार कतिपय आचार्य (इस सूत्र की) व्याख्या करते हैं।

उ०भा०—अपरे पुनः—"पदेन च व्यवेतं यत्पदम्"[१] इत्येव सर्वेषु सिद्धमिति मन्यमाना अन्यथा वर्णयन्ति। "प्लुतादिप्रभृतीनि च" इति चकारं वाशब्दस्यार्थे वर्णयन्ति। प्लुतादिप्रभृतीनि वातीत्यावस्यन्ति—"योनिमारैक्"[२]; "चित्कम्भनेन"[३]; "वीरास एतन"[४]; "परीतः।"[५] "प्लुतादिप्रभृतीनि" इति प्रभृतिशब्दः प्रकारार्थो द्रष्टव्यः। प्लुतादिप्रकाराणीति। किं कृतं भवति? वक्ष्यति हेतावनवसानीयेषु केषु केषुचित्—"द्वयभिक्रमं पूर्वनिमित्तमानिनः"[६] इति। तदिहापि दर्शितं भवति॥

उ० भा० अ०—किंतु दूसरे आचार्य—"(किसी अन्य) पद के द्वारा पृथक् किया गया जो पद है"—इस (सूत्र) को ही सब (उदाहरणों) में सिद्ध मानते हुए (इस सूत्र की) अन्य प्रकार से व्याख्या करते हैं। "प्लुतादिप्रभृतीनि च" के 'च' शब्द की व्याख्या 'वा' शब्द के अर्थ में करते हैं; (अर्थात् इन आचार्यों के अनुसार विकल्प को बतलाने के लिये 'च' शब्द सूत्र में प्रयुक्त है)। (इससे सूत्र का यह अर्थ हुआ) प्लुतादि ('दीर्घ' हो गये हैं आदि 'स्वर'-वर्ण जिनके) प्रभृति का विकल्प से अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं। (उदाहरण) "योनिमारैक्" ("अथवा योनिमारैगप्"); "चित्कम्भनेन" (अथवा "चित्कम्भनेन स्कभीयान्") "वीरास एतन" (अथवा "वीरास एतन मर्यासः"); "परीतः" (अथवा "परीतो षिञ्चत")।[क] "प्लुतादिप्रभृतीनि" में 'प्रभृति' शब्द को प्रकार के अर्थ में समझना चाहिए। (इससे यह अर्थ होगा) प्लुतादि ('दीर्घ' हो गए हैं आदि 'स्वर'-वर्ण जिनके) के प्रकार के स्थलों का) (को) (विकल्प से अतिक्रमण करके क्रम-वर्गों का अवसान करते हैं)। इससे क्या लाभ होगा? (उत्तर) हेतु-पटल (एकादश पटल) में अवसान में न आने वाले किन्हीं-किन्हीं स्थलों के विषय में (सूत्रकार) कहेंगे—"पूर्ववर्ती (पद) को (विकार का) निमित्त मानने वाले (आचार्य) दो पदों का क्रम-वर्ग (बनाते हैं)।" (इस दूसरी व्याख्या के अनुसार) वह (दो-दो पदों के क्रम-वर्गों का निर्माण) यहाँ भी दिखलाई पड़ जाता है।[ख]

### (क्रमे विकृतरूपविषयकनियमौ)

## पूर्वोत्तरकृतं रूपं प्रत्यादानावसानयोः न ब्रूयात् ॥५॥

### (क्रम-पाठ में विकृत-रूप-विषयक नियम)

**सू० अ०—पूर्ववर्ती (पद) तथा परवर्ती (पद) से किये गये (विकृत) रूप का (को) (क्रमशः) पुनः कथन ('प्रत्यादान') और अन्त ('अवसान') में उच्चारण न करे।**

टि० (क) उपर्युक्त सभी स्थलों के लिए १०।३ से सम्बद्ध टिप्पणियों को देखिए।

(ख) दशम पटल में विहित क्रम-पाठ के हेतुओं का प्रतिपादन एकादश पटल में किया गया है। ११।११ इत्यादि कतिपय ऐसे स्थल हैं जिनसे सम्बद्ध विषय का विधान दशम पटल में किया गया प्रतीत नहीं होता है। इस दूसरी व्याख्या के अनुसार ११।११ इत्यादि स्थलों का सम्बन्ध प्रस्तुत सूत्र के साथ सिद्ध हो जाता है।

---

[१] १०।३ [२] ऋ० क्र० १।१२४।८ [३] ऋ० क्र० १०।१११।५
[४] ऋ० क्र० ५।६१।४ [५] ऋ० क्र० ९।१०७।१ [६] ११।११

उ० भा० अ०—पूर्वकृतं रूपं प्रत्यादाने न ब्रूयात्, उत्तरकृतं रूपमवसाने न ब्रूयात्। पूर्वकृतं रूपम्—"यच्छक्वरीषु वृहता।"[1] "मो षु। मो इति मो। सु त्वा।"[2] "प्र णः। न इन्दो।"[3] उत्तरकृतं रूपम्—"घनेव वज्रिन्। घनेवेति घनाऽइव। वज्रिञ्छ्नथिहि।"[4] "अग्ने अच्छ। अच्छा वद॥"[5]

उ० भा० अ०—पूर्ववर्ती (पद) से किये गये (विकृत) रूप का (को) पुनःकथन ('प्रत्यादान') में उच्चारण न करे, परवर्ती पद से किये गये (विकृत) रूप का (को) (क्रम-वर्ग के) अन्त (=अवसान) में उच्चारण न करे। पूर्वकृत रूप (के उदाहरण) "यच्छक्वरीषु। शक्वरीषु वृहता।"क "मो षु। मो इति मो। सु त्वा।"ख "प्र णः। न इन्दो।"ग उत्तरकृत रूप (के उदाहरण) "घनेव वज्रिन्। घनेवेति घनाऽइव। वज्रिञ्छ्नथिहि।"घ "अग्ने अच्छ। अच्छा वद।"ङ

टि० (क) यच्छक्वरीषु वृहता॥ सं० पा०॥ यत्। शक्वरीषु। वृहता॥ प० पा०
यच्छक्वरीषु। शक्वरीषु वृहता॥ क्र० पा०

४।११ से 'यत्' का तकार चकार हो गया है। इस चकार के कारण परवर्ती (=पदादि) शकार ४।१२ से छकार हो गया है। पूर्ववर्ती चकार से किये गये विकृत छकार का प्रस्तुत सूत्र से पुनः कथन में उच्चारण नहीं किया जाता है; प्राकृत शकार का ही उच्चारण किया जाता है।

(ख) मो षु त्वा॥ सं० पा०॥ मो इति। सु। त्वा॥ प० पा०
मो षु। मो इति मो। सु त्वा॥ क्र० पा०

५।५ से 'मो' के ओकार के कारण 'सु' का सकार षकार हो गया है। पूर्ववर्ती 'मो' के ओकार से किये गये विकृत षकार का पुनः कथन में उच्चारण नहीं किया जाता है; प्राकृत सकार का ही उच्चारण किया जाता है।

(ग) प्र ण इन्द्रो॥ सं० पा०॥ प्र। नः। इन्दो इति॥ प० पा०
प्र णः। न इन्दो॥ क्र० पा०

५।५६ से पूर्ववर्ती रेफ के कारण 'न' का 'ण' हो गया है। पूर्ववर्ती रेफ से किये गये विकृत णकार का पुनः कथन में उच्चारण नहीं किया जाता है; प्राकृत नकार का ही उच्चारण किया जाता है।

(घ) घनेव वज्रिञ्छ्नथिहि॥ सं० पा०॥ घनाऽइव। वज्रिन्। श्नथिहि॥ प० पा०
घनेव वज्रिन्। घनेवेति घनाऽइव। वज्रिञ्छ्नथिहि॥ क्र० पा०

४।८ से परवर्ती (=पदादि) शकार के कारण पूर्ववर्ती (=पदान्त) नकार ञकार हो गया है। परवर्ती (=पदादि) शकार से किये गये विकृत ञकार का प्रस्तुत सूत्र के अनुसार क्रम-वर्ग के अवसान में उच्चारण नहीं किया जाता है; प्राकृत नकार का ही उच्चारण किया जाता है।

(ङ) अग्ने अच्छा वद॥ सं० पा०॥ अग्ने। अच्छ। वद॥ प० पा०
अग्ने अच्छ। अच्छा वद॥ क्र० पा०

---

[1] ऋ० क्र० ७।३३।४ [2] ऋ० क्र० ७।३२।१ [3] ऋ० क्र० ९।४४।१
[4] ऋ० क्र० १।६३।५ [5] ऋ० क्र० १०।१४१।१

सर्वमेवान्यद्यथासंहितमाचरेत् ॥६॥

सू० अ०—अन्य सभी (विकार) को संहिता-पाठ के अनुसार करे।

उ० भा० – पूर्वकृताद्रूपादुत्तरकृताच्च यत् अन्यत् सर्वम् यथासंहितमाचरेत्=यथा संहिताविधाने विहितं तथैवाचरेत्—इत्यर्थः। "वाजेषु सासहिः। सासहिर्भव ॥"[१]

उ० भा० अं०—पूर्ववर्ती (पद) से किये गये (विकृत) रूप और उत्तरवर्ती (पद) से किये गये (विकृत) रूप से; अन्यत् सर्वम्=अन्य जो सभी (विकृत रूप) हैं; उसे यथासंहितमाचरेत्=संहिता-पाठ के अनुसार करे=जैसा संहिता-विधान में विहित है वैसा ही करे—यह अर्थ है। (उदाहरण) "वाजेषु सासहिः। सासहिर्भव।"[क]

(क्रमपाठे पदविशेषाणां परिग्रहः)

अवगृह्याण्यतिक्रम्य सहेतिकरणानि च।
धक्षिधुक्षिप्रवादौ च विकृतादी प्लुतादि च ॥
अन्तःपदं च येषां स्याद्विकारोऽनन्यकारितः।
एतानि परिगृह्णीयात् ॥७॥

(क्रम-पाठ में पदविशेषों का परिग्रह)

सू० अ० - (१) वे पद जो पद-पाठ में 'अवग्रह' के द्वारा पृथक् किये जाते हैं; (२) जिन पदों के साथ पद-पाठ में 'इति' लगाते हैं; (३) 'धक्षि' और '-धुक्षि' धातुओं का कोई भी रूप जिसका प्रथम 'अक्षर' विकृत हुआ हो; (४) दीर्घत्व को प्राप्त हुआ है प्रथम 'अक्षर' जिसका ऐसा कोई पद; (५) जिन (पदों) के मध्य में ऐसा विकार हुआ हो जो अन्य (पद) के द्वारा नहीं किया गया है—इन (उपर्युक्त) का (को) अतिक्रमण करके (अर्थात् इनके द्वारा क्रम-वर्गों को पूरा करके) (तदनन्तर) इनका 'परिग्रह' करे (अर्थात् मध्य में 'इति' रखकर इन पदों का दो बार उच्चारण करे)।

उ० भा०—अवगृह्याणि=द्विखण्डानि=पूर्वोत्तरपदभूतानि पदानि; (अतिक्रम्य=) अतीत्य; (एतानि) परिगृह्णीयात्—"ऋषिभिरीड्यः। ऋषिभिरित्यृषिऽभिः।"[२]

(५७०ङ) ७।६ से परवर्ती (=पदादि) वकार के कारण पूर्ववर्ती 'अच्छ' पद 'अच्छा' हो गया है। परवर्ती (=पदादि) वकार से किये गये विकृत 'अच्छा' पद का प्रस्तुत सूत्र के अनुसार क्रम-वर्ग के अवसान में उच्चारण नहीं किया जाता है; 'अच्छ' पद का ही उच्चारण किया जाता है।

टि० (क) वाजेषु सासहिर्भव ॥ सं० पा० ॥ वाजेषु। ससहिः। भव ॥ प० पा०
वाजेषु सासहिः। सासहिर्भव ॥ क्र० पा०

'सासहिः' पद का प्रथम 'अक्षर' ९।३२ के अनुसार 'दीर्घ' हुआ है। यह दीर्घत्व न तो पूर्ववर्ती पद के कारण हुआ है और न परवर्ती पद के कारण। अतः अवसान तथा पुनः कथन—इन दोनों स्थलों पर संहिता-पाठ में प्राप्त 'सासहिः' पद का ही उच्चारण किया जाता है।

[१] ऋ० क्र० ३।३७।६

[२] ऋ० क्र० १।१।२

सहेतिकरणानि च=इतिकरणसहितानि च; पदानि अतिक्रम्य (एतानि) परिगृह्णीयात्—"इन्द्राग्नी अपात्। इन्द्राग्नी इतीन्द्राग्नी।"[१]

उ० भा० अ०—अवगृह्याणि=दो खण्डों वाले (अर्थात् पद-पाठ में 'अवग्रह' के द्वारा दो खण्डों में विभक्त)=पूर्व और उत्तर पदों के रूप में अवस्थित पदों का (को); (अतिक्रम्य=) अतिक्रमण करके; (एतानि) परिगृह्णीयात्=(इनको=इनका) 'परिग्रह'[क] करे; (अर्थात् पद-पाठ में 'अवग्रह' के द्वारा पृथक् किये गये पदों से सम्बद्ध 'क्रम'-वर्गों को पूरा करके उन पदों का पुनः दो बार उच्चारण किया जाता है और उन पदों के दो उच्चारणों के मध्य में 'इति' का उच्चारण किया जाता है)। (उदाहरण) "ऋषिभिरीड्यः। ऋषिभिरित्यृषिऽभिः।"[ख]

सहेतिकरणानि च='इति' शब्द सहित भी; पदों से (को); अतिक्रम्य=क्रम-वर्गों को पूरा करके; (एतानि) परिगृह्णीयात्=(इनको=इनका) 'परिग्रह' करे; (अर्थात् पद-पाठ में जिन पदों के साथ 'इति' जोड़ा जाता है उन पदों के द्वारा सम्बद्ध क्रम-वर्गों को पूरा करके उन पदों का पुनः दो बार उच्चारण किया जाता है और उन पदों के दो उच्चारणों के मध्य में 'इति' का उच्चारण किया जाता है)। (उदाहरण) "इन्द्राग्नी अपात्। इन्द्राग्नी इतीन्द्राग्नी।"

उ० भा०—(घक्षिघुक्षिप्रवादौ च=) घक्षि घुक्षि इत्येतौ च प्रवादौ; विकृतादी सन्तौ अतिक्रम्य (एतानि) परिगृह्णीयात्। "अनु वक्षि। वक्षि वावने। घक्षीति घक्षि।"[२] "मन्विनं धुक्षन्। धुक्षन्वृषे। धुक्षन्निति धुक्षन्।"[३] विकृतादी इति किम्? "नीचा तम्। तं धक्षि। धक्ष्यतसम्।"[४] "निर्धुक्षन्। धुक्षन्वक्षणाभ्यः।"[५]

प्लुतादि च पदम् अतिक्रम्य परिगृह्णीयात्। "आरैक्पन्थाम्। अरैगित्यरैक्।"[६] "आयुक्षातामश्विना। अयुक्षातामित्ययुक्षाताम्।"[७]

उ० भा० अ०—विकृतादी=जिनके आदि (=प्रथम वर्ण) विकृत हो गये हैं उन; (घक्षिघुक्षिप्रवादौ च=) 'घक्षि' और 'घुक्षि'—के सभी रूपों से (को); अतिक्रम्य

टि० (क) 'परिग्रह' के लिए पृ० ४७ पर टि० (ख) को देखिए।

(ख) ऋषिभिरीड्यः॥ सं० पा०॥ ऋषिऽभिः। ईड्यः॥ प० पा०
ऋषिभिरीड्यः। ऋषिभिरित्यृषिऽभिः॥ क्र० पा०
'ऋषिभिः' पद को पद-पाठ में 'अवग्रह' के द्वारा पृथक् किया गया है। प्रस्तुत सूत्र के अनुसार 'ऋषिभिः' पद से क्रम-वर्ग को पूरा करके इसका 'परिग्रह' किया गया है।

(ग) इन्द्राग्नी अपात्॥ सं० पा०॥ इन्द्राग्नी इति। अपात्॥ प० पा०
इन्द्राग्नी अपात्। इन्द्राग्नी इतीन्द्राग्नी॥ क्र० पा०
प्रगृह्य-संज्ञक 'इन्द्राग्नी' पद के साथ पद-पाठ में 'इति' लगाया जाता है अतः 'इन्द्राग्नी' पद का प्रस्तुत सूत्र से 'परिग्रह' किया गया है।

---

[१] ऋ० क्र० ६।५९।६ [२] ऋ० क्र० २।१।१० [३] ऋ० क्र० १।१२१।८
[४] ऋ० क्र० ४।४।४ [५] ऋ० क्र० ८।१।१७ [६] ऋ० क्र० १।११३।१६
[७] ऋ० क्र० १।१५७।१

(एतानि) परिगृह्णीयात्=क्रम-वर्गों को पूरा करके (इनका) 'परिग्रह' करे; (अर्थात् जहाँ पर 'घक्षि' और 'घुक्षि' पदों के किसी भी रूप के आदि वर्ण में विकार हुआ हो वहाँ उसका 'परिग्रह' किया जाता है)। (उदाहरण) "अनु दक्षि। दक्षि दावने। घक्षीति घक्षि।"[क] "मन्दिनं दुक्षन्। दुक्षन्वृधे। घुक्षन्निति घुक्षन्।"[ख] "विकृत हो गया है आदि (=प्रथम वर्ण) जिनका"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "नीचा तम्। तं घक्षि। वक्ष्यतसम्।"[ग] "निर्घुक्षन्। घुक्षन्वक्षणाभ्यः।"[घ]

प्लुतादि च='दीर्घ' हो गया है आदि (=प्रथम 'स्वर'-वर्ण) जिसका उस पद से (को); अतिक्रम्य परिगृह्णीयात्=क्रम-वर्ग को पूरा करके (तदनन्तर उसका) 'परिग्रह' करे। (उदाहरण) "आरैक्पन्थाम्। अरैगित्यरैक्।"[ङ] "आयुक्षातामश्विना। अयुक्षाता-मित्ययुक्षाताम्।"[च]

उ० भा०—(अन्तःपदं च येषाम्=) अन्तः=मध्ये. येषां पदानाम्; विकारः; अनन्यकारितः=आत्मकारितः (स्यात्)–इत्यर्थः। तानि च अतिक्रम्य परिगृह्णीयात्। "सुषुमा यातम्। सुसुमेति सुसुम।"[1] 'वावृधाना शुभः। ववृधानेति ववृधाना।"[2] अनन्यकारितः इति किम्? "शक्र एणम्। एनं पीपयत्॥"[3]

टि० (क) अनु दक्षि दावने ॥ सं० पा० ॥ अनु। घक्षि। दावने ॥ प० पा०
अनु दक्षि। दक्षि दावने। घक्षीति घक्षि ॥ क्र० पा०
४।९८ से प्रथम वर्ण (=घकार) संहिता-पाठ में दकार हो गया है। अतः 'घक्षि' का 'परिग्रह' किया गया है।

(ख) मन्दिनं दुक्षन्वृधे ॥ सं० पा० ॥ मन्दिनम्। घुक्षन्। वृधे ॥ प० पा०
मन्दिनं दुक्षन्। दुक्षन्वृधे। घुक्षन्निति घुक्षन् ॥ क्र० पा०
४।९८ से 'घुक्षन्' का प्रथम वर्ण (=घकार) संहिता-पाठ में दकार हो गया है। अतः 'घुक्षन्' का 'परिग्रह' किया गया है।

(ग) नीचा तं वक्ष्यतसम् ॥ सं० पा० ॥ नीचा। तम्। घक्षि। अतसम् ॥ प० पा०
नीचा तम्। तं घक्षि। वक्ष्यतसम् ॥ क्र० पा०

(घ) निर्घुक्षन्वक्षणाभ्यः ॥ सं० पा० ॥ निः। घुक्षन्। वक्षणाभ्यः ॥ प० पा०
निर्घुक्षन्। घुक्षन्वक्षणाभ्यः ॥ क्र० पा०
'घक्षि' तथा 'घुक्षन्' के प्रथम वर्ण (=घकार) संहिता-पाठ में विकार को प्राप्त नहीं हुए हैं। अतः इन पदों का 'परिग्रह' नहीं किया गया है।

(ङ) आरैक्पन्थाम् ॥ सं० पा० ॥ अरैक्। पन्थाम् ॥ प० पा०
आरैक्पन्थाम्। अरैगित्यरैक् ॥ क्र० पा०

(च) आयुक्षातामश्विना ॥ सं० पा० ॥ अयुक्षाताम्। अश्विना ॥ प० पा०
आयुक्षातामश्विना। अयुक्षातामित्ययुक्षाताम् ॥ क्र० पा०
२।७५ और २।७७ से क्रमशः 'अरैक्' तथा 'अयुक्षाताम्' के प्रथम 'स्वर'-वर्ण (अकार) 'दीर्घ' हो गए हैं। अतः इन पदों का 'परिग्रह' किया गया है।

---

[1] ऋ० क्र० १।१३७।१  [2] ऋ० क्र० ८।५।११  [3] ऋ० क्र० ८।१।१९

उ० भा० अ०—(अन्तःपदं च येषाम्=) जिन पदों के, अन्तः=मध्य में; अनन्यकारितः=अन्य (पद) के द्वारा न किया गया=अपने ही द्वारा किया गया—यह अर्थ है; विकारः (स्यात्)=विकार (होवे)। उनसे भी; अतिक्रम्य परिगृह्णीयात्=क्रम-वर्गों को पूरा करके (तदनन्तर) उनका 'परिग्रह' करे; (अर्थात् उन पदों का भी 'परिग्रह' किया जाता है जिनके मध्य में ऐसा कोई विकार हुआ हो जो पूर्ववर्ती पद अथवा उत्तरवर्ती पद के प्रभाव से नहीं हुआ है)। (उदाहरण) "सुषुमा यातम्। सुसुमेति सुसुम।"[क] "वावृधाना शुभः। ववृधानेति ववृधाना।"[ख] "अन्य के द्वारा न किया गया (विकार)"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "शक्र एणम्। एनं पीपयत्।"[ग]

## बहुमध्यगतानि च ॥८॥

सू० अ०—बहुत पदों वाले (क्रम-वर्ग) के मध्य में स्थित (पदों) का (को) भी ('परिग्रह' करे)।

उ० भा०—(बहुमध्यगतानि च=)बहूनां पदानां मध्यगतानि च यानि पदानि तानि; चातिक्रम्य परिगृह्णीयात्। "ईयते नरा च शंसं दैव्यम्। नराशंसमिति नराशंसम्। चेति च।"[१] "शुनश्चिच्छेपं निदितम्। शुनःशेपमिति शुनःऽशेपम्। चिदिति चित्।"[२] "नरा वा शंसं पूषणम्। नराशंसमिति नराशंसम्। वेति वा।"[३] "मो षु णः। मो इति मो। स्विति सु॥"[४]

उ० भा० अ०—(बहुमध्यगतानि च=) बहुत पदों वाले (क्रम-वर्ग) के मध्य में स्थित जो पद हैं उनसे (-को)भी क्रम-वर्गों को पूरा करके उनका 'परिग्रह' करे। (उदाहरण)

टि० (क) सुषुमा यातम्॥ सं० पा०॥ सुसुम। आ। यातम्॥ प० पा०
सुषुमा यातम्। सुसुमेति सुसुम॥ क्र० पा०
'सुसुम' के द्वितीय 'सु' के सकार का षकार अन्य पद के प्रभाव से न होकर ५।२० से पूर्ववर्ती उकार के कारण हुआ है। अतः इसका 'परिग्रह' किया गया है।

(ख) वावृधाना शुभः॥ सं० पा०॥ ववृधाना। शुभः॥ प० पा०
वावृधाना शुभः। ववृधानेति ववृधाना॥ क्र० पा०
'ववृधाना' का प्रथम 'अक्षर' (='स्वर'-वर्ण) किसी अन्य पद के प्रभाव से 'दीर्घ' न होकर ९।३२ के अनुसार अपने ही द्वारा हुआ है। अतः इसका 'परिग्रह' किया गया है।

(ग) शक्र एणं पीपयत्॥ सं० पा०॥ शक्रः। एनम्। पीपयत्॥ प० पा०
शक्र एणम्। एनं पीपयत्॥ क्र० पा०
'एनम्' का नकार ५।६० से अन्य (पूर्ववर्ती 'शक्रः' के रेफ) के कारण णकार हुआ है। अतः यहाँ 'परिग्रह' नहीं किया गया है।

---

[१] ऋ० क्र० ९।८६।४२
[२] ऋ० क्र० ५।२।७
[३] ऋ० क्र० १०।६४।३
[४] ऋ० क्र० १।३८।६

"ईयते नरा च शंसं दैव्यम्। नराशंसमिति नराशंसम्। चेति च।"[क] "शुनश्चिच्छेपं निदितम्। शुनःशेपमिति शुनःऽशेपम्। चिदिति चित्।"[ख] "नरा वा शंसं पूषणम्। नराशंसमिति नराशंसम्। वेति वा।"[ग] "मो षु णः। मो इति मो। स्विति सु।"[घ]

## अर्धर्चान्त्यं च ॥९॥

**सू० अ०—अर्धर्च के अन्त में स्थित (पद) का (को) भी ('परिग्रह' करे)।**

उ० भा०—(अर्धर्चान्त्यम्=) अर्धर्चान्ते वर्तमानम्; च अतीत्य परिगृह्णीयात्। "पुत्राय मीळ्हुषे। मीळ्हुष इति मीळ्हुषे॥"[१]

उ० भा० अ०—(अर्धर्चान्त्यम् च=) अर्धर्च के अन्त में वर्तमान (पद) से (को) भी; क्रम-वर्ग को पूरा करके (उसका) 'परिग्रह' करे। (उदाहरण) "पुत्राय मीळ्हुषे। मीळ्हुष इति मीळ्हुषे।"[ङ]

## नाकारं प्रागतोऽननुनासिकम् ॥१०॥

**सू० अ०—इस (अर्थात् अर्धर्च के अन्त में वर्तमान पद) से पहले आने वाले 'अननुनासिक' आकार (को) का ('परिग्रह' न करे)।**

उ० भा०—अननुनासिकमाकारम्; (अतः=) अर्धर्चान्त्यात्; प्राङ् न परिगृह्णीयात्। "मन्द्रना वरेण्यम्।"[२] प्रागत इति किम्? "तनूष्वा। एत्या।"[३] अननुनासिकम् इति किम्? "गम्भीर आँ उग्रपुत्रे। एत्या॥"[४]

टि० (क) ईयते नरा च शंसं दैव्यम्॥ सं० पा०॥ ईयते। नराशंसम्। च। दैव्यम्॥ प० पा०
ईयते नरा च शंसं दैव्यम्। नराशंसमिति नराशंसम्। चेति च॥ क्र० पा०
१०।२ के अनुसार बहुत (=चार) पदों का एक क्रम-वर्ग बना है। इस क्रम-वर्ग के मध्यवर्ती दो पदों (= नराशंसम्' तथा 'च') का प्रस्तुत सूत्र के अनुसार 'परिग्रह' किया गया है।
(ख) शुनश्चिच्छेपं निदितम्॥ सं० पा०॥ शुनःऽशेपम्। चित्। निऽदितम्॥ प० पा०
शुनश्चिच्छेपं निदितम्। शुनःशेपमिति शुनःऽशेपम्। चिदिति चित्॥ क्र० पा०
(ग) नरा वा शंसं पूषणम्॥ सं० पा०॥ नराशंसम्। वा। पूषणम्॥ प० पा०
नरा वा शंसं पूषणम्। नराशंसमिति नराशंसम्। वेति वा॥ क्र० पा०
(घ) मो षु णः॥ सं० पा०॥ मो इति। सु। नः॥ प० पा०
मो षु णः। मो इति मो। स्विति सु॥ क्र० पा०
(ङ) पुत्राय मीळ्हुषे॥ सं० पा०॥ पुत्राय मीळ्हुषे॥ प० पा०
पुत्राय मीळ्हुषे। मीळ्हुष इति मीळ्हुषे॥ क्र० पा०
'मीळ्हुषे' पद अर्धर्च के अन्त में वर्तमान है। अतः इसका 'परिग्रह' किया गया है।

---

[१] ऋ० क्र० ७।१०।२।१ [२] ऋ० क्र० ९।६५।२९
[३] ऋ० क्र० ९।६५।३० [४] ऋ० क्र० ८।६७।११

उ० भा० अ०—(अतः=इससे=) अर्धर्च के अन्तिम (पद) से; प्राक्=पहले वाले; अननुनासिकमाकारम्='अननुनासिक' आकार (को) का; न=नहीं; 'परिग्रह' करे; (अर्थात् अर्धर्च के अन्तिम पद से पहले अर्थात् अर्धर्च के मध्य में कहीं भी स्थित 'अननुनासिक' आकार का 'परिग्रह' नहीं किया जाता है)। (उदाहरण) "मन्द्रमा वरेण्यम्।"[क] "इस (अर्थात् अर्धर्च के अन्तिम पद) से पहले वाला"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "तनूष्वा। एत्या।"[ख] "अननुनासिक (आकार)"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "गभीर आँ उग्रपुत्रे। एत्या।"[ग]

## प्रत्यादायैव तं ब्रूयादुत्तरेण पुनः सह ॥११॥

**सू० अ०—उस ('अननुनासिक' आकार) का (को) दोबारा ग्रहण करके (उसका) बाद वाले (पद) के साथ पुनः उच्चारण करे।**

उ० भा०—प्रत्यादाय; तम्=अननुनासिकमाकारम्; पुनरुत्तरेणैव सह ब्रूयात्। "मन्द्रमा वरेण्यम्। आ वरेण्यम्॥"[1]

उ० भा० अ०—तम्=उसको='अननुनासिक' आकार को; प्रत्यादाय=दोबारा ग्रहण करके; पुनरुत्तरेणैव सह=फिर बाद वाले पद के ही साथ; ब्रूयात्=उच्चारण करें; (अर्थात् 'अननुनासिक' आकार को सम्बद्ध क्रम-वर्ग के मध्य में रखकर तदनन्तर उसका बाद

टि० (क) मन्द्रमा वरेण्यम्॥ सं० पा०॥ मन्द्रम्। आ। वरेण्यम्॥ प० पा०
मन्द्रमा वरेण्यम्॥ क्र० पा०

१०।८ का अपवाद। बहुत (=तीन) पदों के मध्य में स्थित 'अननुनासिक' आकार का प्रस्तुत सूत्र से 'परिग्रह' नहीं किया गया है क्योंकि यह आकार अर्धर्च के अन्तिम पद से पहले विद्यमान है। यह 'अननुनासिक' आकार अर्धर्च के अन्तिम पद से पहले अर्धर्च के मध्य में कहीं भी हो सकता है। यहाँ अव्यवहित पहले होने का प्रश्न नहीं है। सम्बद्ध अर्धर्च इस प्रकार है—

आ मन्द्रमा-वरेण्यमा विप्रमा मनीषिणम्॥ सं० पा०

(ख) तनूष्वा॥ सं० पा०॥ तनूषु। आ॥ प० पा०॥ तनूष्वा। एत्या॥ क्र० पा०

यहाँ 'अननुनासिक' आकार अर्धर्च के अन्त में विद्यमान है। अतः इस आकार का 'परिग्रह' १०।९ से किया गया है।

(ग) गभीर आँ उग्रपुत्रे॥ सं० पा०॥ गभीरे। आ। उग्रऽपुत्रे॥ प० पा०
गभीर आँ उग्रपुत्रे। एत्या॥ क्र० पा०

यहाँ अर्धर्च के अन्तिम पद से पहले आने वाले भी आकार का 'परिग्रह' १०।८ से हो गया है क्योंकि यह आकार 'अननुनासिक' न होकर 'अनुनासिक' है। सम्बद्ध अर्धर्च इस प्रकार है—

पर्षि दीने गभीर आँ उग्रपुत्रे जिघांसतः॥ सं० पा०

---

[1] ऋ० क० ९।६५।२९

वाले पद के साथ दोबारा उच्चारण किया जाता है)। (उदाहरण) "मन्द्रमा वरेण्यम्। आ वरेण्यम्।"क

( उपस्थितसंज्ञा )

## उपस्थितं सेतिकरणम् ॥१२॥

सू० अ०—'इति' शब्द सहित पद को 'उपस्थित' कहते हैं।

उ० भा०—(सेतिकरणम्=) इतिकरणयुक्तम् पदम्; तत्; (उपस्थितम्=) उपस्थितसंज्ञम्; वेदितव्यम्। "बाहू इति।"[1] उपस्थितसंज्ञायाः प्रयोजनम्—"व्ययवदृष्युपस्थिते"[2] इति ॥

उ० भा० अ०—(सेतिकरणम्=) इति 'शब्द' से युक्त (=जिस पद के बाद में 'इति' जोड़ा गया है) उस पद को; (उपस्थितम्=) 'उपस्थित'-संज्ञक; जानना चाहिये। (उदाहरण) "बाहू इति।" उपस्थित-संज्ञा का प्रयोजन--"उपस्थित में (पद) विकृत (होता है)।"

( स्थितसंज्ञा )

## केवलं तु पदं स्थितम् ॥१३॥

सू० अ०—केवल (पद) को तो 'स्थित' कहते हैं।

उ० भा०—केवलं तु पदम्=इतिकरणरहितम्; (स्थितम्=) स्थितसंज्ञम्; वेदितव्यम्। "अग्निम्।" स्थितसंज्ञायाः प्रयोजनम्—"स्थितिस्थितोपस्थितयोश्च दृश्यते पदं यथावत्"[3] इति ॥

उ० भा० अ०—केवलं तु पदम्='इति' शब्दरहित (पद) को (=जिस पद के बाद में 'इति' नहीं जोड़ा गया है उसको); (स्थितम्=) 'स्थित'-संज्ञक; जानना चाहिये। (उदाहरण) "अग्निम्।" स्थित-संज्ञा का प्रयोजन—" 'स्थित' और 'स्थितोपस्थित' अवस्थाओं में पद ठीक रूप में दिखलाई पड़ता है।

( स्थितोपस्थितसंज्ञा )

## तत्स्थितोपस्थितं नाम यत्रोभे आह संहिते ॥१४॥

सू० अ०—जहाँ (वक्ता) दोनों (='स्थित' और 'उपस्थित') का साथ-साथ उच्चारण करे वह 'स्थितोपस्थित' कहा जाता है।

उ० भा०—तत् पदं नाम स्थितोपस्थितं वेदितव्यम्। कतरत्तत्? उभे=स्थितोपस्थिते; यत्राह संहिते वक्ता—"विभावसो इति विभाऽवसो।"[4] स्थितोपस्थितसंज्ञायाः प्रयोजनम्—'स्थितिस्थितोपस्थितयोश्च दृश्यते पदं यथावत्"[5] इति ॥

टि० (क) मन्द्रमा वरेण्यम् ॥ सं० पा० ॥ मन्द्रम्। आ। वरेण्यम् ॥ प० पा०
मन्द्रमा वरेण्यम्। आ वरेण्यम् ॥ क्र० पा०

दो पदों के मध्य में उच्चारण करने के अनन्तर 'आ' का परवर्ती पद के साथ दोबारा उच्चारण प्रस्तुत सूत्र से किया गया है।

[1] ऋ० प० १।९५।७ [2] ११।६१ [3] ११।६१ [4] ऋ० प० १।४४।१० [5] ११।६१

उ० भा० अ०—तत्=उस पद को; स्थितोपस्थितम्='स्थितोपस्थित'-संज्ञक; जानना चाहिये। उसे किसको? उभे=दोनों को='स्थित' और 'उपस्थित' को; वक्ता; यत्राह संहिते=जहाँ पर साथ-साथ उच्चारण करता है; (अर्थात् जहाँ पर 'उपस्थित' तथा 'स्थित' इन दोनों को मिलाकर उच्चारण किया जाता है उस पद को 'स्थितोपस्थित' कहते हैं)। (उदाहरण) "विभावसो इति विभाऽवसो।" स्थितोपस्थित-संज्ञा का प्रयोजन—"'स्थित' और 'स्थितोपस्थित' अवस्थाओं में पद ठीक रूप में दिखलाई पड़ता है।"

(परिग्रहविषयेऽन्ये नियमाः)

**अदृष्टवर्णे प्रथमे चोदकः स्यात्प्रदर्शकः। एतदिष्टम् ॥१५॥**

(परिग्रह के विषय में अन्य नियम)

**सू० अ०—यदि प्रथम (क्रम-वर्ग) में (प्रथम पद के अन्त में कोई ऐसा) वर्ण हो जो दिखलाई नहीं देता है तो यह अभीष्ट है कि 'परिग्रह' (चोदक) (इस वर्ण को) दिखलावे।**

उ० भा०—प्रथमे द्वैपदे; (अदृष्टवर्णे=) पूर्वपदस्यान्ते वर्णेऽदृष्टे; तस्य प्रदर्शकश्चोदकः स्यात्। चोदकः=परिग्रहः—इत्यनर्थान्तरम्। "तन्नः। तदिति तत्"[1] "तं नः। तमिति तम्।"[2] "तां त्वाम्। तामिति ताम्।"[3] एतत्प्रदर्शनमिष्टम्। कस्मादिति? न पठ्यते। इष्टवचनादेवास्यानित्यत्वं गम्यते॥

उ० भा० अ०—प्रथमे=(अर्धर्च के) प्रथम द्वैपद में; (अदृष्टवर्णे=) प्रथम पद के अन्त वाले वर्ण के दिखलाई न पड़ने पर; उसका; प्रदर्शकश्चोदकः स्यात्=दिखलाने वाला 'परिग्रह' होवे; (अर्थात् अर्धर्च के प्रथम क्रम-वर्ग के प्रथम पद का अन्तिम वर्ण दिखलाई न पड़े तो उसको दिखलाने के लिए प्रथम पद का 'परिग्रह' किया जाता है)। चोदकः='परिग्रह'—ये दोनों भिन्नार्थक नहीं हैं (अर्थात् ये समानार्थक हैं)। (उदाहरण) "तन्नः। तदिति तत्।"[क] "तं नः। तमिति तम्।"[ख] तां त्वाम्। तामिति ताम्।"[ग] एतत्प्रदर्शनमिष्टम्=('परिग्रह' के द्वारा प्रथम पद के अन्तिम वर्ण का) यह प्रदर्शन अभीष्ट है। (पू०) क्यों (अभीष्ट है)? (सि०) (इस वर्ण के मूलरूप का) पाठ नहीं होता है (और इस प्रकार इसके मूलरूप के विषय में सन्देह हो सकता है)। (सूत्र में प्रयुक्त) इष्ट शब्द से ही इस (विधान की) अनित्यता ज्ञात होती है।[घ]

टि० (क) तन्नः ॥ सं० पा० ॥ तत्। नः ॥ प० पा० ॥ तन्नः। तदिति तत् ॥ क्र० पा०

(ख) तं नः ॥ सं० पा० ॥ तम्। नः ॥ प० पा० ॥ तं नः। तमिति तम् ॥ क्र० पा०

(ग) तां त्वाम् ॥ सं० पा० ॥ ताम्। त्वाम् ॥ प० पा०
तां त्वाम्। तामिति ताम् ॥ क्र० पा०

(घ) अर्थात् अर्धर्च के प्रथम द्वैपद के प्रथम पद के अन्तिम वर्ण के दिखलाई न देने पर उसको 'परिग्रह' के द्वारा दिखलाना अनिवार्य नहीं है। तथापि स्पष्टता के लिए इसको दिखलाया जावे तो अच्छा है।

[1] ऋ० क्र० १।१०७।३ [2] ऋ० क्र० २।३४।७ [3] ऋ० क्र० १।४९।४

समासाँस्तु पुनर्वचन इङ्गयेत् ॥१६॥

सू० अ०—समासों को तो ('परिग्रह' के) द्वितीय वचन में 'अवग्रह' के द्वारा पृथक् करे।

उ० भा०—समासास्तु=अवगृह्याणि पदानि। तानि च; पुनर्वचने=परिग्रहस्य द्वितीये वचने; इङ्गयेत्=अवगृह्णीयात्। "पुरोजिती वः। पुरोजितीति पुरःऽजिती ॥"[1]

उ० भा० अ०—समासास्तु=अवगृह्य पद (=पद-पाठ में 'अवग्रह' से पृथक किए जाने वाले पद); उनको भी; पुनर्वचने='परिग्रह' के द्वितीय वचन[क] में; इङ्गयेत्='अवग्रह' के द्वारा पृथक् करे।[ख] (उदाहरण) "पुरोजिती वः। पुरोजितीति पुरःऽजिती।"[ग]

इतिपूर्वेषु संधानं पूर्वैः स्वः स्यादसंहितम्।
तदवग्रहवद् ब्रूयात् ॥१७॥

सू० अ०—प्राचीन (आचार्यों) ने 'इति' से बाद में आने वाले पदों में संधि को (अभीष्ट माना है)। किंतु 'स्वः' की (पूर्ववर्ती 'इति' के साथ) संधि नहीं होती है। इसको 'अवग्रह' के समान उच्चारण किया जाता है।

उ० भा०—इतिपूर्वेषु पदेषु=परिग्रहे क्रियमाणे य इतिपूर्वास् तेषु; इतिना संधानं पूर्वैः आचार्यैरिष्टम्। अस्माकमपि। स्वः इतीदं पदम् असंहितं स्यात्। आचार्यग्रहणं पूजार्थम्। असंहितमिति यथेतिकरणान्तो निघातं न प्राप्नुयात्स्वरिति प्रत्यये। तदवग्रहवद् ब्रूयात्=अवग्रहवदिति यथा मात्राकालोऽन्तरं स्यात्—"स्व१ँरिति स्वः" ॥[2]

उ० भा० अ०—इतिपूर्वेषु='इति' है पूर्व में जिनके ऐसे पदों में='परिग्रह' करने पर जो 'इति' के बाद में पद हों उनमें; 'इति' के साथ; संधानम्=संधि; पूर्वैः=प्राचीन; आचार्यों के द्वारा मानी गयी है; (अर्थात् प्राचीन आचार्यों का मत है कि 'परिग्रह' में प्रयुक्त 'इति' पद की परवर्ती पद के साथ संधि हो जाती है)। हमारा भी (यही मत है)। स्वः='स्वः' यह पद; असंहितं स्यात्=संधि को प्राप्त नहीं होता है; (अर्थात् 'स्वः' पद की पूर्ववर्ती 'इति' के साथ संधि नहीं होती है)। 'आचार्य' (शब्द) का ग्रहण सम्मान प्रकट करने के लिए किया गया है। (सूत्र में) 'असंहितम्' (संधि को प्राप्त नहीं होता है) (इसलिए कहा गया है) जिससे 'इति' शब्द का अन्त (=अन्तिम 'अक्षर'='इ'), 'स्वः' (पद) परे रहते,

टि० (क) 'परिग्रह' के द्वितीय वचन के लिए पृ० ४७ पर टि० (ख) देखिए।

(ख) पद-पाठ में जिन पदों को 'अवग्रह' के द्वारा पृथक् किया जाता है उनका 'परिग्रह' १०।७ से किया जाता है। ऐसे पदों के 'परिग्रह' करने की यह पद्धति है कि 'इति' से पूर्व में अवगृह्य पद का संहिता-रूप दिया जाता है और 'इति' के बाद में उच्चारित होने वाले रूप को 'अवग्रह' के द्वारा पृथक् किया जाता है।

(ग) पुरोजिती वः ॥ सं० पा० ॥ पुरःऽजिती। वः ॥ प० पा०।
पुरोजिती वः। पुरोजितीति पुरःऽजिती ॥ क्र० पा०

---

[1] ऋ० क्र० ९।१०।११ [2] ऋ० प० १।५२।१२

'अनुदात्त' ('निघात') न होवे। तदवग्रहवद् ब्रूयात्=उसका 'अवग्रह' के समान उच्चारण करना चाहिए। (सूत्र में) " 'अवग्रह' की तरह" (कहा गया है) जिससे ('इति' और 'स्वः' के मध्य में) मात्राकाल ('अवग्रह' का काल) का व्यवधान होवे—"स्व१रिति स्वः।"क

(क्रमपाठेऽर्धर्चयोः संधिनिषेधः)

## संधिर्नार्धर्चयोर्भवेत् ॥१८॥

(क्रम-पाठ में अर्धर्चों की संधि का निषेध)

सू० अ०—दो अर्धर्चों की संधि न होवे।

उ० भा०—अस्मिन्क्रमविधाने अर्धर्चयोः संधिर्न भवेत्। केन प्राप्तावयं प्रतिषेध आरभ्यते। "दृष्टक्रमत्वात्समयान् संदध्यात्सर्वशः क्रमे"[1] इति प्राप्ते॥

उ० भा० अ०—इस क्रम-विधान में; अर्धर्चयोः संधिर्न भवेत्=दो अर्धर्चों की संधि न होवे। किससे प्राप्त होने पर यह प्रतिषेध किया जा रहा है? (उत्तर) "क्रम-पाठ के (पहले ही) दिखलाई पड़ने से 'समय'-संज्ञक पदों को क्रम-पाठ में पूर्णतया एक साथ मिलावे" इससे प्राप्त होने पर।

(क्रमपाठे समयैः सह संधेः प्रकारः)

## दृष्टक्रमत्वात्समयान्संदध्यात्सर्वशः क्रमे।
## पदेन च पदाभ्यां च प्रागवस्येदतीत्य च ॥१९॥

(क्रम-पाठ में समय के साथ संधि का प्रकार)

सू० अ०—'समय'-संज्ञक पदों को क्रम-पाठ में पूर्णतया एक साथ मिला देना चाहिए क्योंकि उनका क्रम-पाठ (पहले ही) दिखाई पड़ता है। ('समय' से) पहले (क्रम-वर्ग का) ('समय' के) एक पद से (अवसान करे) और ('समय' का) अतिक्रमण करके (परवर्ती) दो पदों से (क्रम-वर्ग का) अवसान करे।

उ० भा०—दृष्टक्रमत्वात् हेतोः समयान् संदध्यात्सर्वशः क्रमे। पदेन च (प्राक्)=समयं प्राप्य पदेनावस्येत्। समयम् अतीत्य पदाभ्यामवस्येत्। "प्रप्र वः। प्रप्रेति प्रऽप्र। वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे।"[2] "योनिष्ट इन्द्र सदने अकारि। अकारि तमा नृभिः पुरुहूत।"[3] दृष्टक्रमत्वात् इति हेतुसामान्ये सत्यपि—"अग्नेर्वयं प्रथमस्या-

टि० (क) यदि पूर्ववर्ती 'इति' के साथ 'स्वः' की संधि होती तो 'इति' का 'ति', 'स्वरित' से पूर्व में होने के कारण, ३।२१ से 'अनुदात्त' हो जाता जिससे यह रूप सम्पन्न होता -"स्व१रिति स्वः" किंतु यह रूप संहिता-पाठ में उपलब्ध नहीं है। अतः प्रस्तुत सूत्र में यह विधान किया गया है कि 'स्वः' की पूर्ववर्ती 'इति' के साथ संधि नहीं होती है।

---

[1] १०।१९ [2] ऋ० क्र० ८।६९।१ [3] ऋ० क्र० ७।२४।१

मृतानाम्"[1]—इत्येवमादीनामनुदृष्टानां सवशः संदध्यात् इति तन्नोपपद्यते। कस्मात्? समयसंज्ञाया अभावात् ॥

उ० भा० अ०—**दृष्टक्रमत्वात्**=क्रम-पाठ के (पहले ही) दिखलाई पड़ने के कारण; **समयान् संदध्यात्सर्वशः क्रमे**='समय'-संज्ञक[क] पदों को क्रम-पाठ में पूर्णतया एक साथ मिला देना चाहिए। **पदेन च (प्राक्)**='समय' को प्राप्त करके पद के द्वारा (क्रम-वर्ग का) अवसान करे। **अतीत्य**='समय' का अतिक्रमण करके; **पद्भ्यामवस्येत्**=(परवर्ती) दो पदों के द्वारा (क्रम-वर्ग का) अवसान करे। (उदाहरण) "प्रप्र वः। प्रप्रेति प्रऽप्र। वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे।"[ख] "योनिष्ट इन्द्र सदने अकारि। अकारि तमा नृभिः पुरुहूत।"[ग] "क्रम-पाठ के (पहले ही) दिखलाई पड़ने से"—यह हेतु समान रूप से होने पर भी—"अग्नेर्वयं प्रथमस्यामृतानाम्" इत्यादि पुनरुक्त (पदों) में

टि० (क) तीन अथवा तीन से अधिक पदों का समूह जब संहिता में एक से अधिक बार आया हो तो प्रथम स्थल को छोड़कर अन्यत्र उसको 'समय' अथवा 'गलित पद' कहते हैं। परम्परा के अनुसार 'समय'-संज्ञक पदों का पद-पाठ नहीं किया जाता है किंतु मुद्रित ऋक्संहिताओं में तो स्पष्टार्थ इनका पद-पाठ किया गया है।

(ख) प्रप्र वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे ॥ सं० पा०
प्रऽप्र। वः। त्रिऽस्तुभम्। इषम्। मन्दत्ऽवीराय। इन्दवे ॥ प० पा०
प्रऽप्र। वस्त्रिष्टुभमिषम्। मन्दत्ऽवीराय। इन्दवे ॥प०पा०॥ परम्परा के अनुसार
प्रप्र वः। प्रप्रेति प्रऽप्र। वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे ॥ क्र० पा०

"वस्त्रिष्टुभमिषम्" ('वः', 'त्रिऽस्तुभम्' और 'इषम्') ये तीन पद 'समय'-संज्ञक हैं जो ऋग्वेद की मुद्रित संहिता में इसके पहले नहीं मिलते; अन्य शाखा में मिल सकते हैं। 'समय'-संज्ञक पदों का क्रम-पाठ सामान्य नियम के अनुसार दो-दो पदों के द्वारा नहीं किया गया है अपितु इनको एक साथ मिला दिया गया है। 'समय' के पूर्ववर्ती क्रम-वर्ग का अवसान 'समय' के एक पद ('वः')के द्वारा किया गया है और दूसरे क्रम-वर्ग का अवसान 'समय' के बाद वाले दो पदों ('मन्दद्वीराय' और 'इन्दवे') के द्वारा किया गया है। 'प्रप्र' का 'परिग्रह' तो १०।७ से किया गया है।

(ग) योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत ॥ सं० पा०
योनिः। ते। इन्द्र। सदने। अकारि। तम्। आ। नृऽभिः। पुरुऽहूत ॥ प० पा०
योनिष्ट इन्द्र। सदने। अकारि तमा। नृऽभिः। पुरुहूत ॥ प० पा० ॥ परम्परा के अनुसार।
योनिष्ट इन्द्र सदने अकारि। अकारि तमा नृभिः पुरुहूत ॥ क्र० पा०

यहाँ "योनिष्ट इन्द्र" (योनिः, ते, इन्द्र) और "अकारि तमा" (अकारि, तम्, आ) ये दो पद-समूह 'समय'-संज्ञक हैं। ये दोनों पद-समूह ऋ०१।१०४।१ में आ चुके हैं।

[1] ऋ० १।२४।२

पूर्णतया एक साथ मिला देना चाहिए"—यह लागू नहीं होता है। (पू०) क्यों? (सि०) समय-संज्ञा का अभाव होने से।[क]

(परिग्रहे संधिविशेषाणां प्रकृतिभावः)

**नकारस्योष्मवद्वृत्तं प्लुतोपाचरिते नतिः।**
**प्रश्लेषश्च प्रगृह्यस्य प्रकृत्या स्युः परिग्रहे ॥२०॥**

(परिग्रह में संधिविशेषों का प्रकृतिभाव)

सू० अ० – (१) नकार का विसर्जनीय ('ऊष्मन्') की तरह वर्तन (व्यवहार), (२) 'ह्रस्व' 'स्वर' का 'दीर्घ' होना ('प्लुत'), (३) विसर्जनीय का सकार होना ('उपाचरित'), (४) 'दन्त्य' वर्ण का 'मूर्धन्य' होना ('नति') और (५) 'प्रगृह्य' (स्वरों) का 'प्रश्लेष'—ये (उपर्युक्त) 'परिग्रह' में 'प्रकृतिभाव' से (अर्थात् मूल-रूप में) रहते हैं।

उ० भा०—नकारस्य यत् ऊष्मवद्वृत्तम्; (प्लुतोपाचरिते) प्लुतश्चोपाचरितश्च; नतिः च प्रश्लेषश्च प्रगृह्यस्य यः—एतानि सर्वाणि प्रकृत्या; (स्युः) भवन्ति; परिग्रहे क्रियमाणे।

नकारस्योष्मवद्वृत्तम्—"अस्माँ अस्माँ इत्। अस्मानस्मानित्यस्मान्ऽअस्मान्।"[१] "अभीशूँरिव सारथिः। अभीशूनिवेत्यभीशून्ऽइव।"[२] "विभ्राजमानाँश्चमसान्। विभ्राजमानानिति विऽभ्राजमानान्।"[३] "आवदँस्त्वम्। आवदन्नित्याऽवदन्।"[४] "स्वतवाँः पायुः। स्वतवानिति स्वऽतवान्॥"[५]

उ० भा० अ०—**नकारस्योष्मवद्वृत्तम्**=नकार का विसर्जनीय ('ऊष्मन्') के समान जो वर्तन (व्यवहार) है वह; (**प्लुतोपाचरिते**=) 'ह्रस्व' 'स्वर' का 'दीर्घ' होना ('प्लुत') और विसर्जनीय का सकार होना ('उपाचरित'); **नतिः**='दन्त्य' वर्ण का 'मूर्धन्य' होना; **प्रश्लेषश्च प्रगृह्यस्य**='प्रगृह्य' का जो 'प्रश्लेष' है—ये सब; **परिग्रहे**='परिग्रह' करने पर (='परिग्रह' में); **प्रकृत्या(स्युः)**='प्रकृति भाव' से रहते हैं (अर्थात् 'परिग्रह' में इन सबका मूल-रूप दिखलाया जाता है)।

टि० (क) तीन अथवा तीन से अधिक पद पुनरुक्त होने पर भी सर्वदा 'समय'-संज्ञक नहीं होते हैं। कौन पुनरुक्त पद-समूह 'समय'-संज्ञक है और कौन नहीं—इसमें केवल परम्परा ही नियामक है। ऋग्वेद के 'समय'-संज्ञक पदों का उल्लेख लक्ष्मीवरसूरिविरचित 'गलितप्रदीप' नामक ग्रन्थ में किया गया है। "अग्नेर्वयं प्रथमस्यामृतानाम्" यह पद-समूह 'समय'-संज्ञक नहीं है। अतः यहाँ सामान्य-नियम के अनुसार दो-दो पदों से क्रम-वर्ग इस प्रकार होंगे—

अग्नेर्वयम्। वयं प्रथमस्य। प्रथमस्यामृतानाम्॥

[१] ऋ० क्र० ४।३२।४ [२] ऋ० क्र० ६।५७।६ [३] ऋ० क्र० ४।३३।६
[४] ऋ० क्र० २।४३।३ [५] ऋ० क्र० ४।२।६

नकार का विसर्जनीय ('ऊष्मन्') के समान वर्तन (व्यवहार) होना[क]— "अस्माँअस्मा इत् । अस्मानस्मानित्यस्मान्ऽअस्मान् ।"[ख] "अभीशूँरिव सारथिः । अभीशूनिवेत्यभीशून्ऽइव ।"[ग] "विभ्राजमानाँश्चमसान् । विभ्राजमानानिति विऽभ्राजमानान् ।"[घ] "आवदँस्त्वम् । आवदन्नित्याऽवदन् ।"[ङ] "स्वतवाँ पायुः : स्वतवानिति स्वऽतवान् ।"[च]

उ० भा०—प्लुतः—"मक्षूमक्षू कृणुहि । मक्षुमक्ष्विति मक्षुऽमक्षु ।"[१]

उपाचरितः—"ज्योतिष्कृदसि । ज्योतिःकृदिति ज्योतिःऽकृत् ।"[२]

नतिः—"सुषुमा यातम् । सुसुमेति सुसुम ।"[३] "पितृयाणं द्युमत् ।" "पितृयानमिति पितृऽयानम् ।"[४]

प्रगृह्यस्य प्रश्लेषः—"दम्पतीव क्रतुविदा । दम्पतीइवेति दम्पतीऽइव ।"[५] प्रगृह्यस्य—इति किम् ? "इवक्नीव यः । इवक्नीवेति इवक्नीऽइव ॥"[६]

टि० (क) चतुर्थ पटल (४।६५-४।८०) में विहित नकार-विकारों के प्रसङ्ग में नकार के तीन प्रकार के विकार बतलाये गये हैं—(१) नकार का लोप होना (४।६५-४।६७) (२) नकार का रेफ होना (४।६९-४।७२) (३) नकार का विसर्जनीय ('ऊष्मन्') के समान होना (४।७४-४।८०)। इससे स्पष्ट होता है कि चतुर्थ पटल में ये तीनों स्थल पृथक्-पृथक् हैं किंतु प्रस्तुत सूत्र में विहित 'नकार का विसर्जनीय ('ऊष्मन्') के समान होना" में इन तीनों का अन्तर्भाव होता है जैसा कि उदाहरणों से भी स्पष्ट है।

(ख) अस्माँअस्मा इत् ॥ सं० पा० ॥ अस्मान्ऽअस्मान् । इत् ॥ प० पा०
अस्माँअस्मा इत् । अस्मानस्मानित्यस्मान्ऽस्मान् ॥ क्र० पा०

(ग) अभीशूँरिव सारथिः । सं० पा० ॥ अभीशून्ऽइव सारथिः ॥ प० पा०
अभीशूँरिव सारथिः । अभीशूनिवेत्यभीशून्ऽइव ॥ क्र० पा०

(घ) विभ्राजमानाँश्चमसान् ॥ सं० पा० ॥ विऽभ्राजमानान् । चमसान् ॥ प० पा०
विभ्राजमानाँश्चमसान् । विभ्राजमानानिति विऽभ्राजमानान् ॥ क्र० पा०

(ङ) आवदँस्त्वम् ॥ सं० पा० ॥ आऽवदन् । त्वम् ॥ प० पा०
आवदँस्त्वम् । आवदन्नित्याऽवदन् ॥ क्र० पा०

(च) स्वतवाँः पायुः ॥ सं० पा० ॥ स्वऽतवान् । पायुः ॥ प० पा०
स्वतवाँ पायुः । स्वतवानिति स्वऽतवान् ॥ क्र० पा०

'अस्मान्', 'अभीशून्', 'विभ्राजमानान्', 'आवदन्' और 'स्वतवान्' के नकार वर्ण का क्रमशः लोप, रेफ, शकार, सकार और विसर्जनीय क्रमशः ४।६५, ४।७०, ४।७४, ४।७६ और ४।७८ से हो गया है। सर्वत्र 'परिग्रह' में मूल-रूप (नकार) को दिखलाया गया है।

---

[१] ऋ० क्र० ३।३१।२० [२] ऋ० क्र० १।५०।४ [३] ऋ० क्र० १।१३७।१
[४] ऋ० क्र० १०।२।७ [५] ऋ० क्र० २।३९।२ [६] ऋ० क्र० २।१२।४

उ० मा० अ०—प्लुत—"मक्षूमक्षू कृणुहि । मक्षुमक्ष्विति मक्षुऽमक्षु ।"क

उपाचरित—"ज्योतिष्कृदसि । ज्योतिःकृदिति ज्योतिःऽकृत ।ख

नति—"सुषुमा यातम् । सुसुमेति सुसुम ।"ग "पितृयाणं द्युमत् । पितृयानमिति पितृऽयानम् ।"घ

प्रगृह्य ('स्वर') का प्रश्लेष—"दम्पतीव क्रतुविदा । दम्पतीइवेति दम्पतीऽइव ।"ङ "प्रगृह्य(—'स्वर') का प्रश्लेष"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "श्वघ्नीव यः । श्वघ्नीवेति श्वघ्नीऽइव ।" च

टि० (क) मक्षूमक्षू कृणुहि ॥ सं० पा० ॥ मक्षुऽमक्षु । कृणुहि ॥ प० पा०
मक्षूमक्षू कृणुहि । **मक्षुमक्ष्विति मक्षुऽमक्षु** ॥ क्र० पा०

'मक्षु' का उकार ७।५ से 'दीर्घ' हो गया है । प्रस्तुत सूत्र के अनुसार 'परिग्रह' में मूल-रूप (=उकार) को ही दिखलाया गया है ।

(ख) ज्योतिष्कृदसि ॥ सं० पा० ॥ ज्योतिःऽकृत् । असि ॥ प० पा०
ज्योतिष्कृदसि । **ज्योतिःकृदिति ज्योतिःऽकृत्** ॥ क्र० पा०

'ज्योतिः' का विसर्जनीय ४।४७ से षकार हो गया है । 'परिग्रह' में मूल-रूप (=विसर्जनीय) को ही दिखलाया गया है ।

(ग) सुषुमा यातम् ॥ सं० पा० ॥ सुसुम । आ । यातम् ॥ प० पा०
सुषुमा यातम् । **सुसुमेति सुसुम** ॥ क्र० पा०

'सुसुम' का द्वितीय सकार ५।२० से षकार हो गया है । 'परिग्रह' में मूल-रूप (=सकार) को ही दिखलाया गया है ।

(घ) पितृयाणं द्युमत् ॥ सं० पा० ॥ पितृऽयानम् । द्युऽमत् ॥ प० पा०
पितृयाणं द्युमत् । **पितृयानमिति पितृऽयानम्** ॥ क्र० पा०

'पितृयानम्' का नकार ५।४० से णकार हो गया है । 'परिग्रह' में मूल-रूप (=नकार) को ही दिखलाया गया है ।

(ङ) दम्पतीव क्रतुविदा ॥ सं० पा० ॥ दम्पतीइवेति दम्पतीऽइव । क्रतुऽविदा ॥ प० पा०
दम्पतीव क्रतुविदा । **दम्पतीइवेति दम्पतीऽइव** ॥ क्र० पा०

यहाँ पर 'दम्पती' के 'प्रगृह्य' ईकार का २।५५ से परवर्ती इकार के साथ 'प्रश्लेष' हो गया है । 'परिग्रह' में मूल-रूप (=ईकार) को ही दिखलाया गया है ।

(च) श्वघ्नीव यः ॥ सं० पा० ॥ श्वघ्नीऽइव । यः ॥ प० पा०
श्वघ्नीव यः । **श्वघ्नीवेति श्वघ्नीऽइव** ॥ क्र० पा०

'श्वघ्नी' का ईकार 'प्रगृह्य'-संज्ञक नहीं है । अतः परवर्ती इकार के साथ 'प्रश्लेष' होने पर भी इसके मूल-रूप को 'परिग्रह' में नहीं दिखलाया गया है ।

## शौद्धाक्षरागमोऽपैति ॥२१॥

सू० अ०—'शौद्धाक्षर'(-संज्ञक) आगम ('परिग्रह' में) लुप्त हो जाता है।

उ० भा०—(शौद्धाक्षरागमः=) शौद्धाक्षराणां संधीनामागमः; य उक्तः सः अपैति परिग्रहे क्रियमाणे। "पुरुश्चन्द्रं यजतम्। पुरुचन्द्रमिति पुरुऽचन्द्रम्।"[१] "वनर्षदो वायवः। वनसद इति वनऽसदः॥"[२]

उ० भा० अ०—(शौद्धाक्षरागमः=) 'शौद्धाक्षर'-संधियों का आगम; जो (४।८४-८९ में) कहा गया था वह; अपैति=लुप्त हो जाता है; 'परिग्रह' करने पर। (उदाहरण) "पुरुश्चन्द्रं यजतम्। पुरुचन्द्रमिति पुरुऽचन्द्रम्।"[क] "वनर्षदो वायवः। वनसद इति वनऽसदः।"[ख]

## न्यायं यान्त्युत्तरे त्रयः।
## रिफितान्यूष्मणोऽघोषे दूभावः स्वधितीव च ॥२२॥

सू० अ०—ये आगे (बतलाई जाने) वाली तीन (संधियाँ भी) अपने मूल-रूप (प्रकृति) को प्राप्त होती हैं—(१) 'अघोष' ('व्यञ्जन') बाद में होने पर 'ऊष्मन्' के स्थान पर आने वाले रिफित, (२) 'दू' में परिवर्तन और (३) 'स्वधितीव' पद।

उ० भा०—न्यायं यान्ति=प्रकृतिं गच्छन्ति-इत्यर्थः। उत्तरे त्रयः संधयः परिग्रहे क्रियमाणे—रिफितानि च ऊष्मणो यानि अघोषे प्रत्यये; दूभावः च; स्वधितीव इति च पदम्। अघोषे रिफितानि—"स्वर्चक्षा रथिरः। स्वश्चक्षा इति स्वःऽचक्षाः।"[३] "धूर्षदं वनर्षदम्। धूःसदमिति धूःऽसदम्।"[४] "स्वर्पतिं यत्। स्वःपतिमिति स्वःऽपतिम्।"[५] दूभावः—"दूणाशं सख्यम्। दुर्नशमिति दुःऽनशम्।"[६] "जनस्य दूढ्यः। दुर्ध्य इति दुःऽध्यः।"[७] "दूळभो रथः। दुर्दभ इति दुःऽदभः।"[८] स्वधितीव—"स्वधितीव रीयते। स्वधितिरिवेति

टि० (क) पुरुश्चन्द्रं यजतम् ॥ सं० पा० ॥ पुरुऽचन्द्रम्। यजतम् ॥ प० पा०
पुरुश्चन्द्रं यजतम्। पुरुचन्द्रमिति पुरुऽचन्द्रम् ॥ क्र० पा०
४।८४ से 'पुरु' और 'चन्द्रम्' के मध्य में 'शौद्धाक्षर'-संज्ञक शकार का आगम हो गया है। 'परिग्रह' में इस शकार का लोप करके मूल रूप को ही दिखलाया जाता है।

(ख) वनर्षदो वायवः ॥ सं० पा० ॥ वनऽसदः। वायवः ॥ प० पा०
वनर्षदो वायवः। वनसद इति वनऽसदः ॥ क्र० पा०
४।८६ से 'वन' और 'सद' के मध्य में 'शौद्धाक्षर'-संज्ञक रेफ का आगम हो गया है। 'परिग्रह' में इस रेफ का लोप करके मूल-रूप को ही दिखलाया जाता है।

---

[१] ऋ० क्र० ५।८।१ [२] ऋ० क्र० १०।४६।७ [३] ऋ० क्र० ९।९७।४६
[४] ऋ० क्र० १०।१३२।७ [५] ऋ० क्र० ८।९७।११ [६] ऋ० क्र० ६।४५।२६
[७] ऋ० क्र० ८।१९।१५ [८] ऋ० क्र० ४।९।८

स्वधितिःऽइव ।"[१] अघोषे इति किम् ? "स्वर्जितं महि । स्वर्जितमिति स्वःऽजितम् ।"[२] अपर इदं सूत्रं योगविभागेन वर्णयन्ति ॥

उ० भा० अ०—**उत्तरे त्रयः**=आगे बतलाई जाने वाली तीन संधियाँ; 'परिग्रह' करने पर; **त्यायं यान्ति**=प्रकृति (=मूल-रूप) को प्राप्त होती हैं—यह अर्थ है। **अघोषे**='अघोष' ('व्यञ्जन') बाद में होने पर; **ऊष्मणो रिफितानि**=विसर्जनीय ('ऊष्मन्') के स्थान पर आनेवाले जो रिफित हैं वे; **दूभावः**='दू' में परिवर्तन; **स्वधितीव च**=और 'स्वधितीव' पद । . **'अघोष' ('व्यञ्जन') बाद में होने पर रिफित**—"स्वर्चक्षा रथिरः । स्वश्चक्षा इति स्वःऽचक्षाः"[क]; "धूर्षदं वनर्षदम् । धूःसदमिति धूःऽसदम् ।"[ख] "स्वर्पतिं यत् । स्वःपतिमिति स्वःऽपतिम् ।"[ग] **'दू' में परिवर्तन**—"दूणाशं सख्यम् । दुर्नशनमिति दुःऽनशम्"[घ]; "जनस्य दूढ्यः । दुर्ध्यं इति दुःऽध्यः"[ङ]; "दूळभो रथः । दुर्दभ इति दुःऽदभः ।"[च] **स्वधितीव**—"स्वधितीव रीयते । स्वधितिरिवेति स्वधितिःऽइव ।"[छ] "**'अघोष' 'व्यञ्जन' बाद में होने पर**"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "स्वर्जितं महि । स्वर्जितमिति स्वःऽजितम् ।"[ज]

टि० (क) स्वर्चक्षा रथिरः ॥ सं० पा० ॥ स्वःऽचक्षाः । रथिरः ॥ प० पा०
स्वर्चक्षा रथिरः । **स्वश्चक्षा इति स्वःऽचक्षाः** ॥ क्र० पा०

(ख) धूर्षदं वनर्षदम् ॥ सं० पा० ॥ धूःऽसदम् । वनऽसदम् ॥ प० पा०
धूर्षदं वनर्षदम् । **धूःसदमिति धूःऽसदम्** ॥ क्र० पा०

(ग) स्वर्पतिं यत् ॥ सं० पा० ॥ स्वःऽपतिम् । यत् ॥ प० पा०
स्वर्पतिं यत् । **स्वःपतिमिति स्वःऽपतिम्** ॥ क्र० पा०

उपर्युक्त तीनों उदाहरणों में 'अघोष' 'व्यञ्जन' बाद में होने पर विसर्जनीय संहिता-पाठ में रेफ हो गया है । अतः प्रस्तुत सूत्र से 'परिग्रह' में तीनों स्थलों के मूल-रूप को दिखलाया गया है ।

(घ) दूणाशं सख्यम् ॥ सं० पा० ॥ दुःऽनशम् । सख्यम् ॥ प० पा०
दूणाशं सख्यम् । **दुर्नशमिति दुःऽनशम्** ॥ क्र० पा०

(ङ) जनस्य दूढ्यः ॥ सं० पा० ॥ जनस्य । दुःऽध्यः ॥ प० पा०
जनस्य दूढ्यः । **दुर्ध्यं इति दुःऽध्यः** ॥ क्र० पा०

(च) दूळभो रथः ॥ सं० पा० ॥ दुःऽदभः । रथः ॥ प० पा०
दूळभो रथः । **दुर्दभ इति दुःऽदभः** ॥ क्र० पा०

उपर्युक्त तीनों स्थलों पर 'दुर्' संहिता-पाठ में 'दू' हो गया है । अतः 'परिग्रह' में तीनों स्थलों के मूल-रूप को दिखलाया गया है ।

(छ) स्वधितीव रीयते ॥ सं० पा० ॥ स्वधितिःऽइव । रीयते ॥ प० पा०
स्वधितीव रीयते । **स्वधितिरिवेति स्वधितिःऽइव** ॥ क्र० पा०

४।४० के अनुसार 'स्वधितिःऽइव' निपातन से 'स्वधितीव' हो गया है । प्रस्तुत सूत्र के अनुसार 'परिग्रह' में 'स्वधितीव' के मूल-रूप को ही दिखलाया गया है ।

(ज) स्वर्जितं महि ॥सं० पा०॥ स्वःऽजितम् । महि ॥ प० पा०

---

[१] ऋ० क्र० ५।७।८ [२] ऋ० क्र० १०।१६७।२

दूसरे इस सूत्र की व्याख्या योग-विभाग करके इस प्रकार करते हैं—

**न्यायं यान्त्युत्तरे त्रयः ॥**

**सू० अ०—परवर्ती तीन ( संधियाँ ) अपने मूल-रूप ( न्याय ) को प्राप्त कर लेती हैं।**

उ० भा०—शौद्धाक्षरागमात् **उत्तरे त्रयः** संधयः; (न्यायम्=) प्रकृतिम्; **यान्ति** परिग्रहे क्रियमाणे। कतरे त्रयः ? जुघुक्षत इति घक्षिघुक्षिप्रवादौ च। "न जुगुक्षतः। जुघुक्षत इति जुघुक्षतः।"[१] "अनु दक्षि। दक्षि दावने। घक्षीति घक्षि।"[२] "दुक्षन्वृधे। घुक्षन्निति घुक्षन्।"[३] योगविभागावृते परिग्रह एतेषां प्रकृतिभावो न सिध्यति। योगविभागे ह्यसत्युत्तरे त्रय इति ग्रहणमनर्थकं भवति ॥

उ० भा० अ०—'शौद्धाक्षर' (-संज्ञक) आगम (४।८९) से; **उत्तरे**=बाद वाली; **त्रयः**=तीन संधियाँ; (**न्यायम्**=) मूल-रूप (प्रकृति) को; **यान्ति**=प्राप्त हो जाती हैं; 'परिग्रह' करने पर। कौन सी तीन? (उत्तर) 'जुघुक्षतः' और 'घक्षि' तथा 'घुक्षि' के सभी रूप। "न जुगुक्षतः। जुघुक्षत इति जुघुक्षतः।"[क] "अनु दक्षि। दक्षि दावने। घक्षीति घक्षि।"[ख] "दुक्षन्वृधे। घुक्षन्निति घुक्षन्।"[ग] (सूत्र के) योग का विभाग किये बिना 'परिग्रह' में इन (तीन) का प्रकृति-रूप में होना सिद्ध नहीं होता है। योग-विभाग न किया जाये तो (सूत्र में) "बाद वाली तीन ( संधियाँ )"—यह ग्रहण करना अनर्थक होगा।

(५८६ज) स्वर्जितं महि। **स्वर्जितमिति स्वःऽजितम्** ॥ क्र० पा०

यहाँ पर विसर्जनीय का रेफ में परिवर्तन 'अघोष' 'व्यञ्जन' बाद में होने पर नहीं अपितु 'सघोष' 'व्यञ्जन' बाद में होने पर हुआ है। अतः 'परिग्रह' में 'स्वर्जितम्' का मल-रूप नहीं दिखलाया गया है।

टि० (क) न जुगुक्षतः ॥सं० पा०॥ न। जुघुक्षतः ॥ प० पा०

न जुगुक्षतः। **जुघुक्षत इति जुघुक्षतः** ॥ क्र० पा०

४।९८ से 'जुघुक्षतः' का घकार संहिता-पाठ में गकार हो जाता है। प्रस्तुत सूत्र के अनुसार 'परिग्रह' में मूल-रूप (=जुघुक्षतः) को ही दिखलाया गया है।

(ख) अनु दक्षि दावने ॥सं० पा०॥ अनु। घक्षि। दावने ॥ प० पा०

अनु दक्षि। दक्षि दावने। **घक्षीति घक्षि** ॥ क्र० पा०

(ग) दुक्षन्वृधे ॥सं० पा०॥ घुक्षन्। वृधे ॥ प० पा०

दुक्षन्वृधे। **घुक्षन्निति घुक्षन्** ॥ क्र० पा०

४।८९ के अनुसार 'घक्षि' और 'घुक्षन्' का घकार दकार हो जाता है। प्रस्तुत सूत्र के अनुसार 'परिग्रह' में मूल-रूप (='घक्षि' और 'घुक्षन्') को ही दिखलाया जाता है।

---

[१] ऋ० क्र० ८।३१।७ [२] ऋ० क्र० २।१।१० [३] ऋ० क्र० १।१२१।८

रिफितान्यूष्मणोऽघोषे दूभावः स्वधितीव च ।

सू० अ०—'अघोष' ('व्यञ्जन') बाद में होने पर 'ऊष्मन्' के स्थान पर आने वाले रिफित, 'दू' में परिवर्तन और 'स्वधितीव' पद [ये 'परिग्रह' में अपने मूल-रूप (प्रकृति) को प्राप्त होते हैं]।

उ० भा०—इति यथोक्तमेवेति ॥

इति श्रीपार्षद्व्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्रउवटकृतौ
प्रातिशाख्यभाष्ये क्रमपटलं दशमम् ॥

उ० भा० अ०—जैसा पहले कहा गया है वैसा ही होता है ।

आनन्दपुर निवासी वज्रट के पुत्र उवट की कृति पार्षदव्याख्यात्मक प्रातिशाख्य-
भाष्य में क्रम-पटल नामक दशम (पटल) समाप्त हुआ ॥

---

## ११ : क्रम-हेतु-पटलम्

क्रमपाठस्य सामान्यस्वरूपम्
क्रमपाठे पदविशेषाणामतिक्रमणे कारणानि, अतिक्रमणे मतभेदाश्च
क्रमपाठे विकृतरूपविषयकनियमः
क्रमपाठे समयैः सह संधेः प्रकारः
क्रमपाठे पदविशेषाणां परिग्रहः
स्थितसंज्ञा
उपस्थितसंज्ञा
स्थितोपस्थितसंज्ञा
परिग्रहविषयेऽन्ये नियमाः
परिग्रहविषयेऽपवादः
यदृच्छोपनते बहुक्रमे कश्चित् विशेषः
परिग्रहे संधिविशेषाणां प्रकृतिभावः
क्रमपाठे विकृतरूपविषयकनियमः (पूर्वानुवृत्तः)
परिग्रहे संधिविशेषाणां प्रकृतिभावः (पूर्वानुवृत्तः)
बहुक्रममन्तरेण आर्षीलोपापत्तेः स्थलानि
आर्षीलोपविषये मतभेदः
परिग्रहस्योपयोगः
शास्त्रविहितक्रमपाठस्य प्रशंसा
आक्षेपनिरसनपूर्वकं क्रमपाठस्यार्थवत्त्वनिरूपणम्

(क्रमपाठस्य सामान्यस्वरूपम्)

**अथार्ष्यलोपेन यदाह स क्रमः**
**समानकालं पदसंहितं द्वयोः ॥१॥**

(क्रमपाठ का सामान्य स्वरूप)

सू० अ०—आर्षी संहिता का लोप किये बिना जब (वक्ता) दो पदों और उनकी संहिता (मेल) का (को) समान काल में उच्चारण करता है तो वह क्रम-पाठ कहलाता है।

उ० भा० —अथ; (आर्ष्यलोपेन=) आर्ष्याः संहितायाः अलोपेन; द्वयोः पदसंहितम्=ते च पदे तयोश्च संहिताम्; समानकालम्=तुल्यकालम्; यदाह वक्ता स क्रमोऽधिकृतो वेदितव्यः। "अग्निमीळे। ईळे पुरोहितम्।"[1] समानकालं पदसंहितं द्वयोः इति किम्? "स्वरानुस्वारोपहितो द्विरुच्यते संयोगादिः स क्रमः"[2] इति मा भूत्॥

उ० भा० अ०—(आर्ष्यलोपेन=) आर्षी संहिता का लोप न करके; द्वयोः पदसंहितम्=दो पदों को और उनकी संहिता (मेल) का (को); समानकालम्=तुल्य काल में; यदाह=जब वक्ता उच्चारण करता है; स क्रमः=वह क्रम-पाठ है—यह अधिकार जानना चाहिए। (उदाहरण) "अग्निमीळे। ईळे पुरोहितम्।"[क] "दो पदों और उनकी संहिता (मेल) को समान काल में"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "संयुक्त वर्ण के आदि (=प्रथम 'व्यञ्जन') का द्वित्व हो जाता है यदि उसके पूर्व में 'स्वर' अथवा 'अनुस्वार' हो"—यह (यहाँ) न होवे।[ख]

(क्रमपाठे पदविशेषाणामतिक्रमणे कारणानि, अतिक्रमणे मतभेदाश्च)

**अथो बहूनामविलोपकारणः**
**परैरवस्यन्त्यतिगम्य कानिचित् ॥२॥**

(क्रमपाठ में पदविशेषों के अतिक्रमण में कारण और अतिक्रमण के विषय में मतभेद)

सू० अ०—(आर्षी संहिता का) लोप न हो इस कारण (उद्देश्य) से (कभी-कभी) बहुत (=दो से अधिक) (पदों) का भी (एक क्रम-वर्ग बनाया जाता है)।

टि० (क) अग्निमीळे पुरोहितम्॥ सं० पा०॥ अग्निम्। ईळे। पुरःऽहितम्॥ प० पा० अग्निमीळे। ईळे पुरोहितम्॥ क्र० पा०

(ख) ६।१ में जिस 'क्रम' का विधान किया गया है उसे वर्ण-क्रम कहा जा सकता है। उसमें वर्ण का द्वित्व (द्विरुच्चारण) होता है। प्रस्तुत सूत्र में विहित 'क्रम' पदों का क्रम है। इसमें एक पद का दो बार उच्चारण होता है। इसके अतिरिक्त एक वर्ग में दो पदों और उनकी संहिता का एक ही समय में उच्चारण होता है।

---

[1] ऋ० क्र० १।१।१ [2] ६।१

(उस अवस्था में) कतिपय (पदों) का (को) अतिक्रमण करके परवर्ती (पदों) से (क्रम-वर्ग का) अवसान करते हैं।

उ० भा०—(अथो=) अपि; बहूनां पदानाम्; (अविलोपकारणः=) आर्ष्या अविलोपार्थम्; क्रमो भवतीति वेदितव्यम्। तत्र परैः पदैः अवस्यन्त्यतिगम्य कानिचित् पदानि। तानि पदान्युत्तरत्रोदाहरिष्यामः॥

उ० भा० अ०—(अविलोपकारणः=) आर्षी संहिता के अलोप के लिये; बहूनाम्= बहुत (=दो से अधिक) पदों का; अथो=भी; क्रम (-वर्ग) होता है—यह जानना चाहिये। वहाँ (=उस अवस्था में); कानिचित् अतिगम्य=कतिपय पदों का (को) अतिक्रमण करके; परैः=परवर्ती पदों से; अवस्यन्ति=(क्रम-वर्ग का) अवसान करते हैं; (अर्थात् आर्षी संहिता का लोप न हो इसलिये अवस्था-विशेष में दो से अधिक पदों का एक क्रम-वर्ग बनाया जाता है)। (क्रम-वर्गों के अवसान में न आने वाले) उन पदों के उदाहरणों को आगे (११।३ इत्यादि में) देंगे।

**अपृक्तमेकाक्षरमद्वियोनि यत्**
**तदानुनासिक्यभयादतीयते ॥३॥**

सू० अ०—एक 'अक्षर' वाला जो (पद) (१) 'व्यञ्जन'-रहित (अपृक्त) होता है तथा (२) 'संध्यक्षर' (द्वियोनि) नहीं होता है, उस (एकाक्षर पद) का (को) आनुनासिक्य के भय से अतिक्रमण कर दिया जाता है।

उ० भा०—अपृक्तम्=अव्यञ्जनम्; एकाक्षरम्; अद्वियोनि=असंध्यक्षरम्; यत् तत् पदम् आनुनासिक्यभयादतीयते। "अष्टावाद्यानवसानेऽप्रगृह्यानाचार्या आहुरनुनासिकान्स्वरान्"[1] इति तन्मा भूदिति। "मन्द्रमा वरेण्यम्।"[2] "उद्वेति।"[3] अपृक्तम् इति किम्? "दुहितुराः।"[4] एकाक्षरग्रहणं पदविशेषणम्। अपृक्तमेकाक्षरं पदमनवसानीयमिति। इतरथा ह्यक्षरं विशेष्येत। अपृक्तमद्वियोनि यदक्षरं तदन्तमनवसानीयमिति। अत्र को दोषः? "क्षामीष्वमग्निगाउ"[5]—इत्यवसानं न स्यात्। अद्वियोनि इति किम्? "अभूदो॥"[6]

उ० भा० अ०—अपृक्तम्='व्यञ्जन'-रहित (='व्यञ्जन' से न मिला हुआ); अद्वियोनि=असंध्यक्षर(='संध्यक्षर' न होने पर); यत्=जो; एकाक्षरम्=एक 'अक्षर' वाला पद; तत्=उस पद का (वह पद); आनुनासिक्यभयादतीयते=आनुनासिक्य के भय से अतिक्रमण कर दिया जाता है[क]; (अर्थात् 'अनुनासिक' न हो जाये इसलिये एक

टि० (क) देखिये १०।३। एकाक्षर-पद आदि क्रम-वर्ग के अवसान में नहीं आते हैं—इसका विधान तो दशम पटल में ही किया जा चुका है। इन पदों को क्रम-वर्ग के अवसान में क्यों नहीं रखा जाता है—इसका कारण यहाँ बतलाया जा रहा है। यही कारण है कि प्रस्तुत पटल का नाम क्रम-हेतु-पटल है।

---

[1] १।६३ [2] ऋ० क्र० ९।६५।२९ [3] ऋ० क्र० ७।६३।२ [4] ऋ० क्र० १०।६१।५ [5] मै० सं० ४।१३।४ (ऐ० ब्रा० २।७।११) [6] ऋ० क्र० १।११३।११

'अक्षर' वाले पद को क्रम-वर्ग के अवसान में नहीं रखा जाता है यदि वह (१) 'व्यञ्जन' से मिला हुआ न हो और (२) 'संध्यक्षर' न हो)। "आचार्य लोग प्रथम आठ 'स्वर' (-वर्णों) का (को) 'अनुनासिक' उच्चारण करते हैं (जब वे आठ 'स्वर'-वर्ण) 'प्रगृह्य' नहीं होते और अवसान में आते हैं"—इससे आनुनासिक्य न हो जाये। (उदाहरण) "मन्द्रमा वरेण्यम्।"[क] "उद्वेति।"[ख] "'व्यञ्जन'-रहित" - यह (सूत्र में) क्यों (कहा) ? (उत्तर) "दुहितुराः।"[ग] (सूत्र में) एकाक्षर का ग्रहण पद के विशेषण के रूप में किया गया है (जिससे यह अर्थ होता है)—'व्यञ्जन'-रहित एकाक्षर पद (क्रम-वर्ग के) अवसान में नहीं आता है। अन्यथा (अर्थात् यदि 'एकाक्षर' को 'पद' का विशेषण न माना जाये तो) ('अपृक्त' और 'अद्वियोनि') ये 'अक्षर' के विशेषण होते (जिससे यह अर्थ होगा)—'व्यञ्जन' से न मिले हुए ('अपृक्त') तथा असंध्यक्षर ('अद्वियोनि') 'अक्षर' में अन्त होने वाला पद (क्रम-वर्ग के) अवसान में नहीं आता है। (पू०) इस (अर्थ में) क्या दोष है ? (सि०) "शमीध्वमध्रिगा३उ"—यहाँ अवसान नहीं होगा।[घ] "असंध्यक्षर"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) "अभूदो"।[ङ]

**नतं च पूर्वेण परस्य कारणं**
**नतेः परस्योभयहेतुसंग्रहात् ॥४॥**

सू० अ०—(१) पूर्ववर्ती (पद) के कारण जिसने 'मूर्धन्यभाव' ('नति') को प्राप्त किया है तथा (२) जो परवर्ती (पद के) 'मूर्धन्यभाव' ('नति') का कारण है, परवर्ती (पद) के ('मूर्धन्यभाव'='नति') के दोनों हेतुओं के संग्रह के लिये, वह (पद) (क्रम-वर्ग के अवसान में नहीं रखा जाता है)।

उ० भा०—नतं च पूर्वेण पदेन परस्य च नतेर्यत्कारणं तत्पदमनवसानीयं भवति। किं कारणम् ? परस्य पदस्य (उभयहेतुसंग्रहात्=) उभयहेतुसंग्रहार्थम्। "मो षु णः"[१]

टि० (क) मन्द्रमा वरेण्यम् ॥ सं० पा० ॥ मन्द्रम्। आ। वरेण्यम् ॥ प० पा० मन्द्रमा वरेण्यम् ॥ क्र० पा०

(ख) उद्वेति ॥ सं० पा० ॥ उत्। ऊँ इति। एति ॥ प० पा० ॥ उद्वेति ॥ क्र० पा० यदि आकार तथा उकार को क्रम-वर्ग के अवसान में रखा जाये तो ये १।६३ से अनुनासिक हो जायेंगे। इससे आर्षी संहिता का लोप हो जायेगा क्योंकि आर्षी संहिता में ये 'अनुनासिक' नहीं हैं।

(ग) दुहितुराः ॥ सं० पा० ॥ दुहितुः। आः ॥ प० पा० ॥ दुहितुराः ॥ क्र० पा० यहाँ एकाक्षर पद 'आ' को क्रम-वर्ग के अवसान में रखा गया है क्योंकि यह आकार 'व्यञ्जन' (=विसर्जनीय) से युक्त है।

(घ) यहाँ 'उ' पद नहीं अपितु 'अक्षर' है। अतः 'उ' में अन्त होने वाले 'अध्रिगा३उ' पद को अवसान में रखा गया है।

(ङ) अभूदो ॥ सं० पा० ॥ अभूत्। ओ इति ॥ प० पा० ॥ अभूदो ॥ क्र० पा० 'ओ' को क्रम-वर्ग के अवसान में रखा गया है क्योंकि यह 'संध्यक्षर' है।

---

[१] ऋ० क्र० १।३८।६

इत्यत्र—"स्वबह्वक्षरेण"[१]—इति नामिनिमित्तं षत्वम्। "षु णः"—इत्यत्र—"नते सु स्म"[२]—इति षत्वनिमित्तं णत्वम्। नाम्यभावे षत्वं न स्यात्। षत्वाभावे णत्वं न स्यात्। स विलोपः। अत उभयहेतुसंग्रहार्थमतीयते। "मो षु णः।"[३] "आसु ष्मा णः॥"[४]

उ० भा० अ०—नतं च पूर्वेण=पूर्ववर्ती पद के द्वारा जिसने 'मूर्धन्यभाव' ('नति') को प्राप्त किया है; और जो; परस्य नतेः कारणम्=परवर्ती (पद) के 'मूर्धन्यभाव' ('नति') का कारण है; वह पद (क्रम-वर्ग के) अवसान में नहीं रखा जाता है। (इसका) क्या कारण है ? (उत्तर) परस्य=परवर्ती (पद) के ('मूर्धन्यभाव' के); उभयहेतु-संग्रहात्=दोनों हेतुओं के संग्रह के लिये।[क] (जैसे) "मो षु णः" में—"अवह्वक्षर (एक या दो अक्षरों वाले) पद से बाद में आने वाला 'सु' 'मूर्धन्यभाव' को प्राप्त होता है"—इस (सूत्र) से 'नामि' ('-स्वर') के कारण 'षत्व' हुआ है। "षु णः" में " 'मूर्धन्यभाव' को प्राप्त 'सु' और 'स्म' (के बाद में आने वाला 'नः' पद 'मूर्धन्यभाव' को प्राप्त हो जाता है"—इस (सूत्र) से 'षत्व' के कारण 'णत्व' हुआ है। 'नामि'-'स्वर' के अभाव में 'षत्व' नहीं होगा और 'षत्व' के अभाव में 'णत्व' नहीं होगा। (इस प्रकार यदि ऐसे पद को क्रम-वर्ग के अवसान में रखा जायेगा तो) वह आर्षी संहिता का लोप होगा। इसलिये (परवर्ती पद की 'नति' के) दोनों कारणों के संग्रह के लिये उस 'षु' पद का अतिक्रमण कर दिया जाता है। (उदाहरण) "मो षु णः।"[ख] "आसु ष्मा णः।"[ग]

टि० (क) इस सूत्र से उस पद का भी क्रम-वर्ग के अन्त में नहीं रखा जाता है जिसमें (१) पूर्ववर्ती पद के कारण 'मूर्धन्यभाव' हुआ हो और जो (२) परवर्ती पद के 'मूर्धन्य-भाव' का कारण हो। ऐसा करने से परवर्ती पद के 'मूर्धन्यभाव' के दोनों कारणों का सग्रह हो जाता है।

(ख) मो षु णः॥ सं० पा०॥ मो इति। सु। नः॥ प० पा०॥ मो षु णः॥क्र० पा०

(ग) आसु ष्मा णः॥ सं० पा०॥ आसु। स्म। नः॥ प० पा०
आसु ष्मा णः॥ क्र० पा०

उपर्युक्त दोनों स्थलों पर पूर्ववर्ती 'नामि'-'स्वर' के कारण ५।५ से 'षत्व' हुआ है तथा इस 'षत्व' के कारण ५।५८ से 'णत्व' हुआ है। यहाँ पर 'णत्व' के दो कारण हैं (१) पूर्ववर्ती षकार 'णत्व' का साक्षात् कारण है और षकार से पूर्ववर्ती 'नामि'-'स्वर' 'णत्व' का असाक्षात् कारण है। यदि 'षु' और 'ष्म' को क्रम-वर्ग के अवसान में रखा जाये तो दूसरे क्रम-वर्ग के प्रारम्भ में ये 'सु' और 'स्म' के रूप में आयेंगे। इससे 'नः' के नकार का 'णत्व' नहीं होगा। इसलिये 'णत्व' की सिद्धि के लिये 'षु' और 'ष्म' को क्रम-वर्ग के अवसान में नहीं रखा जाता है।

---

[१] ५।५ [२] ५।५८
[३] ऋ० क्र० १।३८।६ [४] ऋ० क्र० ६।४४।१८

परीत इत्युत्तरमेतयोर्द्वयोः परंहि पूर्वं नमतीत्यतीयते ॥५॥

सू० अ०—'परि' और 'इतः'—इन दो में से दूसरे (पद) (=इतः) का (को) अतिक्रमण कर दिया जाता है क्योंकि (इसका) पूर्ववर्ती (पद) (=परि) (इसके) परवर्ती (पद) (='सिञ्चत' पद) को 'मूर्धन्य' बनाता है।

उ० भा०—परि इतः इत्येतयोर्द्वयोः पदयोः; (उत्तरम्=) परम्; पदम्; (अतीयते=) अनवसानीयं भवति। किं कारणम्? अनवसानीयात्परं सिञ्चतेति पदं व्यवहितमपि पूर्वं परीति पदं नमतीति। "परीतो षिञ्चत"[१] इति॥

उ० भा० अ०—परि इतः इत्येतयोर्द्वयोः='परि' और 'इतः' इन दो पदों में; (उत्तरम्=) परवर्ती पद (=इतः); (अतीयते=अतिक्रमण कर दिया जाता है=) (क्रम-वर्ग के) अवसान में नहीं रखा जाता है। (इसका) क्या कारण है? (उत्तर) अवसान में न आने वाले ('इतः' पद) से; परम्=परवर्ती='सिञ्चत'–इस पद को; पूर्वम्=पूर्ववर्ती='परि' यह पद; व्यवहित होने पर भी; नमति='मूर्धन्य' बना देता है। (उदाहरण) "परीतो षिञ्चत।"[क]

ततोऽपरे संध्यमवेक्ष्य कारणं
तदर्थजं द्विक्रममत्र कुर्वते ॥६॥

सू० अ०—इनसे अन्य (आचार्य) संधि से उत्पन्न (ओकार) को ('सिञ्चत' के षत्व' का) कारण देखकर (=मानकर) और (इस ओकार को) उस ('षत्व') के लिये उत्पन्न (मानकर) यहाँ पर दो पदों का क्रम-वर्ग बनाते हैं।

उ० भा०—ततः=तेभ्यः; अपरे आचार्या अस्यामवस्थायाम्; संध्यम्=संधिजम्; कारणमवेक्ष्य। किं कारणम्? "इतो षिञ्चत"[२] इत्योत्वनिपातनम्। तदर्थजम् एव= षत्वार्थमेव; ओत्वं मन्यमाना द्विक्रममत्र कुर्वते। "परीतः। इतो षिञ्चत॥"[३]

उ० भा० अ०—ततोऽपरे=(पूर्ववर्ती सूत्र में निर्दिष्ट मत को मानने वाले) इन आचार्यों से दूसरे आचार्य; इस अवस्था में; संध्यम्=संधि से उत्पन्न को; कारण-मवेक्ष्य=कारण देखकर (मानकर)। क्या कारण है? (उत्तर) 'इतो षिञ्चत"

टि० (क) परीतो षिञ्चत॥ सं० पा॥ परि। इतः। सिञ्चत॥ प० पा०
परीतो षिञ्चत॥ क्र० पा०
'षिञ्चत' में जो 'मूर्धन्यभाव' हुआ है उसका निमित्त 'परि' का रेफ है। यदि 'इतः' के द्वारा क्रम-वर्ग का अवसान कर दिया जाये तो निमित्त से पृथक् हो जाने के कारण 'षिञ्चत' में 'मूर्धन्यभाव' नहीं होगा। किंतु आर्षी संहिता में 'मूर्धन्यभाव' दृष्ट है। आर्षी संहिता में दृष्ट 'मूर्धन्यभाव' की सिद्धि (रक्षा) के लिए 'इतः' को क्रम-वर्ग के अवसान में नहीं रखा जाता है।

---

[१] ऋ० ऋ० ९।१०७।१ [२] ५।१७ [३] ऋ० ऋ० ९।१०७।१

में ओत्व का निपातन। तदर्थजम्=उसके लिय उत्पन्न='षत्व' के लिये ही उत्पन्न; ओत्व को मानते हुये; द्विक्रममत्र कुर्वते=यहाँ पर दो पदों का क्रम-वर्ग बनाते हैं।[क] "परीतः। इतो षिञ्चत।"[ख]

**तमःपरं रेफनिमित्तसंशयात्**
**तथावरित्येतदपोद्यते पदम् ॥७॥**

सू० अ०—रेफ के कारण के विषय में संशय होने से, 'तमः' है बाद में जिसके ऐसे 'आवः' पद का (को) उसी प्रकार अतिक्रमण कर दिया जाता है (=क्रम-वर्ग के अवसान में नहीं रखा जाता है)।

उ० भा०—तमःपरम् आवरित्येतत्पदं तथा। यथा पूर्वोक्तम्। अवसानात्; अपोद्यते=अपनीयते। किं कारणम्? रेफनिमित्तसंशयात्—नहि विज्ञायते पूर्वेण पदान्तेनोत्तरेण वा पदादिना रेफो भवतीति। अत उभयहेतुसंग्रहार्थमपनीयते। "उषा आवर्तमः ॥"[१]

उ० भा० अ०—जिस प्रकार पूर्वोक्त ('इतः' पद को) (क्रम-वर्ग के अवसान में नहीं रखा जाता है); तमःपरम् आवरित्येत्पदं तथा=उसी प्रकार 'तमः' है बाद में जिसके ऐसे 'आवः' पद को; अवसान से; अपोद्यते=हटा दिया जाता है (अर्थात् क्रम-वर्ग के अवसान में नहीं रखा जाता है)। (इसका) क्या कारण है? (उत्तर) रेफ के कारण के विषय में संशय होने से – क्योंकि यह ज्ञात नहीं होता है कि पूर्ववर्ती पदान्त ('आवः' के विसर्जनीय) के कारण रेफ होना है अथवा परवर्ती पदादि ('तमः' के तकार) के कारण। इसलिये (रेफ के) दोनों हेतुओं के संग्रह के लिये ('आवः' अवसान से) हटा दिया जाता है। (उदाहरण) "उषा आवर्तमः।"[ग]

टि० (क) पूर्ववर्ती सूत्र के अनुसार 'परि' के रेफ के कारण 'सिञ्चत' का सकार षकार होता है। अतः निमित्त और नैमित्तिक को साथ रखने के लिये यहाँ तीन पदों का क्रम-वर्ग बनाया जाता है। अन्य आचार्यों का यह मत है कि (१) 'सिञ्चत' का सकार 'इतो' के ओकार के कारण षकार होता है और (२) 'सिञ्चत' के सकार को षकार बनाने के लिये ही 'इतः' का विसर्जनीय ५।१७ के अनुसार निपातन से ओकार होना है।

(ख) परीतो षिञ्चत ॥सं० पा०॥ परि । इतः । सिञ्चत ॥ प० पा०
परीतः । इतो षिञ्चत ॥ क्र० पा०

(ग) उषा आवर्तमः ॥ सं० पा० ॥ उषाः । आवरित्यावः । तमः ॥ प० पा०
उषा आवर्तमः ॥ क्र० पा० ॥

रेफ के निमित्त के विषय में संशय होने के कारण यहाँ तीन पदों का क्रम-वर्ग बना है जिसमें निमित्त और नैमित्तिक साथ-साथ रह सकें।

---

[१] ऋ० क्र० १।९२।४

अदो पितो सो चिदुपर्वसूयवो
न धक्षि धुक्षीत्यपि चातियन्ति किम् ॥८॥

सू० अ०—(यदि ऐसी बात है तो) 'अदो पितो', 'सो चित्', 'उपर्वसूयवः' (इन द्वैपदों के प्रथम पदों) का और 'धक्षि' तथा 'धुक्षि' का भी अतिक्रमण क्यों नहीं करते हैं ?

उ० भा०—यद्यावरित्येतत्पदं रेफनिमित्तसंशयादनवसानीयं भवति, सांशयिकनिमित्तानि अदो पितो सो चित् उपर्वसूयवः इतीमानि पदानि धक्षि धुक्षि; इत्यपि = इत्येतौ च प्रवादौ; किं कारणं नातियन्ति ? इमान्यपि हि तेन तुल्यानि। सत्यम्। क्रमशास्त्रेऽनवसानीयेऽननुगृहीतानीमानि। तस्मान्नातियन्ति। तत्र गृहीतानामिह हेतुरुच्यते ॥

उ० भा० अ०—(पू०) यदि 'आवः' यह पद रेफ के कारण के विषय में संशय होने से (क्रम-वर्ग के) अवसान में नहीं रखा जाता है तो संशय से युक्त कारण वाले 'अदो पितो', 'सो चित्' और 'उपर्वसूयवः' इन पदों को=इन द्वैपदों के (पूर्ववर्ती पदों का) तथा 'धक्षि' और 'धुक्षि'; इत्यपि = इनके (= इन धातुओं के) सभी रूपों का (को); किम् = किस कारण से; नातियन्ति = अतिक्रमण नहीं करते हैं।[क] ये भी उसी (आवर्तमः) के तुल्य हैं। (सि०) सच कहते हो (कि 'आवर्तमः' के समान इनके निमित्त के विषय में भी संशय है) किंतु क्रम-शास्त्र (=दशम पटल) में अवसान में न आने वालों में (इन 'अदो पितो' आदि स्थलों का) ग्रहण नहीं किया गया है। वहाँ (=दशम पटल में) जिनका ग्रहण किया गया है उनका ही यहाँ हेतु (=कारण) बतलाया गया है।

स्वसारमित्येतदपोद्यते पदं
परः सकारोपजनोऽस्कृतेति च।
निरस्कृतेति ह्युपसर्गकारित-
स्तदन्वयादाचरितं तु पञ्चभिः ॥९॥

सू० अ०—'स्वसारम्' यह पद (क्रम-वर्ग के अवसान से) हटा दिया जाता है और 'अस्कृत' यह (परवर्ती पद) भी (हटा दिया जाता है)। यतः 'निरस्कृत' में सकार का आगम ('निर') उपसर्ग के कारण हुआ है, अतः उस (उपसर्ग) के सम्बन्ध (अन्वय) के कारण पाँच (पदों) से (क्रम-वर्ग) बनाया गया है।

उ० भा० स्वसारमित्येतत्पदम् अवसानात् अपोद्यते। अकृतेति च परं पदमपोद्यते। किं कारणम् ? परः सकारोपजनः = सकारागमः—इत्यर्थः। निरस्कृतेत्युपसर्गकारितः। तदन्वयात् = उपसर्गान्वयात्; पञ्चभिः एव पदैः आचरितं क्रमं विद्यात्। आचार्यैः। 'निरु स्वसारमस्कृतोषसम् ॥'[1]

टि० (क) "अदो पितो" के लिए ४।४०; "सो चित्' के लिए ४।९४; "उपर्वसूयवः" के लिए ४।४० और 'धक्षि' तथा 'धुक्षि' के लिए ४।९८ को देखिए।

[1] ऋ० क्र० १०।१२७।३

उ० भा० अ०—**स्वसारमित्येतत्पदम्**='स्वसारम्'—यह पद; (क्रम-वर्ग के) अवसान में (से) **अपोद्यते**=नहीं रहने दिया जाता है। **अकृतेति च**='अकृत'—यह परवर्ती पद भी (क्रम-वर्ग के) अवसान में (से) नहीं रहने दिया जाता है। (इसका) क्या कारण है? (उत्तर) **परः सकारोपजनः**=सकार का आगम—यह अर्थ है। **निरस्कृतेत्युपसर्गकारितः**='अस्कृत' में सकार का आगम 'निर्' उपसर्ग के कारण हुआ है। **तद्न्वयात्**=उसके संबन्ध के कारण से=उपसर्ग के संबन्ध के कारण से; **पञ्चभिः**=पाँच पदों से; **आचरितम्**=बनाया गया; क्रम(-वर्ग) जानना चाहिये। आचार्यों के द्वारा। (उदाहरण) "निरु स्वसारमस्कृतोषसम्।"[क]

**सहेति चेमेति च रक्तसंहितं**
**गुणागमादेतनभावि चेतन।**
**पदं च चास्कम्भ चिदित्यतः परं**
**प्लुतादि चैतानि निमित्तसंशयात् ॥१०॥**

सू० अ०—(१) 'इति' के साथ 'ईम्', (२) आनुनासिक्य से युक्त 'आ' (३) गुण स्वर (ए) के आ जाने से 'एतन' हो जाने वाला 'इतन', (४) 'चास्कम्भ चित्'—इससे बाद वाला पद और (५) 'दीर्घ' हो गया है आदि (=प्रथम 'अक्षर') जिसका वह (पद)—ये भी (क्रम-वर्ग के अवसान में नहीं आते हैं) क्योंकि इनके (विकारों) के कारण (निमित्त) के विषय में संशय है।

उ० भा०—**सहेति चेम्**—इतिकरणयुक्तमीमित्येतत्पदं लुप्तमकारमनवसानीयं भवति। किं कारणम्? **निमित्तसंशयात्**—न हि विज्ञायते पूर्वेण वा पदान्तेनोत्तरेण वा पदादिना मकारस्य लोपो भवतीति। अत उभयहेतुसंग्रहार्थमतीयते। "यमी गर्भम्।"[१]

उ० भा० अ०—**सहेति चेम्**='इति' शब्द से युक्त 'ईम्' - (संहिता-पाठ में) जब 'ईम्' का मकार लुप्त हो जाता है तभी वह (पद-पाठ में) 'इति' शब्द से युक्त होता है; (ऐसा 'ईम्' पद क्रम-वर्ग के) अवसान में नहीं रखा जाता है। इसका क्या कारण है? (उत्तर) **निमित्तसंशयात्**=कारण के विषय में संशय होने से—क्योंकि यह ज्ञात नहीं होता है कि पूर्ववर्ती पदान्त के द्वारा अथवा परवर्ती पदादि के द्वारा मकार का लोप होता है।

टि० (क) निरु स्वसारमस्कृतोषसम् ॥ सं० पा० ॥
नि: । ऊँ इति । स्वसारम् । अकृत । उषसम् ॥ प० पा०
**निरु स्वसारमस्कृतोषसम्** ॥ क्र० पा०

'निर्' उपसर्ग के कारण 'अकृतम्' में सकार का आगम होकर 'अस्कृतम्' रूप बना है। निमित्त (निर्) और नैमित्तिक ('अस्कृतम्' के सकार) को साथ-साथ रखने के लिये यहाँ पाँच पदों का एक क्रम-वर्ग बनाया गया है।

[१] ऋ० क्र० ९।१०२।६

इसलिये दोनों हेतुओं के संग्रह के लिये अतिक्रमण किया जाता है। (उदाहरण) "यमी गर्भम्।"[क]

उ० भा०—एति च रक्तसंहितम्—आ इत्येतत्पदं रक्तसंहितं यत्तदनवसानीयं भवति। किं कारणम्? निमित्तसंशयात्—न ज्ञायते पूर्वेण वा पदान्तेनोत्तरेण वा पदादिना आकारस्य रागो भवतीति। अत उभयहेतुसंग्रहार्थम्। "अभ्र आँ अपः।"[1]

उ० भा० अ०—एति च रक्तसंहितम्—अनुनासिकता से युक्त (अर्थात् 'अनुनासिक') 'आ' यह पद भी (क्रम-वर्ग के) अवसान में नहीं रखा जाता है। (इसका) क्या कारण है? (उत्तर) कारण के विषय में संशय होने से—यह ज्ञात नहीं होता है कि पूर्ववर्ती पदान्त के द्वारा अथवा परवर्ती पदादि के द्वारा आकार की अनुनासिकता होती है। इसलिये दोनों (सांशयिक) हेतुओं के संग्रह के लिये ('अनुनासिक' आकार=आँ अवसान में नहीं रखा जाता है)। (उदाहरण) "अभ्र आँ अपः।"[ख]

उ० भा० —गुणागमादेतनभावि चेतन—गुणागमात्=एकारागमात्; एतनभूतम् इतन इत्येतत्पदमनवसानीयं भवति। किं कारणम्? न ज्ञायते पूर्वेण वा पदान्तेनोत्तरेण वा पदादिना एकारो गुणागमो भवतीति। अत उभयगतः संशयः—"वीरास एतन मर्यासः।"[2]

उ० भा० अ०—गुणागमादेतनभावि चेतन—गुणागमात्=गुण का आगम होने से=एकार का आगम होने से; 'एतन' को प्राप्त 'इतन'- यह पद क्रम-वर्ग के अवसान में नहीं रखा जाता है। (इसका) क्या कारण है? (उत्तर) यह ज्ञात नहीं होता है कि पूर्ववर्ती पदान्त के द्वारा अथवा परवर्ती पदादि के द्वारा एकाररूप गुणागम होता है। इसलिये दोनों के विषय में संशय है (इससे दोनों सांशयिक हेतुओं के संग्रह के लिये 'एतन' को अवसान में नहीं रखा जाता है)। (उदाहरण) "वीरास एतन मर्यासः।"[ग]

टि० (क) यमी गर्भम्॥ सं० पा०॥ यम्। ईमिति। गर्भम्॥ प० पा०
यमी गर्भम्॥ क्र० पा०

यहाँ 'ईम्' के मकार का लोप ४।८३ से हुआ है। पद-पाठ में इस 'ईम्' के साथ 'इति' का प्रयोग हुआ है। मकार के लोप का कारण पूर्ववर्ती पदान्त ('यम्' का मकार) है अथवा परवर्ती पदादि (='गर्भम्' का गकार) है—यह निश्चय न होने से यहाँ तीन पदों का क्रम-वर्ग बनाया जाता है। इससे निमित्त और नैमित्तिक साथ-साथ रहते हैं।

(ख) अभ्र आँ अपः॥ सं० पा०॥ अभ्रे। आ। अपः॥ प० पा०॥
अभ्र आँ अपः॥ क्र० पा०

आँ के अनुनासिक्य के निमित्त के विषय में संशय होने से यहाँ तीन पदों का एक क्रम-वर्ग बनता है जिससे निमित्त और नैमित्तिक साथ-साथ रह सकें।

(ग) वीरास एतन मर्यासः॥ सं० पा०॥ वीरासः। इतन। मर्यासः॥ प० पा०
वीरास एतन मर्यासः॥ क्र० पा०

---

[1] ऋ० क्र० ५।४८।१ [2] ऋ० क्र० ५।६१।४

उ० भा०—पदं च चास्कम्भ चिदित्यतः परम्—चास्कम्भ चित् इत्यस्माद् द्वेपदात्परं स्कम्भनेन इति च पदमनवसानीयम् । किं कारणम् ? केन निमित्तेन सकारस्य लोपो भवतीत्युभयगतः संशयः । "चित्कम्भनेन स्कभीयान् ।"[१]

प्लुतादि च—प्लुतादि च पदं योनिमारैक् इत्येवमाद्यनवसानीयं भवति । "प्लुतादिप्रभृतीनि च"[२] इत्यत्र गतम् । "योनिमारैगप ।"[३] अत्र आकारागमः पूर्ववत्संशयितः ॥

उ० भा० अ०—पदं च चास्कम्भ चिदित्यतः परम्="चास्कम्भ चित्"—इस द्वेपद से परवर्ती 'स्कम्भनेन' यह पद; (क्रम-वर्ग के) अवसान में नहीं रखा जाता है। (इसका) क्या कारण है ? (उत्तर) (पूर्ववर्ती पदान्त तथा परवर्ती पदादि—इनमें से) किस कारण से सकार का लोप होता है—यह दोनों के विषय में संशय है (इसलिये दोनों सांशयिक हेतुओं के संग्रह के लिये 'स्कम्भनेन' पद को क्रम-वर्ग के अवसान में नहीं रखा जाता है)। (उदाहरण) "चित्कम्भनेन स्कभीयान् ।"[क]

प्लुतादि च='दीर्घ' हो गया है प्रथम 'अक्षर' जिसका वह; "योनिमारैक्" इत्यादि पद भी (क्रम-वर्ग के) अवसान में नहीं रखा जाता है : "प्लुतादि (='दीर्घ' हो गये हैं आदि 'स्वर'-वर्ण जिनके) प्रभृति का अतिक्रमण करके (क्रम-वर्ग का) अवसान करते हैं" इससे कहा जा चुका है। (उदाहरण) "योनिमारैगप"[ख]—यहाँ आकार रूप आगम के विषय में पूर्ववत् संशय है (इसलिये दोनों सांशयिक हेतुओं के संग्रह के लिये 'आरैक्' क्रम-वर्ग के अवसान में नहीं रखा जाता है)।

**द्व्यभिक्रमं पूर्वनिमित्तमानिनस्**
**त्रिषूत्तमेष्वाहुरनन्तरं हि तत् ॥११॥**

सू० अ०—पूर्वपद को (विकार का) निमित्त मानने वाले लोग कहते हैं कि अन्तिम तीन स्थलों पर दो-दो पदों के क्रम-वर्ग बनाने चाहिये क्योंकि वह (पूर्वपद) तुरन्त पूर्व में है।

उ० भा०—(द्व्यभिक्रमम्=) द्वाभ्यां पदाभ्यामभिक्रमम्; इच्छन्ति उत्तमेषु त्रिषु निमित्तसंशयेषु । (पूर्वनिमित्तमानिनः=) अनवसानीयात्पूर्वं पदं निमित्तं मन्यन्ते । किं कारणम् ? अनन्तरं हि तत् पूर्वं पदं गुणागमः सकारलोपश्च दीर्घत्वं चैषां त्रयाणां भवतीति । "वीरास एतन ।"[४] "चित्कम्भनेन ।"[५] "योनिमारैक् ।"[६]

टि० (क) (चास्कम्भ) चित्कम्भनेन स्कभीयान् ॥ सं० पा० ॥ चित् । स्कम्भनेन । स्कभीयान् ॥ प० पा० ॥ चित्कम्भनेन स्कभीयान् ॥ क्र० पा०
सकार का लोप ४।२१ के अनुसार निपातन से हुआ है।
(ख) योनिमारैगप ॥ सं० पा० ॥ योनिम् । अरैक् । अप ॥ प० पा०
योनिमारैगप ॥ क्र० पा०
'अरैक्' का अकार २।७५ के अनुसार निपातन से आकार हुआ है।

[१] ऋ० क्र० १०।१११।५ [२] १०।४ [३] ऋ० क्र० १।१२४।८
[४] ऋ० क्र० ५।६१।४ [५] ऋ० क्र० १०।१११।५ [६] ऋ० क्र० १।१२४।८

उ० भा० अ० —संशय से युक्त हैं निमित्त जिनके ऐसे; उत्तमेषु त्रिषु=अन्तिम तीन (="वीरास एतन मर्यासः" "चित्कम्भनेन स्कभीयान्". "योनिमारैगप") में; (द्व्यभिक्रमम्=) दो-दो पदों से क्रम-वर्ग बनाना; अभीष्ट मानते हैं। (पूर्वनिमित्त-मानिनः=) अवसान में न आने वाले पद से पूर्ववर्ती पद को निमित्त मानते हैं। (इसका) क्या कारण है ? (उत्तर) गुणागम, सकारलोप और दीर्घत्व—इन तीनों का जो पूर्ववर्ती पद है; अनन्तरं हि तत्=वह (इन तीनों के) तुरन्त समीप में है=मध्य में कोई व्यवधान नहीं है।[क] (उदाहरण) "वीरास एतन।"[ख] "चित्कम्भनेन।"[ग] "योनिमारैक्।"[घ]

**अनन्तरं त्वेव चतुर्थषष्ठयोः**
**परं कथं तत्र च न द्व्यभिक्रमम् ॥१२॥**

**सू० अ०—चतुर्थ और षष्ठ (स्थलों) में तो परवर्ती (पद) निश्चय ही तुरन्त समीप में है—वहाँ पर दो-दो पदों के क्रम-वर्ग क्यों नहीं बनाते हैं ?**

**उ० भा०—अनन्तरम्; तु=पुनः; चतुर्थषष्ठयोः अनवसानीययोः—"उषा आवर्तमः"[1]; "यमी गर्भम्"[2]—इत्येतयोः परं पदं निमित्तं भवितुमर्हति। पूर्वनिमित्तमानिनां हेतुसामान्यात् कथं तत्र च ते पूर्वनिमित्तमानिनो द्व्यभिक्रमं न कुर्वन्त्येवं स्थितेऽपि। यदि चतुर्थषष्ठयोर्द्व्यभिक्रमं न कुर्वन्ति त्रिषूत्तमेष्वपि न कर्तव्यम्। अथोत्तमेषु कुर्वन्ति चतुर्थषष्ठयोरपि कर्तव्यम्, उभयत्रापि हि विकारहेतुरानन्तर्यमेव ॥**

उ० भा० अ०—"उषा आवर्तमः" और "यमी गर्भम्"—इन दो; चतुर्थषष्ठयोः=चतुर्थ (देखिये ११।७) और षष्ठ (देखिये ११।१०) स्थलों पर; अवसान में न आने वाले ('आवः' और 'ईम्') के; परम्=परवर्ती; पद ('तमः' और 'गर्भम्'); अनन्तरं तु=तुरन्त समीप में हैं; (अतः ये परवर्ती पद विकार का) निमित्त होने में सर्वथा समर्थ हैं क्योंकि पूर्ववर्ती पद को निमित्त मानने वालों के हेतु के यह समान है। ऐसी वस्तु-स्थिति होने पर भी पूर्ववर्ती (पद) को निमित्त मानने वाले लोग; तत्र=वहाँ पर (=चतुर्थ और षष्ठ स्थलों में) द्व्यभिक्रमम्=दो-दो पदों के क्रम-वर्ग; कथम् न=क्यों नहीं बनाते हैं ? यदि चतुर्थ

टि० (क) इन आचार्यों का मत है कि "वीरास एतन", 'चित्कम्भनेन" और "योनिमारैक्" में जो क्रमशः गुणागम, सकारलोप और दीर्घत्व हुआ है उसके निमित्त के विषय में कोई संशय नहीं है। अव्यवहित पूर्ववर्ती पदों के कारण ही इन स्थलों पर (क्रमशः २।७२, ४।२१ और २।७५ से) निर्दिष्ट विकार हुए हैं। निमित्त के विषय में संशय न होने से यहाँ दो-दो पदों का एक-एक क्रम-वर्ग बनाना ही उचित है।

(ख) वीरास एतन ॥ सं० पा० ॥ वीरासः। इतन ॥ प० पा० ॥ वीरास एतन ॥ क्र० पा०

(ग) चित्कम्भनेन ॥ सं० पा० ॥ चित्। स्कम्भनेन ॥ प० पा० ॥ चित्कम्भनेन ॥ क्र० पा०

(घ) योनिमारैक् ॥ सं० पा० ॥ योनिम्। अरैक् ॥ प० पा० ॥ योनिमारैक् ॥ क्र० पा०

---

[1] ऋ० क्र० १।९२।४ [2] ऋ० क्र० ९।१०।६

और षष्ठ (स्थलों) में दो-दो पदों के क्रम-वर्ग नहीं बनाते हैं तो अन्तिम तीन में भी (दो-दो पदों के क्रम-वर्ग) नहीं बनाने चाहिये। यदि अन्तिम (तीन) में (दो-दो पदों के क्रम-वर्ग) बनाते हैं तो चतुर्थ और षष्ठ में भी (दो-दो पदों के क्रम-वर्ग) बनाने चाहिये क्योंकि दोनों ही स्थलों पर विकार का हेतु आनन्तर्य ही है।

**अनानुपूर्व्ये पदसंध्यदर्शनात्**
**पदव्यवेतं च पदं व्यवायि च ॥१३॥**

सू० अ०—अनानुपूर्वी संहिता में (अन्य) पद के द्वारा पृथक् किया गया (पद) और पृथक् करने वाला (पद) (ये दोनों पद क्रम-वर्ग के अवसान में नहीं रखे जाते हैं) क्योंकि (ऐसा न करने पर) इन दोनों पदों की संधि दिखलाई नहीं देगी।

उ० भा०—(अनानुपूर्व्ये=) अनानुपूर्व्यसंहिते; क्रमे क्रियमाणे; (पदव्यवेतम्=) पदेन यद्व्यवेतम्; यत् च (पदम्) (व्यवायि=) व्यवैति—ते उभे अनवसानीये भवतः। किं कारणम् ? पदसंध्यदर्शनात्। शुनःशेपम् चित् इत्येतयोः पदयोरन्योन्येन सह संधिरदृष्टो भवति। "शुनश्चिच्छेपं निदितम् ॥"[1]

उ० भा० अ०—(अनानुपूर्व्ये=) अनानुपूर्वी संहिता[क] में; क्रम-वर्ग बनाते समय; (पदव्यवेतम्=) (अन्य) पद के द्वारा जो पृथक् किया जाता है और जो (पदम्=पद) (व्यवायि=) पृथक् करता है—वे दोनों (क्रम-वर्ग के) अवसान में नहीं रखे जाते हैं। (इसका) क्या कारण है ? (उत्तर) पदसंध्यदर्शनात्= पदों की संधि दिखलाई न पड़ने से। 'शुनःशेपम्' और 'चित्'—इन दोनों की एक दूसरे के साथ संधि—दिखलाई नहीं पड़ती है। (उदाहरण) "शुनश्चिच्छेपं निदितम्।"[ख]

**ततोऽपरे द्विक्रममाहुराश्रयात्**
**कृताविलुप्तात्र हि वर्णसंहिता ॥१४॥**

सू० अ०—इनसे अन्य (आचार्य) दो-दो (पदों) के क्रम-वर्गों को मानते हैं क्योंकि यहाँ नियम के अनुसार वर्णों की संहिता होती है जिससे (संहिता) लुप्त नहीं होती है।

टि० (क) अनानुपूर्वी संहिता के लिये २।७८ को देखिये।

(ख) शुनश्चिच्छेपं निदितम् ॥ सं० पा० ॥ शुनःशेपम्। चित्। निदितम् ॥ प० पा० शुनश्चिच्छेपं निदितम् ॥ क्र० पा०

यदि दो-दो पदों के क्रम-वर्ग बनाये जावें तो संहिता-पाठ में दिखलाई पड़ने वाली संधि (मल) क्रम-पाठ में दिखलाई नहीं देगी। इससे आर्षी संहिता का लोप हो जायेगा।

---

[1] ऋ० क० ५।२।७

उ० भा०—ततोऽपरे आचार्या अस्यामवस्यायां द्विक्रमम् ; (आहुः=) इच्छन्ति। किं कारणम् ? आश्रयात्=लक्षणात्; कृता हि अत्र; (अविलुप्ता=) अविलोपेन; (वर्ण-संहिता=) वर्णानां वर्णैः सह संहिता; भवतीति। शुन इत्यत्र विसर्जनीयश्चिविति प्रत्यये—"अघोषे रेफ्यरेफी चोष्माणं स्पर्श उत्तरे"[1] इति शकारमापन्नः। चिवित्यत्र तकारः शेप-प्रत्यये—"तालव्येऽघोष उदये चकारम्"[2] इति चकारमापन्नः। "सर्वैः प्रथमैरुपधीयमानः शकारः शाकल्यपितुश्छकारम्"[3] इति शकारश् छकारमापन्नः। शेपमित्यत्र मकारः पदान्ते वर्तमानो नकारे प्रत्यये—"विस्थाने स्पर्श उदये मकारः सर्वेषामेवोदयस्योत्तमं स्वम्"[4] इति नकारमापन्नः। "शुनश्चित्। चिच्छेपम्। शेपन्निदितम्॥"[5]

उ० भा० अ०–ततोऽपरे=इनसे अन्य आचार्य; इस अवस्था में; द्विक्रमम्=दो-दो पदों के क्रम-वर्गों को; (आहुः=कहते हैं=) अभीष्ट मानते हैं। (इसका) क्या कारण है ? (उत्तर) क्योंकि; अत्र=यहाँ पर (वर्ण-संहिता=) वर्णों की वर्णों के साथ संहिता; आश्रयात्=लक्षण के अनुसार; कृता=की जाने पर; (अविलुप्ता=) बिना किसी लोप के; हो जाती है।[क] जैसे—'शुनः'–इसका विसर्जनीय, 'चित्' बाद में होने पर, "'अघोष' ('स्पर्श') बाद में हो तो रिफित या अरिफित विसर्जनीय (उस बाद वाले 'अघोष' 'स्पर्श' के समान स्थान वाला) 'ऊष्म'-वर्ण हो जाता है"—इस सूत्र से शकार हो जाता है। 'चित्' का तकार. 'शेप' बाद में होने पर, "'अघोष' 'तालव्य' बाद में हो तो (तकार) चकार हो जाता है"—इस (सूत्र) से चकार हो जाता है। "शाकल्य के पिता के मत से सभी प्रथम 'स्पर्श'-वर्णों से बाद में आने वाला शकार छकार हो जाता है"— इस (सूत्र) के अनुसार शकार छकार हो जाता है। पद के अन्त में विद्यमान 'शेपम्' का मकार, नकार बाद में होने पर, "अन्य 'स्थान' वाला 'स्पर्श' बाद में हो तो मकार सभी (आचार्यों) के (मत से) परवर्ती ('स्पर्श') का अपना पञ्चम 'स्पर्श' (हो जाता है)"– इस (सूत्र) से नकार हो जाता है। (उदाहरण) "शुनश्चित्। चिच्छेपम्। शेपन्निदितम्।"[ख]

पदानुपूर्व्येण सपूर्व आ ततस्
ततो व्यवेतं च सह व्यवायि च ॥१५॥

सू० अ०—पूर्वसहित ('अनानुपूर्वी संहिता') में उस ('अनानुपूर्वी संहिता') तक ('क्रम' पूर्ववर्ती) पदों के आनुपूर्व्य से (साधारण नियम के अनुसार होता है)। तदनन्तर पृथक् किया गया पद और पृथक् करने वाला पद – ये दोनों (अपने पूर्ववर्ती और परवर्ती पदों के साथ) साथ-साथ (एक क्रम-वर्ग में रखे जाते हैं)।

टि० (क) इन आचार्यों का मत है कि यहाँ दो-दो पदों के क्रम-वर्ग बनाने पर भी वर्णों की वर्णों के साथ संहिता नियमों के अनुसार हो जाती है। इससे आर्षी संहिता का लोप नहीं होता है।

(ख) शुनश्चिच्छेपं निदितम् ॥ सं० पा० ॥ शुनःऽशेपम्। चित्। निदितम् ॥ प० पा० शुनश्चित्। चिच्छेपम्। शेपन्निदितम् ॥ क्र० पा०

---

[1] ४।३१ [2] ४।११ [3] ४।४
[4] ४।६ [5] ऋ० क्र० ५।२।७

उ० भा०—(पदानुपूर्व्येण=) पदानामानुपूर्व्येण; सपूर्वे=विद्यमानपूर्वे; अनानुपूर्व्यसंहितेऽर्धर्चस्य पूर्वे द्वंपदशः क्रमो वक्तव्यः; आ ततः=अनानुपूर्व्यसंहितायाः। "द्वा जना। जना यातयन्। यातयन्नन्तः। अन्तरीयते।"[१] किमर्थमिदमुच्यते ? ननु—"क्रमो द्वाभ्यामभिक्रम्य"[२] इत्येव सिद्धम्। न सिद्ध्यति। ईयत इत्येतस्य नरा इत्येतेन पदैकदेशेन सह संधिर्दृष्टः। नराशंसमित्येतेन पदेन सह संधिरदृष्टः। तदा पदसंध्यदर्शनादीयत इत्येतस्यापि पदस्यानवसानीयता प्राप्नोति। सा मा भूदित्युच्यते।

ततो व्यवेतं च पदम्; (व्यवायि च=) यच्च व्यवैति ते उभे सह वक्तव्ये। केन सह ? ईयते दैव्यम् इत्येताभ्यां सह। "ईयते नरा च शंसं दैव्यम्।"[३] एवमेके।

उ० भा० अ०—सपूर्व=जिसके पूर्व में कोई पद विद्यमान है[क]; ऐसी उस 'अनानुपूर्वी संहिता' में, अर्धर्च के पूर्व (पाद) में; आ ततः=उस तक='अनानुपूर्वी संहिता' तक; (पदानुपूर्व्येण=) (क्रम-पाठके सामान्य नियम के अनुसार) पदों के आनुपूर्व्य से; 'क्रम' को कहना चाहिए। (उदाहरण) "द्वा जना। जना यातयन्। यातयन्नन्तः। अन्तरीयते।" (पू०) यह किसलिए कहते हो ? क्योंकि "दो पदों से प्रारम्भ करके (इसके आगे दो-दो पदों से) क्रम (-पाठ) (का संपादन करना चाहिए)"—इससे ही यह सिद्ध है। (सि०) सिद्ध नहीं होता है। 'ईयते'—इस (पद) की ('नराशंसम्' पद के) के एक भाग (देश) 'नरा' इसके साथ संधि दृष्ट है, (किंतु) 'नराशंसम्'—इस पद के साथ संधि अदृष्ट है। इस अवस्था में पदों की संधि दिखलाई न पड़ने से ईयते' पद का क्रम-वर्ग के अन्त में न आना प्राप्त होता है। वह मत होवे–इसलिए यह कहा गया है।

ततो व्यवेतं च=तदनन्तर पृथक् किया गया पद; (व्यवायि च=) और पृथक् करने वाला (पद)—इन दोनों का (को); सह=साथ में; उच्चारण करना चाहिए। किसके साथ में ? (उत्तर) 'ईयते' और 'दैव्यम्' इन दो–(पदों) के साथ में।[क] (उदाहरण) "ईयते नरा च शंसं दैव्यम्।"[ख] इस प्रकार कतिपय आचार्य (व्याख्या) करते हैं।

उ० भा० अपरे पुनरन्यथा। ईयत इत्येतस्यानवसानीयता नैव प्राप्नोति। कथम् ? पदैकदेशेन वा कृत्स्नेन वा पदसंधिर्दृष्टो भवतीति। किमर्थं तर्हीदमुच्यते ? "ततो व्यवेतं च सह व्यवायि च" इत्येवमाद्यपूर्वविधिः। स चानुक्तः पुनरुच्यते॥

टि० (क) जिस 'अनानुपूर्वी संहिता' के पूर्व में कोई पद विद्यमान हो उसमें (१) उस 'अनानुपूर्वी संहिता' के पहले तक पदों के क्रम से दो-दो पदों के क्रम-वर्ग बनाने चाहिए। इसके बाद (२) अन्य पद के द्वारा पृथक् किये गये पद और पृथक् करने वाले पद–इन दोनों को इनके पूर्ववर्ती तथा परवर्ती पदों के साथ एक ही क्रम-वर्ग में रख देना चाहिए। इस प्रकार यहाँ पर चार पदों का एक क्रम-वर्ग बनता है।

(ख) द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यम्॥ सं० पा०
द्वा। जना। यातयन्। अन्तः। ईयते। नराशंसम्। च। दैव्यम्॥ प० पा०
द्वा जना। जना यातयन्। यातयन्नन्तः। अन्तरीयते। ईयते नरा च शंसं दैव्यम्॥ क्र० पा०

[१] ऋ० क्र० ९।८६।४२ [२] १०।१-२ [३] ऋ० क्र० ९।८६।४२

उ० भा० अ०—दूसरे (आचार्य) अन्य प्रकार से (व्याख्या) करते हैं। (उनका कहना है कि) 'ईयते' का क्रम-वर्ग के अवसान में न आना प्राप्त नहीं होता है। कैसे (प्राप्त नहीं होता है) ? (उत्तर) पद के एक भाग (देश) के साथ अथवा सम्पूर्ण (पद) के साथ पद-संधि दिखलाई देती है। तब यह (सूत्र) किस लिए कहा गया है ? (उत्तर) "तदनन्तर पृथक् होने वाला (पद) और पृथक् करने वाला (पद)–इन दोनों का साथ में"—इत्यादि अपूर्व विधि है। वह (विधि) कही नहीं गई है, इसलिए पुनः कथन किया गया है।

**ततो निराहेतरयोश्च ते पदे**
**ततोऽव्यवेतेन परस्य संहिता ॥१६॥**

सू० अ०—तदनन्तर (क्रम-वक्ता) इन दोनों (पृथक्-भूत और पृथक् करने वाले) पदों का पुनः उच्चारण करता है (अर्थात् इनका 'परिग्रह' करता है); अन्य दो (स्थलों=जहाँ पर 'अनानुपूर्वी संहिता' के पूर्व में कोई पद नहीं होता है) पर भी (ऐसा ही किया जाता है)। तब पृथक् न किये गये (पद) के साथ परवर्ती पद की संहिता (करनी चाहिये)।

उ० भा०—ततोऽस्यामवस्थायाम्; निराह वक्ता=परिग्रहेण योजयति इत्यर्थः। ते पदे। कतरे ? व्यवेतं च यच्च व्यवैति। "नराशंसमिति नराशंसम्। चेति च।"[१] इतरयोश्च। कतरयोः ? अविद्यमानपूर्वयोस्ते पदे निराह। "शुनश्चिच्छेपं निदितम्। शुनःशेपमिति शुनःऽशेपम्। चिदिति चित्।"[२] "नरा वा शंसं पूषणम्। नराशंसमिति नराशंसम्। चेति वा।"[३] ततोऽव्यवेतेन पदेन परस्य संहिता कर्तव्या—"दैव्यं च।"[४] "निदितं सहस्रात्।"[५] "पूषणमगोह्यम्।"[६] असंदिग्धार्थमिदमाचार्येण विस्तरेणोक्तम्॥

उ० भा०—पार्षदे यत्; आचरितम्=पूर्वशास्त्रविहितम्—"क्रमो द्वाभ्यामभिक्रम्य"[2] इत्येवमादि; तत् तु; नोत्क्रमेत्=नान्यथाकुर्यात्—इत्यर्थः। क्रमस्य वर्त्म वृत्तं स्मृतिसंभवौ हेतू; ब्रुवन्=वक्ता। स्मृतिः=शास्त्रदर्शनादि। संभवः=उपपत्तिः—इत्यनर्थान्तरम्। अस्य=क्रमस्य; समाधिम्=संपदम्। अन्वितराणि। अनुगम्यानुलक्ष्य च। इतराणि कतराणि ? क्रमहेतौ शासनानि। कीर्तयेत्। किमुक्तं भवति ? पूर्वस्मिन्क्रमशास्त्रे या

टि० (क) आ मन्द्रमा वरेण्यमा॥ सं० पा०॥ आ। मन्द्रम्। आ। वरेण्यम्। आ॥ प० पा० आ मन्द्रम्। एत्या। मन्द्रमा वरेण्यम्। मन्द्रमिति मन्द्रम्। आ वरेण्यम्। एत्या॥ क्र० पा०

[1] ऋ० क० ९।६५।२९    [2] १०। १-२

संपद्धक्ता तस्या अविरोधेन हेतूक्तानि कुर्यात् —इत्यर्थः । "अग्निमीळे । ईळे पुरोहितम् ।"[१] हेतौ परिगृह्यमाणेऽत्रापि त्रिक्रमः प्राप्नोति— "अदृष्टमार्ष्यां यदि दृश्यते क्रमे"[२] इति ॥

अपरे वर्णयन्ति—समाधिमस्यान्वितराणि कीर्तयेत् – अस्य क्रमस्य समाधिमनुक्रमितराणि क्रमहेतौ शासनानि कीर्तयेत् । किमुक्तं भवति ? पूर्वस्मिन्क्रमशास्त्रे या संपद्धक्ता तस्या अविरोधेन हेतूक्तानि कुर्यात्-इत्यर्थः । यथा –"अदृष्टवर्णे प्रथमे प्रदर्शनम् ।"[३] यथा च प्लुतादिप्रभृतीनीत्येवमादीनि ॥

उ० भा० अ०—प्रातिशाख्य (पार्षद) में जो; आचरितम्=प्रतिपादित किया गया है="दो पदों से प्रारम्भ करके (दो-दो पदों से क्रम-पाठ किया जाता है)" इत्यादि जो पूर्व-शास्त्र (दशम पटल में) विहित है; उसका (उसको); तु नोत्क्रमेत्=उल्लंघन नहीं करना चाहिए=इसके विपरीत (क्रम-पाठ) नहीं करना चाहिए—यह अर्थ है। क्रमस्य वर्त्म=क्रम-पाठ का जो मार्ग (दशम पटल में) निश्चित किया गया है उसमें (उसको); ब्रुवन्=वक्ता; स्मृतिसंभवौ=स्मृति और संभव को; हेतु के रूप में अपनावे। स्मृति= शास्त्रदर्शनादि (=दशम पटल में कहे गये नियम)। संभव=युक्ति —ये भिन्नार्थक नहीं हैं (अर्थात् 'संभव' और 'युक्ति'—ये दोनों समानार्थक हैं)। अस्य=इस क्रम-पाठ के; समाधिम्=उत्कर्ष को; अन्वितराणि –अनु=अनुगमन करके और उस पर दृष्टि रखकर; इतराणि=अन्य। अन्य कौन ? (उत्तर) क्रम-हेतु पटल में उपदेश। कीर्तयेत्= कहने चाहिए। कहने का क्या तात्पर्य है ? (उत्तर) पूर्ववर्ती क्रम-शास्त्र (दशम पटल) में जो तथ्य बतलाये गये हैं उनका विरोध न करते हुए (एकादश पटल में नवीन) हेतुओं का कथन करना चाहिए—यह अर्थ है।[क] "आर्षी संहिता में अदृष्ट कोई रूप यदि क्रम-पाठ में दिखलाई पड़े (तो इससे आर्षी संहिता का लोप हो जाता है)"—इस (तथ्य) का हेतु-पटल (एकादश पटल) में ग्रहण होने से यहाँ "अग्निमीळे। ईळे पुरोहितम् ।"[ख] में भी तीन पदों का एक क्रम-वर्ग प्राप्त होता है।

टि० (क) इन आचार्यों का मत है कि (१) दशम मण्डल में प्रतिपादित नियमों के अनुसार ही क्रम-पाठ का निर्माण करना चाहिए और एकादश पटल में हेतुओं को भी ऐसे बतलाना चाहिए जिससे दशम पटल के नियमों का उल्लंघन न हो। (२) कभी-कभी युक्ति के आधार पर क्रम-पाठ के निर्माण में कुछ हेर-फेर किया जा सकता है। ऐसी अवस्था में भी दशम-पटल के नियमों पर सर्वदा दृष्टि रखनी चाहिए।

(ख) अ॒ग्निमी॑ळे पु॒रोहि॑तम् ॥ सं० पा० ॥ अ॒ग्निम् । ई॒ळे॒ । पु॒रःऽहि॑तम् ॥ प० पा०
अ॒ग्निमी॑ळे । ई॒ळे॒ पु॒रोहि॑तम् ॥ क्र० पा० ॥ दशम पटल के अनुसार।
अ॒ग्निमी॑ळे पु॒रोहि॑तम् ॥ क्र० पा० ॥ इन आचार्यों के अनुसार।

दो-दो पदों के क्रम-वर्ग बनाने पर क्रम-पाठ में 'ईळे' का 'स्वर' आर्षी संहिता में दृष्ट 'स्वर' से भिन्न हो जाता है। अतः ये आचार्य आर्षी संहिता के अलोप के लिए यहाँ तीन पदों का एक क्रम-वर्ग बनाते हैं।

---

[१] ऋ० ऋ० १।१।१ [२] ११।५९ [३] ११।२७

दूसरे आचार्य इस प्रकार व्याख्या करते हैं—समाधिमस्यान्वितराणि कीर्तयेत्= इस क्रम-पाठ के उत्कर्षमात्र के लिए अन्य को अर्थात् क्रम-हेतु-पटल में उपदेशों को कहना चाहिए। कहने का क्या तात्पर्य है? (उत्तर) पूर्ववर्ती क्रम-शास्त्र (दशम पटल) में जो तथ्य बतलाये गये हैं उनका विरोध न करते हुए (एकादश पटल में) हेतुओं को कहना चाहिए—यह अर्थ है। जैसे—"प्रथम (द्वैपद) में (प्रथम पद का अन्तिम) वर्ण दिखलाई न पड़े (तो 'परिग्रह' के द्वारा इसको) दिखलाते हैं।" और जैसे 'दीर्घ' हो गए हैं प्रथम 'अक्षर' जिनके—इत्यादि (के हेतुओं) को (ही कहना चाहिए)।[क]

यथोपदिष्टं क्रमशास्त्रमादितः
पुनः पृथक्त्वैर्विविधैर्न साधुवत् ॥६४॥

सू० अ०--क्रम-शास्त्र जैसा प्रारम्भ में उपदिष्ट किया था वही ठीक है। किंतु अनेक आचार्यों ने पृथक्-पृथक् रूप से (जिस क्रम-शास्त्र को कहा है) वह ठीक नहीं है।

उ० भा० यथोपदिष्टं क्रमशास्त्रमादितः तदेव साधुवदध्येतव्यम्। पुनः पृथक्त्वैर्विविधैः; यदुक्तं तन्न साधुवत् विद्यात्। किं कारणम्? सर्वथाभिक्रमे क्रियमाणे स्वं स्वं पक्षान्तरमाश्रित्य संहिताया अविलोप इत्युच्यते॥

उ० भा० अ०—यथोपदिष्टं क्रमशास्त्रमादितः=प्रारम्भ में क्रम-शास्त्र जैसा उपदिष्ट किया गया था; वही ठीक है—यह जानना चाहिये। पुनः पृथक्त्वैर्विविधैः= किंतु अनेक (आचार्यों) के द्वारा पृथक्-पृथक् रूप से; जिसको कहा गया है। वह; साधुवत् न=ठीक नहीं है—यह जानना चाहिये। क्या कारण है? क्रम-वर्गों को बनाने के विषय में सबने अपने-अपने पक्ष का आश्रय लेकर कहा है कि इस प्रकार आर्षी संहिता का लोप नहीं होता है (सबने अनेक कल्पनायें की हैं)।

इति प्र बाभ्रव्य उवाच च क्रमं।
क्रमप्रवक्ता प्रथमं शशंस च ॥६५॥

सू० अ०—इसलिए क्रम-पाठ के प्रवक्ता बाभ्रव्य ने सर्वप्रथम क्रम-पाठ का प्रवचन किया था और इसकी प्रशंसा की थी।

उ० भा०—इति=एवम्; बाभ्रव्यः=बभ्रुपुत्रो भगवान्पाञ्चालः; (क्रमप्रवक्ता=) क्रमस्य प्रवक्ता; शिष्येभ्यः क्रमं प्रथमं प्रोवाच प्रशशंस च हिताय। कथं ज्ञायते हितायेति? प्रथममधिगम्य क्रमकाः कृतसंक्रमा इव मार्गमाक्रमन्तः सुखमाक्रमन्ते। संशय-दुर्गाणि च क्रमन्ते। भवति चात्र श्लोकः—

क्रमाभिगमभिन्नानि दुर्गाणि सुमहान्त्यपि।
विलीयन्तेऽर्कभिन्नानि तमांसीव निशात्यये॥ इति

टि० (क) दूसरे आचार्यों का मत है कि दशम पटल के नियमों का पूर्णतया पालन करना चाहिए। उनमें किसी भी अवस्था में हेर-फेर नहीं किया जा सकता है। दशम पटल में विहित नियमों की पुष्टि करने के लिए ही एकादश पटल में हेतुओं का कथन करना चाहिए।

उ० भा० अ०—इति=इसलिए (अर्थात् शुद्ध क्रम-पाठ की रक्षा के लिए); (क्रमप्रवक्ता=) 'क्रम' के प्रवक्ता; बाभ्रव्यः=बभ्रु के पुत्र भगवान् पाञ्चाल ने; शिष्यों के लिये; क्रमं प्रथमं प्रोवाच=क्रम-पाठ का सर्वप्रथम प्रवचन किया; (और) हित के लिय; प्रशशंस च=(इसकी) प्रशंसा भी की। (यह) कैसे ज्ञात होता है कि हित के लिये? (उत्तर) क्रम-पाठी लोगों ने उस प्रथम ज्ञान को प्राप्त करके शिष्य-परम्परा से क्रम-मार्ग को प्रशस्त किया और संशय रूपी दुर्गों को पार कर गये। इस विषय में श्लोक भी है—

"रात्रि के व्यतीत हो जाने पर सूर्य के द्वारा जिस प्रकार अन्धकार विनष्ट हो जाते हैं उसी प्रकार क्रम-पाठ के ज्ञान से (संशय के) विशाल भी दुर्ग टूट कर विलीन हो जाते हैं।"

(आक्षेपनिरसनपूर्वकं क्रमपाठस्यार्थवत्त्वनिरूपणम्)

**क्रमेण नार्थः पदसंहिताविदः**
**पुराप्रसिद्धाश्रयपूर्वसिद्धिभिः ।**
**अकृत्स्नसिद्धश्च न चान्यसाधको**
**न चोदयापायकरो न च श्रुतः ॥३६॥**

(आक्षेप का निराकरण करके क्रम-पाठ की उपयोगिता का निरूपण)

सू० अ०—क्रम-पाठ का कोई प्रयोजन नहीं है क्योंकि (पद-पाठ और संहिता-पाठ जानने के अनन्तर (यह प्रारम्भ होता है)। यह (पद-पाठ और संहिता-पाठ के) पूर्व में असिद्ध है क्योंकि यह आश्रय (पद-पाठ और संहिता-पाठ) के सिद्ध होने पर ही सिद्ध होता है। इसके अतिरिक्त यह पूर्णतया सिद्ध भी नहीं है और न यह किसी अन्य वस्तु को सिद्ध करता है। यह न लाभकर है और न हानिकर है तथा यह शास्त्र में भी नहीं सुना गया है।

उ० भा०—योऽयं विहितो विधिः—"क्रमो द्वाभ्यामभिक्रम्य"[1] इति तेन (क्रमेण) नार्थः। कस्य हेतोः? पदसंहिताविदः=पदानि विदुषः संहितां च; उत्तरकालं क्रमविधिरारभ्यते। किंच—पुराप्रसिद्धाश्रयपूर्वसिद्धिभिः—हेतौ तृतीया। पुराप्रसिद्धः=एवं चास्य क्रमस्य पदसंहितात् पूर्वमप्रसिद्धेः। आश्रयपूर्वसिद्धिभिः—पदसंहितं क्रमस्याश्रयस्तत्पूर्विकाश्चास्य सिद्धयो भवन्ति। पुरा चेन्न विधीयते, न चान्यतो विधीयते; तस्मात्पदसंहितादनन्योऽयं क्रमो भवति। अविशेषे हि विशेषारम्भोऽनर्थकः।

उ० भा० अ०—"दो पदों से प्रारम्भ करके (दो-दो पदों से क्रम-वर्गों को बनावे)"—इससे जिस क्रम-पाठ का विधान किया गया है उस (क्रमेण=क्रम-पाठ) से; नार्थः=कोई प्रयोजन नहीं है (अर्थात् वह निष्प्रयोजन है)। क्यों? (उत्तर) पदसंहिताविदः=पद-पाठ को जानकर और संहिता-पाठ को जानकर बाद में क्रम-पाठ का विधान प्रारम्भ होता है। इसके अतिरिक्त; पुराप्रसिद्धाश्रयपूर्वसिद्धिभिः—हेतु-कथन में तृतीया है। पुरा-

[1] ऋ० १०।१–२

प्रसिद्धः=पद-पाठ और संहिता-पाठ से पूर्व में यह क्रम-पाठ सिद्ध नहीं है। आश्रयपूर्वसिद्धिभिः=पद-पाठ और संहिता-पाठ क्रम-पाठ के आधार हैं; उनके बाद में ही इसकी सिद्धि होती है। यतः (यह क्रम-पाठ) (पद-पाठ और संहिता-पाठ के) पूर्व में विहित नहीं है और (इन दोनों के अतिरिक्त किसी) अन्य से विहित नहीं है; अतः यह क्रम-पाठ पद-पाठ और संहिता-पाठ से भिन्न वस्तु नहीं है। पृथक् (विशेष) न होने पर पृथक् (विशेष) प्रयत्न करना अनर्थक है।

उ० भा०—अकृत्स्नसिद्धश्च=न कृत्स्नसिद्धः क्रमः। यद्यपि चास्य विशेषाः सन्ति संहिताया अविलोपार्थं तथापि पदसंहिताश्रयत्वादकृत्स्नसिद्ध इत्युच्यते। न चान्यसाधकः इति=नायं क्रमोऽन्यशास्त्राश्रयत्वाद् विशेषान् साधयति। अकृत्स्नसिद्धस्य ह्यन्यसाधनं न विद्यते। न चोदयापायकरः इति=न चायं क्रमोऽध्येतुरभ्युदयकरो न चापायकरः। न च श्रुतः इति=न चायं क्रमोऽष्टानां ब्राह्मणपथानामन्यतमस्मिन् ब्राह्मणपथे श्रूयते। यथा ऋषिदैवतच्छन्दोयुक्तः स्वाध्यायो यज्ञकर्मसु संहिताविधिः। यथा च नामाख्यातोपसर्गनिपाताः पदमिति पदविधिः। एभिः कारणैः क्रमेण नार्थ इत्युच्यते। भवति चात्र श्लोकः—

यदि विषयगतो नान्यं जनयति कंचिद् गुणविशेषं कृत्स्नम्।
कलुषमतिकरं साधुस् तत्पर्षदि न वदेदिति॥

उ० भा० अ०—अकृत्स्नसिद्धश्च=क्रम-पाठ पूर्णतया सिद्ध नहीं है। यद्यपि आर्षी संहिता के अविलोप के लिए इस (क्रम-पाठ) में विशेष बातें बतलाई गई हैं तथापि पद-पाठ और संहिता-पाठ पर आश्रित होने के कारण "यह पूर्णतया सिद्ध नहीं है"—यह कहा जाता है। न चान्यसाधकः=अन्य शास्त्रों पर आश्रित होने के कारण यह क्रम-पाठ किसी विशेष वस्तु को सिद्ध नहीं करता है। जो (स्वयं) पूर्णतया सिद्ध नहीं होता है वह अन्य का साधन नहीं हो सकता है। न चोदयापायकरः=यह क्रम-पाठ अध्येता का न लाभ करता है और न हानि करता है। न च श्रुतः=यह शास्त्र में नहीं सुना गया है=आठ ब्राह्मणपथों में से किसी भी ब्राह्मणपथ में यह क्रम-पाठ नहीं सुना गया है। जैसे—ऋषि, देवता और छन्द से समन्वित स्वाध्याय यज्ञकर्मों में (प्रयुक्त होता है)—यह संहिता-पाठ का विधान है। और जैसे—'नाम', 'आख्यात', 'उपसर्ग' और 'निपात' पद हैं—यह पद-पाठ का विधान है। इन कारणों से क्रम-पाठ से प्रयोजन नहीं है—यह कहा जाता है। यहाँ (=इस विषय में) यह श्लोक है—

"यदि किसी विषय को प्राप्त करके व्यक्ति किसी दूसरे सर्वाङ्गपूर्ण विशिष्ट गुण को उत्पन्न नहीं करता है और जो (विषय) बुद्धि को मलिन कर देने वाला है उसे सत्पुरुष सभा में न कहे।"

असिध्यतः सिद्धिविपर्ययो यदि
प्रसिध्यतोऽसिद्धिविपर्ययस्तथा ॥६७॥

सू० अ०—(पद-पाठ और संहिता-पाठ के पूर्व में) सिद्ध न होने से यदि (क्रम-पाठ की) सिद्धि का विपर्यय (=असिद्धि) है तो (सिद्ध पद-पाठ और संहिता-पाठ पर आश्रित होने के कारण इस क्रम-पाठ के) सिद्ध होने से (इस क्रम-पाठ की) असिद्धि का विपर्यय (=सिद्धि) है।

उ० भा०—(यदि असिध्यतः=) यदुक्तं पदसंहितात्पूर्वमयं क्रमो न सिध्यति तस्मादस्य; (सिद्धिविपर्य्ययः=) प्रसिद्धिविपर्ययः; इति। तन्नास्ति। कस्य हेतोः ? प्रसिध्यतः; (असिद्धिविपर्य्ययः=) असिद्धत्वस्य विपर्ययः; तथा भविष्यति। प्रसिद्धं हि पदसंहितमाश्रित्य यद्ययं क्रमो वर्तते ततः प्रसिद्ध एव। अनन्यश्चायं पदसंहितात् क्रमो भवतीति प्रतिज्ञा पूर्वमुक्ता। एकदेशं हि साधयत्येकदेशी ॥

उ० भा० अ०—(यदि असिध्यतः=) जो यह कहा गया था कि पद-पाठ और संहिता-पाठ से पूर्व में यह क्रम-पाठ सिद्ध नहीं होता है इसलिये इस (क्रम-पाठ) की; (सिद्धिविपर्य्ययः=) सिद्धि का विपर्यय (=असिद्धि) है—वह ठीक नहीं है। क्या कारण है? प्रसिध्यतः=सिद्ध होने वाले (क्रम-पाठ की); उसी प्रकार; (असिद्धिविपर्य्ययः=) असिद्धि का विपर्यय (=सिद्धि) होगा। यतः प्रसिद्ध पद-पाठ और संहिता-पाठ को आश्रय बनाकर यह (क्रम-पाठ) प्रवृत्त होता है इसलिए यह (क्रम-पाठ) भी सिद्ध ही है। संहिता-पाठ और पद-पाठ से क्रम-पाठ अभिन्न है—यह प्रतिज्ञा पहले ही कही जा चुकी है। पूर्ण वस्तु अपने अङ्ग को सिद्ध कर देती है (अतः सिद्ध पद-पाठ और संहिता-पाठ अपने आश्रित क्रम-पाठ को भी सिद्ध कर देते हैं)।

**सहापवादेषु च सत्सु न क्रमः**
**प्रदेशशास्त्रेषु भवत्यनर्थकः ॥६८॥**

सू० अ०—निन्दा की गई है जिनकी ऐसे प्रदेशशास्त्रों के विद्यमान होने पर यह क्रम-पाठ भी अनर्थक नहीं है।

उ० भा०—अपवादः=निन्दा-इत्यर्थः। सहापवादेषु प्रदेशशास्त्रेषु सत्सु। यैरर्थाः प्रदिश्यन्ते तानि प्रदेशशास्त्राणि यथा सांख्ययोगशास्त्राणि। तेष्वप्यन्यस्मिन्नन्यस्यापवादो दृश्यते। तेषु शास्त्रेषु। सत्सु=विद्यमानेषु-इत्यर्थः। न अयं क्रमोऽनर्थकः; (भवति=) भवितुमर्हति ॥

उ० भा० अ०—अपवादः=निन्दा- यह अर्थ है। सहापवादेषु प्रदेशशास्त्रेषु सत्सु—प्रदेश शास्त्र वे हैं जिनके द्वारा अर्थों का उपदेश होता है जैसे सांख्यशास्त्र और योगशास्त्र। (उन प्रदेशशास्त्रों) में भी एक में दूसरे की निन्दा मिलती है। (निन्दा होने पर भी) उन शास्त्रों के विद्यमान होने पर यह; क्रमोऽनर्थकः न भवति=क्रम-पाठ अनर्थक नहीं होता है; (अर्थात् यद्यपि ११।६६ में क्रम-पाठ की निन्दा की गई है तथापि उस निन्दा के कारण यह शास्त्र अनर्थक नहीं हो जाता है)।

**विपर्ययाच्छास्त्रसमाधिदर्शनात्**
**पुराप्रसिद्धेरुभयोरनाश्रयात्।**
**समभ्युपेयाद् बहुभिश्च साधुभिः**
**श्रुतेश्च सन्मानकरः क्रमोऽर्थवान् ॥६९॥**

सू० अ०—(१) (११।६७ में दिखलाये गये) विपर्यय से (२) समाधि के दर्शन से (३) पहले ही प्रसिद्ध होने से (४) (पद-पाठ और संहिता-पाठ पर)

आश्रित न होने से (५) अनेक ऋषियों के द्वारा गृहीत होने से (६) और श्रुति का सम्मान करने से—यह क्रम-पाठ उपयोगी है।

उ० भा०—विपर्ययात् इति—"क्रमेण नार्थः पदसंहिताविदः"[१] इत्युक्त्वा—"प्रसिध्यतोऽसिद्धिविपर्ययस्तथा"[२] इत्युक्तं स विपर्ययः। असिद्धा अपि हि भावाः सिद्धानाश्रित्य सिद्धा भवन्ति। शास्त्रसमाधिदर्शनात् चायं क्रमोऽर्थवान्भवति। शास्त्रसमाधिदर्शनात् इति—क्रमशास्त्रे ह्यनेकविधिविशेषाः संहितापदादिपदान्तानुग्रहार्था विधीयन्ते। यथैवानवसानीयानीति निमित्तसंशयानीत्येवमादयः।

उ० भा० अ०—विपर्ययात्—"पद-पाठ और संहिता-पाठ जानने वाले के लिये क्रम-पाठ का कोई प्रयोजन नहीं है"—यह कहकर—"उसी प्रकार सिद्ध होने वाले (क्रम-पाठ) की असिद्धि का विपर्यय (=सिद्धि) है"—यह जो कहा गया है वह विपर्यय है। असिद्ध भी पदार्थ सिद्ध पदार्थों के आश्रय से सिद्ध हो जाते हैं। शास्त्रसमाधिदर्शनात्=शास्त्र का उत्कर्ष दिखलाई पड़ने से=क्रम-शास्त्र में संहिता के पदादि और पदान्त के स्वरूप-ज्ञान के लिए अनेक विशिष्ट विधियों का विधान किया गया है। जैसे—(क्रम-वर्गों के) अन्त में न आने वाले (पद) और (वे पद जिनके विकार के) निमित्त संशय से युक्त हैं इत्यादि।

उ० भा० पुराप्रसिद्धेः चायं क्रमोऽर्थवान्भवति। पुराप्रसिद्धेः इति। कथं हि नाम पुरा अप्रसिद्धः सन्नवसानीयादीन्विशेषानारभेत ? उभयोरनाश्रयात्। उभे अपि पदसंहिते अनाश्रित्य क्रमो वर्तते तस्मादप्यर्थवान्क्रमः। कथमनाश्रयावित्युच्यते ? व्यतिरिक्ते हि पदसंहिते विशेषारम्भश्च क्रमशास्त्रे दृश्यते। यथैवावगृह्याणां परिग्रहणम्। समभ्युपेयाद्बहुभिश्च साधुभिः पूर्वाचार्यैः समभ्युपगमनाच्चायं क्रमोऽर्थवान्भवितुमर्हति। कथं हि नामानर्थकं सन्तं बहवः साधवः परिगृह्णीयुः ?

श्रुतेश्च सन्मानकरः क्रमोऽर्थवान्। श्रुतेश्चायमिष्टः क्रमः। द्विपदेनाङ्गिरसः प्रोचुः। त्रिपदेन बालखिल्याः इति। एभिः कारणैरयं क्रमोऽर्थवान्भवति। भवति चात्र—

सिद्धोऽयं श्रुतितश्च लक्षितोऽनुमतश्च विविधैर्गुणैर्विशेषैर्वितत्य।

संधिं न याति च पदविषयं पुनरपि च विकृतिमुचितां न जहाति ॥

उ० भा० अ०—पहले से ही सिद्ध होने से भी यह क्रम-पाठ उपयोगी होता है। पुराप्रसिद्धेः=जो पहले से सिद्ध नहीं है वह अवसान आदि विशेष बातों के विषय में कैसे प्रयत्न कर सकता है ? उभयोरनाश्रयात्=पद-पाठ और संहिता-पाठ—इन दोनों—के आश्रय के बिना क्रम-पाठ विद्यमान है—इसलिये भी यह उपयोगी है। आश्रय के बिना—यह कैसे कह रहे हो ? (उत्तर) पद-पाठ और संहिता-पाठ क्रम-पाठ से भिन्न हैं और क्रम-पाठ में विशेष बातें दिखलाई पड़ती हैं; जैसे—अवगृह्य पदों का 'परिग्रह'। समभ्युपेयाद्बहुभिश्च साधुभिः—पूर्ववर्ती आचार्यों के द्वारा परिगृहीत होने के कारण भी यह क्रम-पाठ उपयोगी है। यदि (क्रम-पाठ) अनर्थक होता तो बहुत से सत्पुरुष इसको स्वीकार क्यों करते ?

---

[१] ११।६६ [२] ११।६७

**श्रुतेश्च सन्मानकरः क्रमोऽर्थवान्**—क्रम-पाठ श्रुति को भी अभीष्ट है। (श्रुति में कहा गया है) अङ्गिरा ऋषि दो-दो पदों से पाठ करें, बालखिल्य ऋषि तीन-तीन पदों से पाठ करें। इस विषय में यह (श्लोक) है—

"(यह क्रम-पाठ) सिद्ध है, श्रुति में उल्लिखित है, (पूर्ववर्ती आचार्यों के द्वारा) स्वीकृत है, अनेक विशेष गुणों से समन्वित है, पदों की संधि को नहीं करता है (अर्थात् पदों के मूल-रूप को दिखलाता है) किंतु (आर्षी संहिता में दृष्ट) उचित विकार का परित्याग भी नहीं करता है।"

**ऋते न च द्वैपदसंहितास्वरौ**
**प्रसिध्यतः पारणकर्म चोत्तमम् ।**
**क्रमात् ॥७०॥**

**सू० अ०—क्रम-पाठ के विना दो पदों की 'संहिता' और 'स्वर' सिद्ध नहीं होते हैं और उत्तम कोटि का पारणकर्म भी (इसके विना नहीं होता है)।**

उ० भा०—इतश्चायं क्रमोऽर्थवान्भवति। क्रमादृते (द्वैपदसंहितास्वरौ=) द्वैपदसंहिता च द्वैपदस्वरश्च; न (प्रसिध्यतः=) सिध्यति। द्वैपदे हि सिद्ध उत्तरारम्भः शक्यते कर्तुं पादार्धर्चर्क्सूक्तसिद्धयर्थम्। पारणकर्म चोत्तमम् इति–भगवता पाञ्चालेन स्थापितानां पारायणकर्मणां क्रमपारायणमुत्तमं परम्परया महिम्ना च। भवति चात्र श्लोकः—

प्रगाथे पुनरादानं दृष्ट्वा यज्ञविधौ मुनिः ।
अर्थवन्तं क्रमं ब्रूयाद् देवता याश्च शास्त्रतः ॥

उ० भा० अ०—इससे भी क्रम-पाठ उपयोगी होता है। **क्रमादृते**=क्रम-पाठ के विना; (द्वैपदसंहितास्वरौ)=दो पदों की 'संहिता' और दो पदों के 'स्वर'; न (प्रसिध्यतः)= नहीं सिद्ध होते हैं। दो पदों के सिद्ध होने पर ही पाद, अर्धर्च, ऋचा और सूक्त की सिद्धि के लिये आगे प्रयत्न आरम्भ किया जा सकता है। **पारणकर्म चोत्तमम्**—भगवान् पाञ्चाल के द्वारा स्थापित पारायण-कर्मों में कर्म-पारायण परम्परा और महिमा की दृष्टि से सर्वश्रेष्ठ है। इसके विषय में यह श्लोक भी है—

"यज्ञों में प्रयुक्त प्रगाथ में पुनरुक्ति (पुनरादान) को देखकर बुद्धिमान् व्यक्ति को सार्थक क्रम-पाठ का शास्त्र के अनुसार पाठ करना चाहिए[क] और देवताओं का भी।"

टि० (क) पू०—क्रम-पाठ में पदों की पुनरुक्ति होती है और पुनरुक्ति को दोष माना जाता है। अतः क्रम-पाठ अनर्थक है। सि०—यज्ञ में प्रगाथों का शास्त्र के अनुसार प्रयोग होता है। प्रगाथों में भी मन्त्रांशों की पुनरुक्ति होती है। शास्त्र से विहित होने के कारण जिस प्रकार प्रगाथों में पुनरुक्ति दोष नहीं है उसी प्रकार क्रम-पाठ में पदों की पुनरुक्ति दोष नहीं है। अतः क्रम-पाठ अनर्थक नहीं है।

अतोऽप्यृग्यजुषां च बृंहणं
पदैः स्वरैश्चाध्ययनं तथा त्रिभिः ॥७१॥

सू० अ०—यतः ऋचाओं तथा यजुषों का संधारण (क्रम-पाठ की सहायता से) पदों तथा स्वरों के द्वारा किया जाता है अतः तीनों (संहिता-पाठ, पद-पाठ और क्रम-पाठ) के द्वारा (वेदों का) अध्ययन (किया जाता है) ।

उ० भा०—अतोऽपि=अस्मादपि हेतोः; क्रमोऽर्थवान्भवति । क्रमात् (ऋग्यजुषाम् च=) ऋचां च यजुषां च; बृंहणम्=संधारणम्; क्रियते हि पदेन । यथा पदाध्ययनेन चोदात्तानुदात्तस्वरितैर्ऋग्यजुषां धारणं क्रियते । तथाध्ययनं त्रिभिरन्योन्यं वर्तते । संहिता-पदक्रमैः । तस्माच्चायं क्रमोऽर्थवान्भवति । भवति चात्र श्लोकः—

शरदुज्ज्वलो वितिमिरो विभाति भगवान्यथांशुमान् ।
सत्यवचनवित्तमः क्रमकः क्रमते हि संशयांस्तमस्तथात्मवान् ॥

इति पार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रट-
पुत्रउवटकृतौ प्रातिशाख्यभाष्ये क्रमहेतु-
र्नामैकादशं पटलम् ॥

उ० भा० अ०—अतोऽपि=इस कारण से भी; क्रम-पाठ उपयोगी होता है। क्रम-पाठ से; (ऋग्यजुषाम् च=) ऋचाओं का और यजुषों का; बृहणम्=संधारण=पुष्टि; की जाती है। जिस प्रकार (पदैः=) पदाध्ययन (पद-पाठ) के द्वारा; 'उदात्त', 'अनुदात्त' और 'स्वरित' (स्वरैः=स्वरों) की सहायता से ऋचाओं और यजुषों की पुष्टि की जाती है। तथाध्ययनं त्रिभिः=अत एव तीनों के द्वारा अध्ययन किया जाता है—संहिता-पाठ से, पद-पाठ से और क्रम-पाठ से। इस कारण से भी यह क्रम-पाठ उपयोगी है। इस विषय में यह श्लोक है—

"जिस प्रकार अंधकार को नष्ट करके स्वच्छ भगवान् चन्द्रमा शरद् ऋतु में प्रकाशित होता है उसी प्रकार सत्य पाठ (वचन) को पूर्णतया जानने वाला तथा आत्मज्ञानी क्रम-पाठी सभी संशयों को दूर करके विराजमान होता है।"

आनन्दपुर के निवासी वज्रट के पुत्र उवट की कृति पार्षदव्याख्यात्मक
प्रातिशाख्यभाष्य में क्रम-हेतु-नामक एकादश पटल समाप्त हुआ ॥

———

---

१२ : सोमा-पटलम्

अपदान्तीयवर्णाः

पदादौ गन्तुमनर्हा वर्णाः

अन्योन्यं संयोक्तुमनर्हा वर्णाः

ऋचां पदमध्य एवोक्तविधानस्य चरितार्थत्वम्

नामाख्यातोपसर्गनिपातानां चतुर्णां पदजातानां निरूपणम्

(अपदान्तीयवर्णाः)

ऊष्मान्तस्थर्सोष्मचकारवर्गा
नान्तं यान्त्यन्यत्र विसर्जनीयात् ॥१॥

(पद के अन्त में न आने वाले वर्ण)

सू० अ०—विसर्जनीय को छोड़कर अन्य 'ऊष्म' (–वर्ण), 'अन्तःस्था' (–वर्ण), ऋकार, 'सोष्म' (–वर्ण) और चकारवर्ग (पदों के) अन्त में नहीं आते हैं।

उ० भा०—(ऊष्मान्तस्थर्सोष्मचकारवर्गाः=) ऊष्माणश्च, अन्तःस्थाश्च, ऋकारश्च, सोष्माणश्च, चकारवर्गश्च–इत्येते सप्तविंशतिवर्णाः; (अन्तम्=) पदान्तम्; (न यन्ति=) न गच्छन्ति। किमविशेषेण? नेत्याह—(अन्यत्र विसर्जनीयात्=) विसर्जनीयं वर्जयित्वा। विसर्जनीयस्तूष्मसु मध्ये तिष्ठति तथापि पदान्तं गच्छति—अग्निः, वायुः।

परिशेषादन्ये गच्छन्ति। तानुदाहरिष्यामः। एव। तया। नृऽभ्यः। अभि। देवी। वसु। बाहू। अग्ने। वायो। वै। तौ। वाक्। अर्वाङ्। विट्। वृषण्ऽवान्। यत्। देवान्। त्रिष्टुप्। इन्द्रम्॥

उ० भा० अ०—(ऊष्मान्तस्थर्सोष्मचकारवर्गाः=) 'ऊष्म' (–वर्ण) (=ह, श, ष, स, अः, ≍क, ≍प, अं), 'अन्तःस्थाः' (–वर्ण) (=य, र, ल, व), ऋकार (ऋ), 'सोष्म' (–वर्ण) (=ख घ, छ झ, ठ ढ, थ ध, फ भ) और चकारवर्ग (=च, छ, ज, झ, ञ)—ये सत्ताईस वर्ण; (अन्तम्=) पद के अन्त में; (न यन्ति=) नहीं प्राप्त होते हैं (अर्थात् ये सत्ताईस वर्ण पदों के अन्त में नहीं आते हैं)।[क] क्या विना किसी विशेष के? (उत्तर) नहीं, (सूत्रकार ने कहा है)—(अन्यत्र विसर्जनीयात्=) विसर्जनीय को छोड़कर। विसर्जनीय तो 'ऊष्म' (–वर्णों) के मध्य में स्थित है तथापि पदों के अन्त में आता है—अग्निः, वायुः।

टि० (क) पदों के अन्त में ये वर्ण नहीं आते हैं—

(१) सात 'ऊष्म'–वर्ण—ह, श, ष, स, ≍क ≍प, अं। (२) चार 'अन्तःस्था'-वर्ण–य, र, ल, व। (३) ऋ। (४) दस 'सोष्म'-वर्ण–ख, घ, छ, झ, ठ ढ, थ, ध, फ, भ। (५) चवर्ग के तीन वर्ण–च, ज, ञ (छ, झ का उल्लेख तो 'सोष्म'–वर्णों में ही हो गया है।

इस प्रकार ये उपर्युक्त पच्चीस वर्ण पदों के अन्त में नहीं आते हैं। भाष्यकार ने सत्ताईस वर्ण क्यों लिखा? ऐसा लगता है कि उन्होंने छ और झ—इन दो वर्णों की 'सोष्म'-वर्णों और चवर्ग—इन दोनों में गणना कर ली है।

अवशिष्ट होने से (सूत्र में उल्लिखित वर्णों से) अन्य (पदों के अन्त में) आते हैं।[क] उनके उदाहरणों को देंगे – एव। तया। नृऽम्यः।[ख] अभि।, देवी। वसु। बाहू। अग्ने। वायो। वै। तौ। वाक्। अर्वाङ्। विट्। वृषण्ऽवान्।[ग] यत्। देवान्। त्रिष्टुप्। इन्द्रम्।

(पदादौ गन्तुमनर्हा वर्णाः)

**ऋकारल्कारौ परमर्धमूष्मणां**
**नादिं तकारादवरे च सप्त ॥२॥**

(पद के आदि में न आने वाले वर्ण)

सू० अ०—ऋकार, ल्कार, 'ऊष्म'-वर्णों में बाद वाला आधा भाग, तकार से पहले वाले सात ('व्यञ्जन') (पदों के) आदि में नहीं (आते हैं)।

उ० भा०—(ऋकारल्कारौ=) ऋकारः, ल्कारः, (परमर्धमूष्मणाम्=) ऊष्मणां चोत्तरो भागः -- विसर्जनीयादिरुच्यते। तकाराच्च; (अवरे=) पूर्वे; ञकारादयः सप्त। एते त्रयोदशवर्णाः; (आदिम्=) पदादिम्; न गच्छन्ति। पारिशेषादन्ये गच्छन्ति। तानुदाहरिष्यामः—अथ। आत्। ऋतम्। इन्द्रम्। ईषत्। उत। ऊचुः[1]। एषः। ओषधीः। ऐत्। औक्षन्। कः। खननानः[2]। गङ्गे[3]। घृतम्। चित्रम्। छाया[4]।

टि० (क) पदों के अन्त में आने वाले ये वर्ण हैं—

(१) 'ऊष्म'-वर्ण–अः (२) 'स्वर'-वर्ण–अ, आ, ऋ, इ, ई, उ, ऊ, ए, ओ, ऐ, औ (३) 'स्पर्श'-वर्ण–क (ग), ङ, ट (ड), ण, त (द), न, प (ब), म (आचार्य शाकटायन के मत से वर्गों के प्रथम वर्ण पदों के अन्त में आते हैं और आचार्य गार्ग्य के मत से वर्गों के तृतीय वर्ण पदों के अन्त में आते हैं; दे० १।१६-१७।

वर्णमाला के कौन-कौन वर्ण पदों के अन्त में और आदि में आते हैं—यह जानना अत्यन्त आवश्यक है क्योंकि पदों के अन्तिम वर्णों और पदों के प्रथम वर्णों में ही विकार-विषयक-नियम लागू होते हैं।

(ख) सूत्रकार के अनुसार 'ऋ' पदान्तीय है किन्तु भाष्यकार ने पूर्व-'पद्य' के अन्त में स्थित 'ऋ' का उदाहरण दिया है। अतः 'ऋ' पद के अन्त में तो नहीं आता है किंतु पूर्व-'पद्य' के अन्त में आता है। पूर्व-'पद्य' को "पदवच्च पद्यान्" के अनुसार पद माना जा सकता है। वा० प्रा० १।८८ ने भी 'ऋ' को पूर्व-'पद्य' के अन्त में आने वाला ही माना है किंतु इससे भी वह 'पदान्तीय'-संज्ञक हो जाता है। वा० प्रा० ने पदों के अन्त में आने वाले वर्णों को 'पदान्तीय'-संज्ञा की है।

(ग) 'ऋ' की भाँति 'ण्' भी पद के अन्त में न आकर पूर्व-'पद्य' के अन्त में ही आता है। वा० प्रा० १।८८ ने भी ऐसा ही माना है और इसकी 'पदान्तीय'-संज्ञा की है।

---

[1] ऋ० ६।८५।८ [2] ऋ० १।१७३।६ [3] ऋ० १०।७५।५ [4] ऋ० १०।१२१।२

जगत् । तम् । प्रत्नऽथा । देवम् । धनम् । नु । परि । फलिनीः[१] । बलम् । भयम् । मम । या । रत्नम् । लक्ष्मीः[२] । वायुः । हरिण्या[३] । शतम् । षट् । सः ॥

उ० भा० अ०—(ऋकारल्कारौ=) ऋकार और लृकार (ऋ, लृ); (परमर्धमूष्मणाम्=) 'ऊष्म' (-वर्णों) का अन्तिम (आधा) भाग—जो विसर्जनीय से प्रारम्भ होता है =अः, ᳵ क, ᳶ प, अं। तकारान्च्च=तकार से; (अवरे=) पहले वाले; सात जो ञकार से प्रारम्भ होते हैं (=ञ, ङ, ट, ठ, ड, ढ, ण)—ये तेरह वर्ण; (आदिम्=) पद के आदि में; न=नहीं; आते हैं।[क] अवशिष्ट होने से (इन तेरह से) अन्य (वर्ण) (पदों के आदि में) आते हैं।[ख] उनके उदाहरणों को देंगे—अथ। आत्। ऋतम्। इन्द्रम्। ईषत्। उत। ऊचुः। एषः। ओषधी। ऐत्। औक्षन्। कः। खनमानः। गङ्गे। घृतम्।[ग] चित्रम्। छाया। जगत्। तम। प्रत्नऽथा।[घ] देवम्। धनम्। नु। परि। फलिनी। बलम्। भयम्। मम। या। रत्नम्। लक्ष्मीः। वायुः। हरिण्या। शतम्। षट्। सः।

### (अन्योन्यं संयोक्तुमनर्हा वर्णाः)

## नान्योन्येन मध्यमा स्पर्शवर्गाः संयुज्यन्ते ॥३॥

**सू० अ०—स्पर्शों के मध्यम (तीन) 'वर्ग' (=चवर्ग, टवर्ग और तवर्ग) एक दूसरे के साथ संयुक्त नहीं होते हैं।**

### (एक दूसरे के साथ संयुक्त न होने वाले वर्ण)

उ० भा०—मध्यमा ये त्रयः स्पर्शवर्गाः ते अन्योन्येन सह न संयुज्यन्ते, स्ववर्गीयैस्तु संयुज्यन्ते। अन्येश्च। यज्ञनीः।[४] जञ्झतीरिव।[५] सुष्टुठु।[६] वृड् य[७]। मण्डूकः।[८] रत्येव।[९] अद्ववनथत्।[१०] इन्दो।[११] रथेति गथ।[१२] वद्ध्वः।[१३] अच्चति।[१४] वज्त्रम्।[१५]

टि० (क) पदों के आदि में न आने वाले तेरह वर्ण ये हैं—ऋ, लृ; अः, क, प, अं; ञ, ङ, ट, ठ, ड, ढ, ण।

(ख) पदों के आदि में आने वाले ये वर्ण हैं—अ, आ, ऋ, इ, ई, उ, ऊ, ए, ओ, ऐ, औ, क, ख, ग, घ, च, छ, ज, त, थ, द, घ, न, प, फ, ब, भ, म, य, र, ल, व, ह, श, ष, स।

(ग) 'ङ' वर्ण किसी भी पद के आदि में नहीं आया है। इस तथ्य की ओर न तो सूत्रकार ने संकेत किया है और न भाष्यकार ने।

(घ) 'थ' किसी पद के आदि में कहीं नहीं आया है किंतु उत्तर-'पद' के प्रारम्भ में तो आया है जैसा कि उदाहरण से स्पष्ट है।

---

[१] ऋ० १०।९७।१५ [२] ऋ० १०।७१।२ [३] ऋ० ९।१११।१
[४] ऋ० १।१५।१२ [५] ऋ० ५।५२।६ [६] ऋ० ८।२२।१८
[७] ऋ० १।९४।८ [८] ऋ० ७।१०३।४ [९] ऋ० १।१८०।४
[१०] ऋ० ६।१८।१० [११] ऋ० १।४३।८ [१२] ऋ० १।१५८।५
[१३] ऋ० ५।४७।६ [१४] ऋ० १।६।८ [१५] ऋ० १।८।३

उष्ट्राणाम् ।[1] वर्त्तनीः ।[2] श्राद्धवम् ।[3] श्च्योतन्ति ।[4] सुत्तौति । मध्यमा इति किम् ? वाक्पतङ्गाय धीयते ॥[5]

उ० भा० अ०—स्पर्शवर्गाः='स्पर्श' (वर्णों) के जो तीन 'वर्ग'; मध्यमाः=बीच वाले (चवर्ग, टवर्ग, तवर्ग) हैं; वे; अन्योन्येन=एक दूसरे के साथ; न=नहीं; संयुज्यन्ते=संयुक्त होते हैं[क]; अपने 'वर्ग' वाले (वर्णों) के साथ तो संयुक्त होते हैं।[ख] (तीन वर्गों के वर्णों को छोड़कर) अन्य (वर्णों) के साथ भी (इन तीन मध्यम वर्गों के वर्ण संयुक्त होते हैं)।[ग] (उदाहरण) यज्ञनीः। जझ्झतीरिव। सुष्टुटु। दूड्ढ्यः। मण्डूकः। रत्थ्येव। अद्ध्वनयत्। इन्दो। ग्वेति ग्घ। वद्ध्वः। अर्च्चति। वज्ज्रम्। उष्ट्राणाम्। वर्त्तनीः। श्राद्धवम्। श्च्योतन्ति। सुत्तौति। "मध्यम (वर्ग)"—यह (सूत्र में) क्यों (कहा है) ? (उत्तर) "वाक्पतङ्गाय धीयते।"[घ]

## न लकारेण रेफः ॥४॥

सू० अ०—रेफ लकार के साथ नहीं (संयुक्त होता है)।

उ० भा०—लकारेण सह रेफो न संयुज्यते। अर्यम्यम् ।[6] अर्चन्ति ।[7] सर्पिः ।[8] बर्हिः ।[9] वर्षम् ।[10]

उ० भा० अ०—लकारेण=लकार के साथ; रेफो न=रेफ नहीं; संयुक्त होता है (अन्य वर्णों के साथ तो रेफ संयुक्त होता है)। (उदाहरण)—अर्चन्ति। सर्पिः। बर्हिः। वर्षम् ॥

टि० (क) चवर्ग का कोई वर्ण टवर्ग तथा तवर्ग के किसी भी वर्ण के साथ संयुक्त नहीं होता है; टवर्ग का कोई वर्ण चवर्ग तथा तवर्ग के किसी वर्ण के साथ संयुक्त नहीं होता है; तवर्ग का कोई वर्ण चवर्ग तथा टवर्ग के किसी वर्ण के साथ संयुक्त नहीं होता है।

(ख) चवर्ग का कोई वर्ण अपने ही वर्ग (=चवर्ग) के किसी भी वर्ण के साथ संयुक्त हो जाता है; टवर्ग का कोई वर्ण अपने ही वर्ग (=टवर्ग) के किसी भी वर्ण के साथ संयुक्त हो जाता है; तवर्ग का कोई वर्ण अपने ही वर्ग (=तवर्ग) के किसी भी वर्ण के साथ संयुक्त हो जाता है।

(ग) इन तीन मध्यम वर्गों में से प्रत्येक का कोई भी वर्ण अन्य दो वर्गों के वर्णों को छोड़कर वर्णमाला के अवशिष्ट किसी भी अन्य वर्ण के साथ संयुक्त हो जाता है।

(घ) यहाँ 'क्' और 'प्' संयुक्त हो गए हैं क्योंकि ये (क् और प्) मध्यम-वर्गों (=चवर्ग, टवर्ग, तथा तवर्ग) के वर्ण न होकर प्रथम (=कवर्ग) और अन्तिम (=पवर्ग) के वर्ण हैं।

---

[1] ऋ० ८।५।३७ [2] ऋ० ४।१९।२ [3] ऋ० २।२९।६
[4] ऋ० १।८७।२ [5] ऋ० १०।१८९।३ [6] ऋ० ५।८५।७
[7] ऋ० १।१०।१ [8] ऋ० ९।६७।३२ [9] ऋ० १।१३।५
[10] ऋ० ५।५८।७

## स्पर्शैर्वकारो न परैरनुत्तमैः ॥५॥

सू० अ०—परवर्ती 'अननुनासिक' (अनुत्तम) स्पर्शों के साथ वकार नहीं (संयुक्त होता है)।

उ० भा०—अनुत्तमैः स्पर्शैः परैर्वकारो न संयुज्यते, पूर्वैस्तु संयुज्यते। क्व। ज्वलयन्ती। अनड्वाहौ।[1] त्वाम्। विम्वा। अनुत्तमैः इति किम्? दधिक्राव्णः। सुतपाव्ने ॥[2]

उ० भा० अ०—परैः=वाद में आने वाले; अनुत्तमैः स्पर्शैः='अननुनासिक' स्पर्शों (=ङ, ञ्, ण्, न्, म् से अन्य स्पर्शों) के साथ; वकारो न=वकार नहीं; संयुक्त होता है। किंतु पहले आने वाले (अनुत्तम स्पर्शों) के साथ तो संयुक्त होता है। (उदाहरण)—क्व। ज्वलयन्ती। अनड्वाहौ। त्वाम्। विम्वा। "अनुत्तम (स्पर्शों) के साथ"—यह (सूत्र में) क्यों (कहा)? (उत्तर) "दधिक्राव्णः"। "सुतपाव्ने।"[क]

## तथा तेषां घोषिणः सर्वथोष्मभिः ॥६॥

सू० अ०—उसी प्रकार उन (स्पर्शों) के (अनुत्तम) 'सघोष' वर्ण 'ऊष्म' (-वर्णों) के साथ किसी भी अवस्था में (संयुक्त नहीं होते हैं)।

उ० भा०—तथा एव तेषां स्पर्शानामुत्तमादन्ये घोषिणः; (सर्वथोष्मभिः=) सर्वैरूष्मभिः=पूर्वैः परैश्च सह; न संयुज्यन्ते। अघोषास्तु संयुज्यन्ते—स्कम्भथुः।[3] श्चोतन्ति। स्तौति। स्थ। स्पट्। यक्ष्म।[4] यख्ष्म। त्सरुः।[5] वत्सम्। विरप्शी। विरफ्शी। अनुत्तमैः इति किम्? यक्ष्म। पृश्निः। विष्णुः। स्म। तेषाम् इति किम्? ह्वयामि। स्वः। स्यात् ॥

उ० भा० अ०—तथा=उसी प्रकार; तेषाम्=उन; 'स्पर्श' (वर्णों) के अन्तिम (ङ, ञ्, ण्, न्, म्) से अन्य; घोषिणः='सघोष' (-वर्ण) (=ग् घ्, ज् झ्, ड् ढ्, द् ध्, ब् भ्); सर्वथोष्मभिः=सभी 'ऊष्म' (-वर्णों) के साथ=पूर्व में आने वाले या बाद में आने वाले ('ऊष्म'-वर्णों) के साथ; संयुक्त नहीं होते हैं। किंतु 'अघोष' ('स्पर्श'-वर्ण) तो ('ऊष्म'-वर्णों के साथ) संयुक्त होते हैं।[ख] (उदाहरण)—स्कम्भथुः। श्चोतन्ति। स्तौति। स्थ। स्पट्। यक्ष्म। यख्ष्म। त्सरुः। वत्सम्। विरप्शी। विरफ्शी।[ग] "अनुत्तम

टि० (क) इन दो स्थलों पर वकार बाद में विद्यमान 'ण्' और 'न्' के साथ संयुक्त हो गया है क्योंकि 'ण्' और 'न्' अनुत्तम 'स्पर्श' न होकर उत्तम 'स्पर्श' हैं।

(ख) (१) वर्गों के अन्तिम 'सघोष' 'स्पर्श'-वर्णों तथा सभी 'अघोष' वर्णों का 'ऊष्म'-वर्णों के साथ 'संयोग' हो जाता है। (२) वर्गों के तृतीय और चतुर्थ 'सघोष' 'स्पर्श' वर्णों का 'ऊष्म'-वर्णों के साथ 'संयोग' नहीं होता है।

(ग) इन सभी स्थलों पर 'अघोष' वर्ण का 'ऊष्म'-वर्ण के साथ 'संयोग' हुआ है।

---

[1] ऋ० १०।८५।१०   [2] ऋ० १।५।५   [3] ऋ० ६।७२।२
[4] ऋ० १०।९७।१३   [5] ऋ० ७।५०।१

(अन्तिम से अन्य)"—यह क्यों (कहा) ? (उत्तर) यक्ष्म। पृश्निः। विष्णुः। स्म।[क] "उन (स्पर्शों) का"—यह (सूत्र में) क्यों (कहा) ? (उत्तम) ह्वयामि। स्वः। स्यात्।[ख]

## नान्त्यान्तस्था न प्रथमोष्मभिः परैः ॥७॥

सू० अ०—न तो अन्तिम 'अन्तःस्था' (=व्) और न प्रथम ('अन्तःस्था'=य्) बाद में आने वाले 'ऊष्म' (-वर्णों) के साथ (संयुक्त होता है)।

उ० भा०—अन्त्यान्तःस्था प्रथमा चोष्मभिः परैर्न संयुज्येते, पूर्वैस्तु संयुज्येते। श्यावाश्वस्य। स्वाहा। अन्त्याप्रथमे इति किम् ? अर्दर्शि। शतवल्शः।[1] बर्हिः। वर्ष्यान्॥[2]

उ० भा० अ०—अन्त्यान्तःस्था=अन्तिम 'अन्तःस्था' (=व्); प्रथमा च=और प्रथम ('अन्तःस्था'=य्)—ये दोनों; परैः ऊष्मभिर्न=बाद में आने वाले 'ऊष्म' (—वर्णों) के साथ नहीं; संयुक्त होते हैं। पूर्व में आने वाले ('ऊष्म'-वर्णों) के साथ तो (व् और य्) संयुक्त होते हैं; (अर्थात् 'व्' और 'य्' का 'संयोग' बाद में स्थित 'ऊष्म'—वर्ण के तो साथ नहीं होता किंतु पूर्व में स्थित 'ऊष्म'-वर्ण के साथ हो जाता है)। (उदाहरण) श्यावाश्वस्य। स्वाहा। "अन्तिम और प्रथम ('अन्तःस्था')"—यह (सूत्र में) क्यों (कहा) ? (उत्तर) बर्हिः। वर्ष्यान्।[ग]

## न रेफो रेफेण॥८॥

सू० अ०—रेफ रेफ के साथ नहीं (संयुक्त होता है)।

उ० भा०—रेफो रेफेण सह न संयुज्यते, अन्यैस्तु संयुज्यंते। अर्यमा॥

उ० भा० अ०—रेफो रेफेण=रेफ रेफ के साथ; न=नहीं; संयुक्त होता है, किंतु अन्य (वर्णों) के साथ तो संयुक्त होता है। (जैसे) अर्यमा।

## न सोष्मणोष्मवान् ॥९॥

सू० अ०—'सोष्म' (-वर्ण) 'सोष्म' (-वर्ण) के साथ नहीं (संयुक्त होता है)।

टि० (क) अनुत्तम वर्ण न होने के कारण 'म्', 'न्', 'ण्' और 'म्'—इन 'सघोष' स्पर्शों का 'संयोग' 'ऊष्म'-वर्णों के साथ हो गया है।

(ख) अनुत्तम वर्ण होने पर भी 'ह्', 'व्' और 'य्' का 'ऊष्म'-वर्णों के साथ 'संयोग' हो गया है क्योंकि ये 'स्पर्श' नहीं अपितु 'ऊष्म'-वर्ण ('ह्') और 'अन्तःस्था' (य् और व्) हैं।

(ग) इन स्थलों पर बाद में आने वाले 'ऊष्म'-वर्णों के साथ रेफ और लकार संयुक्त हो गए हैं क्योंकि रेफ और लकार अन्तिम तथा प्रथम 'अन्तःस्था' न होकर द्वितीय और तृतीय 'अन्तःस्था' हैं।

---

[1] ऋ० ३।८।११ [2] ऋ० ५।८३।३

उ० भा०—सोष्मणा सह ऊष्मवान्न संयुज्यते, अन्यैस्तु संयुज्यते। तुच्छयेनाभ्व-पिहितम्[१]। अमत्थ्नात्[२]॥

उ० भा० अ०—सोष्मणा='सोष्म' (-वर्ण) के साथ; ऊष्मवान्='सोष्म' (-वर्ण); न=नहीं; संयुक्त होता है; किंतु अन्य (-वर्णों) के साथ तो संयुक्त होता है। (उदाहरण) तुच्छयेनाभ्वपिहितम्। अमत्थ्नात्।

## न स्पर्शैरुष्मा प्रथमः परः सन् ॥१०॥

सू० अ०—बाद में होने पर प्रथम 'ऊष्म' (-वर्ण) (=हकार) 'स्पर्श' (-वर्णों) के साथ नहीं (संयुक्त होता है)।

उ० भा०—स्पर्शैः सह प्रथमोष्मा परः सन्न संयुज्यते, पूर्वस्तु संयुज्यते। पूर्वाह्णे।[३] अह्नाह्ना नः।[४] स्पर्शैः इति किम्? बर्हिः॥

उ० भा० अ०—प्रथमोष्मा=प्रथम 'ऊष्म' (-वर्ण) (=हकार); परः सन्=बाद में होने पर; स्पर्शैः='स्पर्श' (-वर्णों) के साथ; न=नहीं; संयुक्त होता है। किंतु पूर्व में होने पर तो ('स्पर्श'-वर्णों के साथ) संयुक्त होता है। (उदाहरण) पूर्वाह्णे। अह्नाह्ना नः।[क] "'स्पर्श' (-वर्णों) के साथ"—यह (सूत्र में) क्यों (कहा)? (उत्तर) बर्हिः।[ख]

## नानुत्तमैः स च सोष्मा च पूर्वौ ॥११॥

सू० अ०—वह (प्रथम 'ऊष्म'-वर्ण=हकार) और 'सोष्म' (-वर्ण) पूर्व में होने पर अनुत्तम 'स्पर्श' (-वर्णों) के साथ नहीं (संयुक्त होते हैं)।

उ० भा०—अनुत्तमैः स्पर्शैः स च हकारः सोष्मा च पूर्वौ सन्तौ न संयुज्येते, उत्तमैस्तु संयुज्येते। ब्रह्म। अह्ना। वृत्रघ्नः। अमथ्नात्।[५] दध्ना। गृभ्णामि॥

उ० भा० अ०—स च=वह हकार भी; सोष्मा च=और 'सोष्म' (-वर्ण) भी पूर्वौ=पूर्ववर्ती होने पर; अनुत्तमैः=अनुत्तम ('स्पर्श'-वर्णों) के साथ; न=नहीं; संयुक्त होते हैं। अन्तिम (उत्तम) ('स्पर्श'-वर्णों) के साथ तो संयुक्त होते हैं। (जैसे) ब्रह्म। अह्ना। वृत्रघ्नः। अमथ्नात्। दध्ना। गृभ्णामि।

## नानुत्तमा घोषिणोऽघोषिभिः सह स्पर्शैं स्पर्शाः ॥१२॥

सू० अ०—अनुत्तम 'सघोष' 'स्पर्श' (वर्ण) 'अघोष' 'स्पर्श' (वर्णों) के साथ नहीं (संयुक्त होते हैं)।

टि० (क) इन उदाहरणों में हकार (प्रथम 'ऊष्म'-वर्ण) 'ण्' और 'न्' के साथ संयुक्त हो गया है क्योंकि हकार इन 'स्पर्श'-वर्णों के पूर्व में विद्यमान है।

(ख) बाद में विद्यमान होने पर भी हकार (प्रथम 'ऊष्म'-वर्ण रेफ के साथ संयुक्त हो गया है क्योंकि रेफ 'स्पर्श'-वर्ण नहीं अपितु 'अन्तःस्था'-वर्ण है।

---

[१] ऋ० १०।१२९।३ [२] ऋ० १।९३।६ [३] ऋ० १०।३४।११

[४] ऋ० १०।३७।९ [५] ऋ० १।९३।६

उ० भा०—अनुत्तमा घोषिणः स्पर्शा; (अघोषिभिः=) अघोषैः; स्पर्शैः पूर्वैः परैश्च सह न संयुज्यन्ते, उत्तमास्तु संयुज्यन्ते-पलिक्नीः।[१] अमथ्नात् :[२] अप्नस्वतीमश्विना।[३] परोदाहरणानि। य ईङ्खयन्ति।[४] पन्याः ॥

उ० भा० अ०—अनुत्तमा घोषिणः स्पर्शाः=अनुत्तम 'सघोष' 'स्पर्श' (-वर्ण); पूर्ववर्ती और परवर्ती; (अघोषिभिः=) स्पर्शैः सह='अघोष' 'स्पर्श' (-वर्णों) के साथ; न=नहीं; संयुक्त होते हैं। अन्तिम (उत्तम) ('सघोष' 'स्पर्श'-वर्ण तो 'अघोष' 'स्पर्श'-वर्णों के साथ) संयुक्त होते हैं। (जैसे) पलिक्नीः। अमथ्नात्। अप्नस्वतीमश्विना। परवर्ती ('अघोष' 'स्पर्श'-वर्णों के साथ 'संयोग') के उदाहरण—य ईङ्खयन्ति। पन्याः।

## नोत्तमा ऊष्मभिः परैः ॥१३॥

सू० अ०—अन्तिम ('स्पर्श'-वर्ण) परवर्ती 'ऊष्म' (-वर्णों) के साथ नहीं (संयुक्त होते हैं)।

उ० भा०—उत्तमाः स्पर्शा ऊष्मभिः परैः सह न संयुज्यन्ते, पूर्वैस्तु संयुज्यन्ते। ब्रह्म। विष्णुः। स्म। पृश्निः। उत्तमाः इति किम्। अप्सु। विरप्शी॥

उ० भा० अ०—उत्तमाः=अन्तिम 'स्पर्श'; परैः ऊष्मभिः=परवर्ती 'ऊष्म' (-वर्णों) के साथ; न=नहीं; संयुक्त होते हैं। पूर्ववर्ती ('ऊष्म'-वर्णों के साथ तो) संयुक्त होते हैं। ब्रह्म। विष्णुः। स्म। पृश्निः। "उत्तम"—यह (सूत्र में) क्यों (कहा)? (उत्तर) अप्सु। विरप्शी।[क]

## लकारस्पर्शैर्न यकार उत्तरैः ॥१४॥

सू० अ०—परवर्ती लकार और 'स्पर्श' (-वर्णों) के साथ यकार नहीं (संयुक्त होता है)।

उ० भा०—(लकारस्पर्शैः=) लकारेण स्पर्शैश्च; उत्तरैर्यकारो न संयुज्यते, पूर्वैस्तु संयुज्यते। विवाल्यम्[५]। दूढ्यः। सत्यम्। आरभ्य[६]। लकारस्पर्शैः इति किम्? इन्द्रवाय्वोः॥

उ० भा० अ०—उत्तरैः=परवर्ती; (लकारस्पर्शैः=) लकार के साथ और 'स्पर्श' (–वर्णों) के साथ; यकारो न=यकार नहीं; संयुक्त होता है। किंतु पूर्ववर्ती (लकार और 'स्पर्श'–वर्णों के साथ तो यकार) संयुक्त होता है। विवाल्यम्। दूढ्यः। सत्यम्। आरभ्य। "लकार और 'स्पर्श' (–वर्णों) के साथ"- यह (सूत्र में) क्यों (कहा)? (उत्तर) इन्द्रवाय्वोः[ख]।

टि० (क) उत्तम 'स्पर्श'-वर्ण न होने के कारण पकार परवर्ती 'ऊष्म'–वर्ण के साथ संयुक्त हो गया है।

(ख) यकार परवर्ती वकार के साथ संयुक्त हो गया है क्योंकि यकार, लकार और 'स्पर्श'–वर्णों से भिन्न वर्ण है।

---

[१] ऋ० ५।२।४ [२] ऋ० १।९३।६ [३] ऋ० १।११२।२४
[४] ऋ० १।१९।७ [५] ऋ० ४।३०।१२ [६] ऋ० १।५७।४

## ऊष्माणोऽन्योन्येन च न ॥१५॥

सू० अ०—'ऊष्म' (-वर्ण) एक दूसरे के साथ भी नहीं (संयुक्त होते हैं)।

उ० भा०—ऊष्माणोऽन्योन्येन च सह न संयुज्यन्ते। स्वैस्तु संयुज्यन्ते। शुनश्शेपः। निष्षिध्वरीः। निष्षपी[1]। शास्सि[2] ॥

उ० भा० अ०—ऊष्माणोऽन्योन्येन च = 'ऊष्म' (-वर्ण) एक दूसरे के साथ भी; न = नहीं; संयुक्त होते हैं। किंतु अपने साथ तो संयुक्त होते हैं। (जैसे) शुनश्शेप। निष्षिध्वरीः। निष्षपी। शास्सि।

### (ऋचां पदमध्ये एवोक्तविधानस्य चरितार्थत्वम्)

## ऋक्पदेष्विदम् ॥१६॥

### (ऋचाओं के पदों के मध्य में ही उक्त विधान की चरितार्थता)

सू० अ०—यह (सब) ऋचाओं के पदों में (ही लागू होता है)।

उ० भा०—यद् इदम् अस्मिन्पटले विधानमुक्तं तत्; (ऋक्पदेषु=) ऋक्षु पदमध्य; एव भवति। पदसंधौ न भवतीति वेदितव्यम्। यदुक्तम्—"नान्योन्येन मध्यमा स्पर्शवर्गाः"[3] इति तत् संधौ न भवति। वषट् ते।[4] उप मा षड् द्वाद्वा।[5] तथा—"न लकारेण रेफः"[6] इति संधौ न भवति। सुमदशुर्ल्ललामीः।[7] तथा—"नोत्तमा ऊष्मभिः परैः"[8] इति संधौ न भवति। देवान्हुवे।[9] वध्यङ्ङ ह मे।[10] अर्वाङ्ङ शश्वत्तमम्।[11] त्वं रजिं पिठीनसे दशस्यन्षष्टिम्।[12] प्रत्यङ्ङ स विश्वा।[13] शर्मन्स्याम।[14] इदमपि पक्षान्तरमित्युदाहरणं भवति ॥

उ० भा० अ०—जो; इदम् = यह; इस पटल में विधान कहा गया है वह; (ऋक्पदेषु=) ऋचाओं में पदों के मध्य में; ही (लागू) होता है। (दो) पदों की संधि में (लागू) नहीं होता है—यह जानना चाहिए। जो कहा गया है—"'स्पर्श'(-वर्णों) के मध्यय 'वर्ग'(चवर्ग, टवर्ग और तवर्ग) एक दूसरे के साथ संयुक्त नहीं होते हैं"—यह (नियम) दो पदों की) संधि में (लागू) नहीं होता है। (जैसे) "वषट् ते।" "उप मा षड् द्वाद्वा।"[क] उसी प्रकार—"रेफ लकार के साथ नहीं (संयुक्त होता है)"—यह (नियम) (दो पदों की)

टि० (क) उपर्युक्त दो स्थलों पर मध्यम वर्गों के 'स्पर्श'-वर्ण 'ट्' और 'त्' तथा 'ड्' और 'द्' संयुक्त हो गए हैं क्योंकि मध्यम वर्गों के 'स्पर्श'-वर्णों के परस्पर संयुक्त न होने का जो विधान (१२।३ में) किया गया था वह दो पदों की संधि में लागू नहीं होता है।

---

[1] ऋ० १।१०४।५ [2] ऋ० १।३१।१४ [3] १२।३
[4] ऋ० ७।९९।७ [5] ऋ० ८।६८।१४ [6] १२।४
[7] ऋ० १।१००।१६ [8] १२।१३ [9] ऋ० १०।६६।१
[10] ऋ० १।११३९।९ [11] ऋ० ३।३५।६ [12] ऋ० ६।२६।६
[13] ऋ० ९।८०।३ [14] ऋ० १।५१।१५

संधि में (लागू) नहीं होता है। (जैसे) "सुमदंशुर्लंलामीः।"क उसी प्रकार—"उत्तम ('स्पर्श'-वर्ण) परवर्ती 'ऊष्म'(-वर्णों) के साथ नहीं (संयुक्त होते हैं")—यह (दो पदों की) संधि में (लागू) नहीं होता है। (जैसे) "देवान्हुवे।" 'दध्यङ्ह मे।" "अर्वाङ्शश्वत्तमम्" "त्वं रजिं पिठीनसे दशस्यन्षष्टिम्।" "प्रत्यङ् स विश्वा।" "शर्मन्स्याम।" यह सब (निषेध) (दो पदों की संधि के लिए) विधान हो गया जैसा उदाहरणों से ज्ञात होता है।

(नामाख्यातोपसर्गनिपातानां चतुर्णां पदजातानां निरूपणम्)

## नामाख्यातमुपसर्गो निपात-
## श्चत्वार्याहुः पदजातानि शाब्दाः ॥१७॥

(नाम, आख्यात, उपसर्ग और निपात–इन चार पदजातियों का निरूपण)

सू० अ०—वैयाकरण पदों की चार जातियाँ बतलाते हैं—नाम, आख्यात, उपसर्ग और निपात।

उ० भा०—नाम, आख्यातम्, उपसर्गः, निपातः—इति चत्वारि पदजातानि; (शाब्दाः=) शब्दविदः; आहुः॥

उ० भा० अ०—नाम, आख्यात, उपसर्ग (और) निपात—ये; चत्वारि पदजातानि=पदों की चार जातियाँ; (शाब्दाः=) शब्दस्वरूपवेत्ता; आहुः=बतलाते हैं।

## तन्नाम येनाभिदधाति सत्त्वम् ॥१८॥

सू० अ०—वह नाम है जिसके द्वारा (वक्ता) द्रव्य का अभिधान करता है।

उ० भा०—तन्नाम इत्युच्यते येन शब्देन अभिदधाति वक्ता; सत्त्वम्=द्रव्यम्—इत्यर्थः। "अग्न इन्द्र वरुण मित्र देवाः॥"[1]

उ० भा० अ०—तन्नाम=वह नाम; कहलाता है; येन=जिस शब्द के द्वारा वक्ता; सत्त्वम्=द्रव्य को—यह अर्थ है; कहता है। (जैसे) "अग्न इन्द्र मित्र वरुण देवाः।"

## तदाख्यातं येन भावं सधातु ॥१९॥

सू० अ०—वह (शब्द) 'आख्यात' है जिसके द्वारा वक्ता क्रिया (भाव) (का अभिधान करता है) और जो धातु से समन्वित (होता है)।

टि० (क) यहाँ लकार के साथ रेफ संयुक्त हो गया है क्योंकि यहाँ दो पदों की संधि हुई है।

(ख) उपर्युक्त छः स्थलों पर अन्तिम 'स्पर्श' परवर्ती 'ऊष्म'-वर्णों के साथ संयुक्त हो गए हैं क्योंकि इनके संयुक्त न होने का जो विधान (१२।१३ में) किया गया था वह केवल स्वतन्त्र पदों के मध्य में ही लागू होता है), दो पदों की संधि में नहीं।

---

[1] ऋ० ५।४६।२

उ० भा०—तदाख्यातम् इत्युच्यते येन शब्देन; (सधातु=) सधातुना; अभिवदाति वक्ता; भावम्=क्रियाम्—इत्यर्थः। "हतं नुदेथां नि शिशीतमत्रिणः॥"[1]

उ० भा० अ०—तदाख्यातम्=वह 'आख्यात'; कहलाती है; येन (सधातु)=जिस धातुसहित शब्द के द्वारा; वक्ता; भावम्=क्रिया का—यह अर्थ है; अभिधान करता है। (जैसे) "हतं नुदेथां नि शिशीतमत्रिणः।"

**प्राभ्या परा निर्दुरनु व्युपाप सं परि प्रति न्यत्यधि सूदवापि।**
**उपसर्गा विंशतिरर्थवाचकाः सहेतराभ्याम् ॥२०॥**

सू० अ० प्र, अभि, आ, परा, निः, दुः, अनु, वि, उप, अप, सम्, परि, प्रति, नि, अति, अधि, सु, उत्, अव और अपि—ये बीस उपसर्ग हैं जो अन्य दो (='नाम' और 'आख्यात') के साथ (प्रयुक्त होकर) अर्थ के वाचक हैं।

उ० भा०—प्र, अभि, आ, परा, निः, दुः, अनु, वि, उप, अप, सम्, परि, प्रति, नि, अति, अधि, सु, उत्, अव, अपि—इत्येते विंशतिरुपसर्गाः; अर्थवाचका=अर्थवाचिनः। सहेतराभ्याम्। कतराभ्याम्? नामाख्याताभ्याम्। प्र—"प्रयाणे जातवेदसः";[2] "प्र देवं देव्या धिया भरत।"[3] अभि—"अभिष्टने ते अद्रिवः"[4]; "अभि ष्याम रक्षसः।"[5] आ—"आयन्तारं महि स्थिरम्"[6]; "मरुद्भिरग्न आ गहि।"[7] परा—"परायतीं मातरमन्वचष्ट"[8]; "परा शृणीहि तपसा यातुधानान्।"[9] निः—"त्वष्टुर्देवस्य निष्कृतम्"[10]; 'तिरश्चता पार्श्वान्निर्गमाणि[11]। दुः "पुराग्ने दुरितेभ्यः"[12]; "दुर्नियन्तुः परिप्रीतः।"[13] अनु—"अनु नु स्यात्यवृकाभिरूतिभिः;"[14]; 'तन्न ऋभुक्षा नरामनु ष्यात्।"[15] वि—"विराट् सम्राट्"[16]; "अपेत वीत वि च"; [17] "विपाट् छुतुद्री।"[18] उप—"यज्ञेयज्ञ उपस्तुता"[19]; "इन्द्रमग्निमुप स्तुहि।"[20] अप—"अस्य प्राणादपानती"[21]; "अपेहि मनसस्पते।"[22] सम्—'प्र सम्राजं चर्षणीनाम्"[23]; "सा सम्राजोरव आ वृणे।"[24] परि—"विदुर्विषाणं परिपानम्"[25]; "वाजी सन्परि णीयते।"[26] प्रति—"प्रतियन्तं चिदेनसः"[27]; "प्रति केतवः प्रथमा अदृश्रन्।"[28] नि—"अपो निषिञ्चन्नसुरः पिता नः"[29]; "महान्तं कोशमुदचा नि षिञ्च।"[30] अति—अतिविद्धा विथुरेण"[31]; "अति

---

[1] ऋ० ७।१०४।१ [2] ऋ० ८।४३।६ [3] ऋ० १०।१७६।२
[4] ऋ० १।८०।१४ [5] ऋ० १०।१३२।२ [6] ऋ० ८।३२।१४
[7] ऋ० १।१९।१ [8] ऋ० ४।१८।३ [9] ऋ० १०।८७।२४
[10] ऋ० १।२०।६ [11] ऋ० ४।१८।२ [12] ऋ० ८।४४।३०
[13] ऋ० १।१९०।६ [14] ऋ० २।३१।३ [15] ऋ० १।१६७।१०
[16] ऋ० १।१८८।५ [17] ऋ० १०।१४।९ [18] ऋ० ३।३३।१
[19] ऋ० १।१३६।१ [20] ऋ० १।१३६।६ [21] ऋ० १०।१८९।२
[22] ऋ० १०।१६४।१ [23] ऋ० ८।१६।१ [24] ऋ० [illegible]७।१
[25] ऋ० ५।४४।११ [26] ऋ० ४।१५।१ [27] ऋ० ८।६७।१७
[28] ऋ० ७।७८।१ [29] ऋ० ५।८३।६ [30] ऋ० ५।८३।८
[31] ऋ० ८।९६।२

कमिष्ठं सुरतं पणेः।"[1] अधि—"मम राष्ट्रस्याधिपत्यमेहि"[2]; "अभिशस्तेरधीहि।"[3] सु—"सुकृत्सुपाणिः स्ववान्"[4]; "अश्विना स्वृषे स्तुहि।"[5] उत्—"उद्यन्नद्य मित्रमहः"[6]; "उभे उवेति सूर्यः।"[7] अव—"अवस्पर्तरधिवक्तारमस्मयुम्"[8]; "अवाधमं वि मध्यमं श्रथाय।"[9] अपि—"यदीं गच्छन्त्युशतीरपिष्ठितम्"[10]; "देवा देवानामपि यन्ति पाथः॥"[11]

उ० भा० अ०—प्र, अभि, आ, परा, निः, दुः, अनु, वि, उप, अप, सम् परि, प्रति, नि, अति, अधि, सु ,उत्, अव, अपि—ये; विंशतिरुपसर्गाः=बीस 'उपसर्ग'; अर्थवाचकाः=अर्थ को बतलाने वाले हैं। सहेतराभ्याम्=अन्य दो के साथ (प्रयुक्त होकर। किन (दो के साथ) ? (उत्तर) 'नाम' और 'आख्यात' के साथ।......।

## इतरे निपाताः ॥२१॥

सू० अ०—अन्य निपात हैं।

उ० भा०—इतरे। कतरे ? नामाख्यातोपसर्गेभ्योऽन्ये निपाता वेदितव्याः। "अस्माञ्च तांश्च॥"[12]

उ० भा० अ०—इतरे=अन्य। कौन ? (उत्तर) 'नाम', 'आख्यात', 'उपसर्ग' से अन्य को; निपाताः='निपात'; जानना चाहिए। जैसे "अस्माञ्च तांश्च।"[क]

## विंशतेरुपसर्गाणामुच्चा एकाक्षरा नव ॥२२॥

सू० अ०—बीस उपसर्गों में से एक 'अक्षर' वाले नौ 'उदात्त' हैं।

उ० भा०—प्र, आ, निः, दुः, वि, सम्, नि, सु, उत्-इत्येत उपसर्गाणां नवसंख्या एकाक्षराः; उच्चाः=उदात्ताः—इत्यर्थः॥

उ० भा० अ०—प्र, आ, निः, दुः, वि, सम्, नि, सु (और) उत्—(विंशतेः) उपसर्गाणाम्=(बीस उपसर्गों के मध्य में ये; (नव=) संख्या में नौ; एकाक्षराः=एक 'अक्षर' वाले; उच्चाः='उदात्त हैं।

## आद्युदात्ता दशैतेषाम् ॥२३॥

सू० अ०- इन (उपसर्गों) में से दस 'आद्युदात्त' हैं।

उ० भा०—एतेषाम् उपसर्गाणां दशाद्युदात्ता वेदितव्याः। परा, अनु, उप, अप, परि, प्रति, अति, अधि, अव अपि - इत्येते॥

उ० भा० अ०—एतेषाम्=इन उपसर्गों में से; दशाद्युदात्ताः=दस को 'आद्युदात्त'; जानना चाहिए। परा, अनु, उप, अप, परि, प्रति, अति, अधि, अव, अपि-ये (दस)।

टि० (क) दोनों "च" निपात हैं।

---

[1] ऋ० १।१८२।३ [2] ऋ० १०।१२४।५ [3] ऋ० १।७१।१०
[4] ऋ० ३।५४।१२ [5] ऋ० ८।२६।१० [6] ऋ० १।५०।११
[7] ऋ० ७।६०।२ [8] ऋ० २।२३।८ [9] ऋ० १।२४।१५
[10] ऋ० १।१४५।४ [11] ऋ० ३।८।९ [12] ऋ० २।१।१६

अन्तोदात्तस्त्वभीत्ययम् ॥२४॥

सू० अ०—'अभि' यह ('उपसर्ग') तो 'अन्तोदात्त' है।

उ० भा०—एतेषामेवोपसर्गाणां मध्ये अभि इत्ययमन्तोदात्तो वेदितव्यः। "अभि-प्रियाणि पवते चनोहितः ॥"[1]

उ० भा० अ०—इन्हीं उपसर्गों के मध्य में अभि इत्ययमन्तोदात्तः='अभि' इस (उपसर्ग) को 'अन्तोदात्त'; जानना चाहिए। (जैसे) "अभि प्रियाणि पवते चनोहितः।"

क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।
सत्त्वाभिधायकं नाम निपातः पादपूरणः ॥२५॥
निपातानामर्थवशान्निपातना-
दनर्थकानामितरे च सार्थकाः।
नेयन्त इत्यस्ति संख्येह वाङ्मये
मिताक्षरे चाप्यमिताक्षरे च ये ॥२६॥

सू० अ०—'आख्यात' क्रिया का वाचक है; 'उपसर्ग' ('नाम' और 'आख्यात' के अर्थ में) विशेषता ला देता है; 'नाम' द्रव्य (सत्त्व) का अभिधान करने वाला है; 'निपात' पाद का पूरण करने वाला है।

कभी-कभी अर्थ के अनुसार प्रयुक्त होने से (निपातनात्) अनर्थक निपातों से अन्य सार्थक भी 'निपात' होते हैं। पद्य (मिताक्षर) और गद्य (अमिताक्षर) साहित्य में जो ('निपात') हैं, उनकी कोई निश्चित संख्या नहीं है कि "इतने ही 'निपात' हैं"।

उ० भा०—ऋज्वर्थवितौ ॥

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्रउवटकृतौ
प्रातिशाख्यभाष्ये द्वादशं सीमापटलम् ॥
इति द्वितीयोऽध्यायः समाप्तः ॥

उ० भा० अ०—इन दोनों (सूत्रों) का अर्थ सरल है।

आनन्दपुर निवासी वज्रट के पुत्र उवट की कृति पार्षदव्याख्यात्मक प्रातिशाख्य-भाष्य में सीमा-पटल नामक द्वादश (पटल) समाप्त हुआ।

॥ द्वितीय अध्याय समाप्त हुआ ॥

---

[1] ऋ० ९.७५.१

## १३ : शिक्षा-पटलम्

वर्णनिष्पत्तौ बाह्यः प्रयत्नः
वर्णनिष्पत्तौ आभ्यन्तरः प्रयत्नः
वर्णनिष्पत्तौ सामान्यवर्णनम्
वर्णाः शाश्वतिका इति मतन्यासः
सघोषाणामनुनासिकानां सोष्मणां
च उत्पत्तिविषये मतभेदाः
अनुनासिकवर्णानामुच्चारणप्रकारः
वर्णगुणोपसंहारः
ऋक्षु पदमध्ये दीर्घपूर्वस्य अनुस्वारस्य
ह्रस्वपूर्वस्य अनुस्वारस्य च उच्चारणव्यवस्था

समापाद्यस्वरूपम्
सोपधानुस्वारस्योच्चारणकालविषये
मतन्यासः
ऋकार-ऌकार-स्वरूपम्
अनुस्वारोच्चारणविषये व्याळेर्मतम्
संध्यक्षराणां स्वरूपम्
वाचो मन्द्रादीनि त्रीणि स्थानानि
सप्त यमास्तेषां स्वरूपम् च
वाचो वृत्तीनां निरूपणम्

(वर्णनिष्पत्तौ बाह्यः प्रयत्नः)

**वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा ।**
**आपद्यते श्वासतां नादतां वा वक्त्रीहायाम् ॥१॥**

(वर्णों की निष्पत्ति में बाह्य प्रयत्न)

सू० अ०—जब वक्ता बोलने की चेष्टा करता है तो फेफड़े (lungs) से फेंकी हुई प्राण-रूप वायु, कण्ठ के छेद (स्वर-यन्त्र) (larynx) के (मुख्यतः) खुले हुए (विवृत) अथवा (मुख्यतः) बन्द होने (संवृत) के अनुसार. 'श्वास' (breath) अथवा नाद' (voice) हो जाती है।

उ० भा०—य इमे शारीरा इह पञ्च वायवो नानाकर्माणः प्राणापानव्यानोदानसमाना-स्तेषां प्राणो हि नाभेरुपरिष्टाद्व्याप्यास्ये व्याचरति। नाभेरधस्तात्पायुमेढ्योरपानः। प्रसारणाकुञ्चनोत्क्षेपणावक्षेपणगतिकर्मा व्यानः। कर्मप्रवृत्तिषु बलमारोपयत्युदानः। सर्व-क्रियाणामुपरमणः समानः। एवं वाचि वर्तमानं प्राणमेक आचार्या मन्यन्ते। अपर उदानं मन्यन्ते—

उपरिष्टान्मुखादग्र ऊर्ध्वं यो वर्ततेऽनिलः।
ऊर्ध्वकर्मक्रियाः सर्वाः प्राणिनां सम्प्रवर्तयन् ॥
नाभ्युरोऽथ शिरोभागं गच्छन्करणसंयुतः।
कण्ठताल्वोष्ठदन्तानां सप्रयत्नः समीरितः ॥
ह्रस्वदीर्घप्लुतान्वर्णान् स्निग्धान् रूक्षांश्च नैकधा।
उदात्ताननुदात्तांश्च स्वरितान्कम्पितानपि ॥
समान्विकीर्णांश्च तथा संवृतान्विवृतानपि।
देहिनामवबोधार्थं तेनोदानः स उच्यते ॥

उ० भा० अ०—शरीर में विद्यमान रहने वाली तथा पृथक्-पृथक् कार्य करने वाली जो ये पाँच वायु · प्राण, अपान, व्यान, उदान और समान हैं उनमें से प्राण वायु नाभि से ऊपर व्याप्त रहकर मुख में विचरण करती है। नाभि के नीचे मलाशय तथा मूत्राशय में अपान (वायु विद्यमान रहती है)। फैलाने वाली, सिकोड़ने वाली, ऊपर को फेंकने वाली, नीचे को फेंकने वाली और सामान्य गति करने वाली व्यान (वायु है)। उदान (वायु) कर्मप्रवृत्तियों में बल प्रदान करती है। समान (वायु) सब क्रियाओं में साम्य रखती है।

इस प्रकार वाणी के उत्पादन में उद्युक्त (वायु) को कतिपय आचार्य प्राण मानते हैं। दूसरे (आचार्य) (वाणी के उत्पादन में उद्युक्त वायु को) उदान मानते हैं—

प्राणियों के शरीर में ऊर्ध्वकर्म स्वरूप सभी क्रियाओं को निष्पन्न करती हुई जो वायु मुख से लेकर आगे ब्रह्मरन्ध्र तक विद्यमान रहती है; नाभि, उरस्, सिर में गमन करती हुई,

विभिन्न अङ्गों से संयुक्त होकर, कण्ठ, तालु, ओष्ठ, दाँतों से प्रयत्नपूर्वक प्रेरित हुई प्राणियों के ज्ञान के लिए 'ह्रस्व', 'दीर्घ', 'प्लुत' वर्णों को, स्निग्ध, रूक्ष, 'उदात्त', 'अनुदात्त', 'स्वरित' और कम्पित, समान, विकीर्ण, संवृत और विवृत (वर्णों) को (उत्पन्न करती है); अतः वह (वायु) उदान कहलाती है।

उ० भा०—एवमुभयथाचार्यविप्रतिपत्तिदर्शनाच्छौनकेन भगवता प्राणं मन्यमानेनेदं शास्त्रमेवं प्रणीतम्—"वायुः प्राणः कोष्ठ्यमनुप्रदानम्" इति। ये पुनरुदानं मन्यन्ते तेषामिदं न सिध्यत्युदानाभावात्। तेषां च सिद्धम्। कथम्? शारीराणां पञ्चानामपि प्राण इति नाम साधारणम्। तस्मात्तेषामपि "वायुः प्राणः कोष्ठ्यमनुप्रदानम्" इत्येवं सिद्धम्।

उ० भा० अ०—इस प्रकार (वाणी के उत्पादन में उद्युक्त वायु के विषय में) आचार्य लोगों में दोनों प्रकार (प्राण अथवा उदान) की विप्रतिपत्ति (मत-भेद) दिखलाई पड़ने से भगवान् शौनक ने (वाणी के उत्पादन में उद्युक्त वायु को) प्राण मानकर इस शास्त्र का इस प्रकार प्रणयन किया है—"उदर से फेंकी हुई प्राण वायु।" (पू०) किंतु जो (आचार्य) (वाणी के उत्पादन में उद्युक्त वायु को) उदान मानते हैं उनके लिए यह (शास्त्र) सिद्ध नहीं होता है क्योंकि (इस शास्त्र में) उदान का अभाव है। (सि०) उनके लिए भी (यह शास्त्र) सिद्ध है। (पू०) कैसे? शरीर में विद्यमान पाँचों प्रकार की वायु का प्राण साधारण नाम है (इनके मत में सूत्रोक्त 'प्राण' का अर्थ है 'उदान')। इसलिए उनके लिए भी "उदर से फेंकी हुई प्राण वायु" यह (शास्त्र) सिद्ध है।

प्राणो वायुः। कोष्ठम्=उदरम्। कोष्ठे भवं कोष्ठ्यम्। अनुप्रदानम्=वायुमनु प्रदीयत इत्यनुप्रदानम्। किं च तत्? श्वासनादोभयम्। केन प्रयत्नेन किमनुप्रदानमापद्यते? कण्ठस्य=ग्रीवायाः; खे=गलस्य बिले=छिद्रे। विवृते=विपुले=विशाले=महति। संवृते=संकुचिते=संश्लिष्टे=अल्पे वा सति। आपद्यते; श्वासताम्=श्वासत्वम्; नादताम्=नादत्वं वा। वक्त्रीहायाम्—ईहा=चेष्टा। वक्तुरीहा=वक्त्रीहा। तस्यां वक्त्रीहायां स वायुः कण्ठबिले विवृते श्वासत्वमापद्यते संवृते नादत्वम्॥

उ० भा० अ०—प्राणो वायुः=प्राण नामक वायु। कोष्ठ=उदर (फेफड़ा=lungs) कोष्ठ्यम्=उदर (फेफड़ा=lungs) में उत्पन्न होने वाली। अनुप्रदानम्—वायु से प्रदान किया जाता है (=वायु का परिणाम है) अतः 'अनुप्रदान'* (emitted material) कहलाता है। (प्रश्न) वह ('अनुप्रदान') है क्या (वस्तु)? (उत्तर) 'श्वास' (breath), 'नाद' (voice) तथा दोनों ('श्वास' और 'नाद')। (प्रश्न) किस प्रयत्न से कौन 'अनुप्रदान' (emitted material) होता है? (उत्तर) कण्ठस्य=ग्रीवा के; खे=गले के बिल=गले के छेद (glottis) के। विवृते=विपुल होने पर=विशाल होने पर=महान् होने पर। संवृते=सकुचित होने पर=मिले हुए होने पर=अल्प होने पर। श्वासताम् आपद्यते=श्वासत्व को प्राप्त होती है; नादताम्=नादत्व को (प्राप्त होती है)। वक्त्रीहायाम्—ईहा=चेष्टा। वक्त्रीहा=वक्ता की चेष्टा। वक्ता की चेष्टा होने पर वह (प्राण नामक) वायु, कण्ठ के छिद्र (स्वर-यन्त्र) (larynx) के खुले होने पर, 'श्वास' (breath) हो जाती है, (और कण्ठ के छिद्र के) बन्द होने पर (वह

वायु) 'नाद' (voice) हो जाती है[क]।

## उभयं वान्तरोभौ ॥२॥

सू० अ०—दोनों (विवृत और संवृत) के मध्य में होने पर (वायु) दोनों ('श्वास'=breath और 'नाद'=voice) हो जाती है।

उ० भा०—उभौ=विवृतसंवृतौ; अन्तरा=कण्ठबिले समे सति; उभयम्=श्वासं नादम्; आपद्यते ॥

उ० भा० अ०—उभौ=खुला हुआ (विवृत) और बन्द (संवृत); अन्तरा=मध्य

टि० (क) फेफड़े (lungs) से बाहर निकलने वाली वायु से ध्वनि की उत्पत्ति होती है। फेफड़े (lungs) से निकलने के बाद वायु स्वर-यन्त्र (larynx) से होकर बाहर आती है। स्वर-यन्त्र (larynx) में पतली झिल्ली के बने दो लचीले पर्दे (elastic bands) होते हैं जिन्हें स्वर-तन्त्री (vocal chords) कहते हैं। स्वर-तन्त्रियों (vocal chords) के बीच के छिद्र को कण्ठ-द्वार (glottis) कहते हैं। जब स्वरतन्त्रियाँ (vocal chords) एक दूसरे से दूर रहती हैं और कण्ठ-द्वार (glottis) खुला रहता है तब वहाँ से निकली हुई वायु 'श्वास' (breath) कहलाती है। जब स्वर-तन्त्रियाँ (vocal chords) एक दूसरे के निकट रहती हैं और कण्ठ-द्वार (glottis) बन्द-सा हो जाता है तब वायु घर्षण के साथ बाहर निकलती है जिससे स्वर-तन्त्रियों (vocal chords) में कम्पन (vibration) हो जाता है। इस अवस्था में बाहर निकली हुई वायु 'नाद' (voice) कहलाती है।

इस प्रकार फेफड़ा (lungs) और स्वर-यन्त्र (larynx) वायु को 'श्वास' (breath) अथवा 'नाद' (voice) बनाकर मुख के उच्चारणावयवों (organs of articulation) को द्रव्य (material) के रूप में प्रदान करते हैं। इन 'श्वास' (breath) और 'नाद' (voice) का उपयोग मुख के उच्चारणावयव वर्णों के उत्पादन में करते हैं। 'श्वास' (breath) और 'नाद' (voice) को 'अनुप्रदान' कहा जाता है। "अनुप्रदीयतेऽनेन वर्ण इत्यनुप्रदानं मूलकारणम्। अनुप्रदीयते उपादीयते जन्यत इत्यर्थः।" तै० प्रा० २।८ पर माहिषेयभाष्य। इसके अनुसार 'अनुप्रदान' वर्णों का मूल कारण है। 'श्वास' और 'नाद' रूप 'अनुप्रदान' को 'बाह्य प्रयत्न' तथा 'प्रकृति' भी कहा जाता है।

उ० भा० अ० —उष्णिहापूर्वः='उष्णिक्' ('उष्णिह्') पूर्व में हो (और) 'सतोबृहती' अन्त में हो तो वह 'प्रगाथ' औष्णिह[क] कहलाता है। जैसे —"यमादित्यासो अद्रुहः।"[ख]

## पङ्क्त्यन्तः पाङ्क्तकाकुभः ॥८॥

सू० अ०—('ककुप्' पूर्व में हो और) 'पङ्क्ति' अन्त में हो तो (वह प्रगाथ) 'पाङ्क्तकाकुभ' (कहलाता है)।

उ० भा०—पङ्क्त्यन्तः ककुप्पूर्वः पाङ्क्तकाकुभो नाम वेदितव्यः। यथा—"अदान्मे पौरुकुत्स्यः"[2] इति ॥

उ० भा० अ०—पङ्क्त्यन्तः='पङ्क्ति' है अन्त में जिसके (और); 'ककुप्' है पूर्व में जिसके (उस 'प्रगाथ' को) पाङ्क्तकाकुभ[ग] नामक जानना चाहिये। जैसे— "अदान्मे पौरुकुत्स्यः।"[घ]

तमिन्द्रं च सुनीथश्च यमादित्यास एव च।
अदान्मे पौरुकुत्स्यश्च ता ऋचोऽत्र निदर्शनम् ॥९॥

सू० अ०—"तमिन्द्रम्....", "सुनीथः....", "यमादित्यासः...." और "अदान्मे पौरुकुत्स्यः...."—ये ऋचायें यहाँ (अर्थात् १८।५-८ में विहित प्रगाथों के) उदाहरण हैं।

उ० भा०—पुरस्तादेव निदर्शनान्युक्तानि ॥

उ० भा० अ० –उदाहरण पहले ही (=१८।५-८ के भाष्य में) कहे जा चुके हैं।

टि० (क) औष्णिह=उष्णिक्+सतोबृहती=(८+८+१२)+(१२+८+१२+८)=६८

(ख) यमादित्यासो अद्रुहः पारं नयथ मर्त्यम्। मघोनां विश्वेषां सुदानवः ॥
यूयं राजानः कं चिच्चर्षणीसहः क्षयन्तं मानुषाँ अनु।
वयं ते वो वरुण मित्रार्यमन् त्स्यामेदृतस्य रथ्यः ॥

(ग) पाङ्क्तकाकुभ=ककुप्+पङ्क्ति=(८+१२+८)+(८+८+८+८+८)=६८

(घ) अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्वधूनाम्। मंहिष्ठो अर्यः सत्पतिः ॥
उत मे प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि।
तिसृणां सप्ततीनां श्यावः प्रणेता भुवद् वसुर्दियानां पतिः ॥

---

[1] ऋ० ८।१९।३४-३५ [2] ऋ० ८।१९।३६-३७

महासतोबृहत्यन्तो यो महाबृहतीमुखः।
स महाबार्हतो नाम ॥१०॥

सू० अ०—'महासतोबृहती' है अन्त में जिसके और 'महाबृहती' है प्रारम्भ में जिसके वह ('प्रगाथ') 'महाबार्हत' नामक है।

उ० भा० – महासतोबृहत्यन्तो महाबृहतीमुखो यः=प्रगाथः स महाबार्हतो नाम वेदितव्यः। यथा – "बृहद्भिरग्ने अर्चिभिः"[1] इति ॥

उ० भा० अ० महासतोबृहत्यन्तो महाबृहतीमुखो यः 'महासतोबृहती' है अन्त में जिसके और 'महाबृहती' है प्रारम्भ में जिसके; स महाबार्हतो नाम=उसे 'महाबार्हत'[क] नामक; 'प्रगाथ' जानना चाहिये। जैसे—"बृहद्भिरग्ने अर्चिभिः।"[ख]

बार्हतो बृहतीमुखः ॥११॥

सू० अ०— 'बृहती' है आदि में जिसके (और 'जगती' है अन्त में जिसके वह 'प्रगाथ') 'बार्हत' (कहलाता है)।

उ० भा०—बृहतीमुखो जगत्यन्तो यः प्रगाथः स बार्हत इत्युच्यते। यथा—"तं वः शर्धं रथेशुभम्"[2] इति ॥

उ० भा० अ० – बृहतीमुखः='बृहती' है आदि में जिसके (और); 'जगती' है अन्त में जिसके वह 'प्रगाथ' बार्हत[ग] कहलाता है। जैसे –"तं वः शर्धं रथेशुभम्।"[घ]

टि० (क) महाबार्हत=महाबृहती+महासतोबृहती=(८+८+१२+८+८)+(१२+८+१२+८+८)=९२

(ख) बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा।
भरद्वाजे समिधानो यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत् पावक दीदिहि ॥
विश्वासां गृहपतिर्विशामसि त्वमग्ने मानुषीणाम्।
शतं पूर्भिर्यविष्ठ पाह्यंहसः समेद्धारं शतं हिमाः स्तोतृभ्यो ये च ददति ॥

(ग) बार्हत=बृहती+जगती=(८+८+१२+८)+(१२+१२+१२+१२)=८४

(घ) तं वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे।
यस्मिन् त्सुजाता सुभगा महीयते सचा मरुत्सु मीळ्हुषी ॥
आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन।
इयं वो अस्मत् प्रति हर्यते मति –स्तृष्णजे न दिव उत्सा उदन्यवे ॥

इस 'प्रगाथ' की प्रथम ऋचा ५।५६ की अन्तिम ऋचा है और द्वितीय ऋचा ५।५७ की प्रथम ऋचा है। इस प्रकार दो सूक्तों की अन्तिम और आदि ऋचाओं के मिलने से यह 'प्रगाथ' बना है।

---

[1] ऋ० ६।४८।७-८ [2] ऋ० ५।५६।९—५।५७।१

## अथो अतिजगत्यन्तः ॥१२॥

सू० अ०—'अतिजगती' है अन्त में जिसके (और 'बृहती' है आदि में जिसके वह 'प्रगाथ') भी ('बार्हत' कहलाता है)।

उ० भा०—(अथो=) अपि च; अतिजगत्यन्तो बृहतीमुखो यः प्रगाथः स च बार्हत एव। यथा—"नेमिं नमन्ति चक्षसा"[1] इति ॥

उ० भा० अ०—अतिजगत्यन्तः='अतिजगती' है अन्त में जिसके (और); 'बृहती' है आदि में जिसके वह 'प्रगाथ'; (अथो=) भी; 'बार्हत'[क] ही है। जैसे—"नेमिं नमन्ति चक्षसा।"[ख]

## यवमध्योत्तरोऽपि च ॥१३॥

सू० अ०—यदि 'यवमध्या' बाद में हो (और 'बृहती' प्रारम्भ में हो) तो भी (वह 'प्रगाथ' 'बार्हत' ही है)।

उ० भा०—यवमध्योत्तरो बृहतीमुखो यः प्रगाथः स च बार्हतः। यथा—"वामी वामस्य धूतयः"[2] इति ॥

उ० भा० अ०—यवमध्योत्तरः='यवमध्या' है बाद में जिसके (और); 'बृहती' है प्रारम्भ में जिसके वह 'प्रगाथ'; च=भी; 'बार्हत'[ग] है। जैसे—"वामी वामस्य धूतयः।"[घ]

## बृहद्भिस्तं वो नेमिं च वामी वामस्य ता ऋचः ॥१४॥

सू० अ०—"बृहद्भिः....", "तं वः...", "नेमिम्...." और "वामी वामस्य...."—ये ऋचायें (१८।१०-१३ के उदाहरण हैं)।

उ० भा०—पुरस्तादेवोदाहृताः ॥

टि० (क) बार्हत = बृहती+अतिजगती = (८+८+१२+८) + (१२+१२+१२+८+८)=८८

(ख) नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥
तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं शवांसि।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तद्राये नो विश्वा सुपथा कृणोतु वज्री ॥

(ग) बार्हत=बृहती+यवमध्या (त्रिष्टुप्)=(८+८+१२+८)+(८+८+१२+८+८)=८०

(घ) वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता।
देवस्य वा मरुतो मर्त्यस्य वे—जानस्य प्रयज्यवः ॥
सद्यश्चिद् यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः।
त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः ॥

---

[1] ऋ० ८।९७।१२-१३। [2] ऋ० ६।४८।२०-२१

उ० भा० अ०—(उदाहरण) पहले ही (=१८।१०-१३ के भाष्य में) कहे जा चुके हैं।

## नहि ते विपरीतान्तः ॥१५॥

सू० अ०—"नहि ते…" (यह 'प्रगाथ') 'विपरीतान्त' (नामक है)।

उ० भा०—"नहि ते शूर राधसः"[1] इत्ययं प्रगाथो विपरीतान्तो बृहतीमुखो विपरीतान्तो नाम वेदितव्यः ॥

उ० भा० अ०—"नहि ते शूर राधसः"[क]—यह 'प्रगाथ' 'विपरीता' में समाप्त होता है और 'बृहती' से प्रारम्भ होता है। इसे विपरीतान्त[ख] नामक जानना चाहिये।

## मो षु त्वा द्विपदाधिकः ॥१६॥

सू० अ०—"मो षु त्वा" (यह 'प्रगाथ') एक 'द्विपदा' से अधिक है।

उ० भा०—"मो षु त्वा वाघतश्चन"[2] इति प्राकृत एव प्रगाथो द्विपदाधिको वेदितव्यः। "रायस्कामो वज्रहस्तं सुदक्षिणम्"[3] इत्येतया सहितो द्रष्टव्यः ॥

उ० भा० अ०—"मो षु त्वा वाघतश्चन"[ग]—इस प्राकृत (='विपरीतान्त') ही 'प्रगाथ'[ख] को; द्विपदाधिकः=एक 'द्विपदा' से अधिक जानना चाहिए। "रायस्कामो वज्रहस्तं सुदक्षिणम्"[घ]—इस (द्विपदा) के सहित (इस 'प्रगाथ' को) समझना चाहिए।

## अनुष्टुब्जगती चैव विश्वेषामिरज्यन्तं च ॥१७॥

सू० अ०—"विश्वेषामिरज्यन्तम्"—यह ('प्रगाथ') 'अनुष्टुप्' और 'जगती' से बना है।

टि० (क) नहि ते शूर राधसो ऽन्तं विन्दामि सत्रा।
दशस्या नो मघवन्नू चिदद्रिवो धियो वाजेभिराविथ ॥
य ऋष्वः श्रावयत्सखा विश्वेत् स वेद जनिमा पुरुष्टुतः।
तं विश्वे मानुषा युगे—न्द्रं हवन्ते तविषं यतस्रुचः ॥

(ख) विपरीतान्त=बृहती+विपरीता=(८+८+१२+८)+(८+१२+८+१२)=७६

(ग) मो षु त्वा वाघतश्चना—ऽऽरे अस्मिन्न रीरमन्।
आरात्ताच्चित्सधमादं न आगही—ह वा सन्नुप।
इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते।
इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥
रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे ॥

(घ) बृहती+विपरीता+द्विपदा=(८+८+१२+८)+(८+१२+८+१२)+(१२+८)=९६

---

[1] ऋ० ८।४६।११-१२ [2] ऋ० ७।३२।१-३ [3] ऋ० ७।३२।३

उ० भा०—"विश्वेषामिरज्यन्तं वसूनाम्"[१] इत्ययं प्रगाथः; (अनुष्टुब्जगती=) अनुष्टुप्पूर्वो जगत्यन्तः; वेदितव्यः ॥

उ० भा० अ०—"विश्वेषामिरज्यन्तं वसूनाम्"[क]—इस 'प्रगाथ' को; (अनुष्टुब्जगती=) 'अनुष्टुप्' से प्रारम्भ होने वाला और 'जगती' में समाप्त होने वाला; जानना चाहिए।[ख]

द्विपदा बृहती चैव स नो वाजेष्विति स्मृतः ॥१८॥

सू० अ०—"स नो वाजेषु"—यह ('प्रगाथ') 'द्विपदा' और 'बृहती' से बना हुआ माना जाता है।

उ० भा० —"स नो वाजेष्ववविता पुरूवसुः"[२] इत्ययं प्रगाथः; (द्विपदा बृहती चैव=) द्विपदापूर्वो बृहत्युत्तरः; स्मृतः ॥

उ० भा० अ०—"स नो वाजेष्ववविता पुरूवसुः"[ग]—इस 'प्रगाथ' को; (द्विपदा बृहती चैव=) 'द्विपदा' से प्रारम्भ होने वाला और 'बृहती' में अन्त होने वाला; माना गया है।[घ]

ककुप्पूर्वस्तु को वेद स्मृतः काकुभबार्हतः ॥१९॥

सू० अ०—'ककुप्' है पूर्व में जिसके ऐसे "को वेद" (इस 'प्रगाथ' को) 'काकुभबार्हत' माना जाता है।

उ० भा०—ककुप्पूर्वो बृहत्यन्तः काकुभबार्हतो नामायं प्रगाथः स्मृतः। यथा—"को वेद जानमेषाम्"[३] इति ॥

उ० भा० अ०—ककुप्पूर्वः='ककुप्' है पूर्व में जिसके (और) 'बृहती' है अन्त में

टि० (क) विश्वेषामिरज्यन्तं वसूनां सासह्वांसम्।
चिदस्य वर्पसः कृपयतो नूनमत्यथ ॥
महः सु वो अरमिषे स्तवामहे मीळ्हुषे अरंगमाय जग्मये।
यज्ञेभिर्गीर्भिर्विश्वमनुषां मरुताम् इयक्षसि गाये त्वा नमसा गिरा ॥

(ख) अनुष्टुप्पूर्व-जगत्यन्त = अनुष्टुप् + जगती = (८+८+८+८)+(१२+१२+१२+१२)=८०

(ग) स नो वाजेष्ववविता पुरूवसुः पुरःस्थाता मघवा वृत्रहा भुवत्।
अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम्।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा।

(घ) द्विपदापूर्व-बृहत्युत्तर = (१२+१२)+(१३ + ८ + १३) (पिपीलिकमध्या बृहती)=५८

[१] ऋ० ८।४६।१६-१७ [२] ऋ० ८।४६।१३-१४ [३] ऋ० ५।५३।१-२

जिसके ऐसे 'प्रगाथ' को; काकुभबार्हतः स्मृतः='काकुभबार्हत'[क] नामक माना गया है।
जैसे—"को वेद जानमेषाम्।"[ख]

## आनुष्टुभौष्णिहं विद्यात्ते म आहुर्य आययुः ॥२०॥

सू० अ०—"ते म आहुर्य आययुः"—इस ('प्रगाथ') को 'आनुष्टुभौष्णिह' जानना चाहिए।

उ० भा० — "ते म आहुर्य आययुः"[1] इत्ययं प्रगाथः। तम् आनुष्टुभौष्णिहं विद्यात्। अनुष्टुप्पूर्वा अपरोष्णिगिति ॥

उ० भा० अ०—"ते म आहुर्य आययुः"[ग]—यह 'प्रगाथ' है। इसको; आनुष्टुभौष्णिहं विद्यात्='आनुष्टुभौष्णिह'[घ] (नामक) जानना चाहिए। (इस 'प्रगाथ' में) पहली (ऋचा) 'अनुष्टुप्' है और बाद वाली (ऋचा) 'उष्णिक्' है।

## ते नस्त्राध्वं बृहत्यादिर्बार्हतानुष्टुभः स्मृतः ॥२१॥

सू० अ०—'बृहती' है पूर्व में जिसके ऐसे "ते नस्त्राध्वम्"—इस ('प्रगाथ') को 'बार्हतानुष्टुभ' माना गया है।

उ० भा० —"ते नस्त्राध्वं तेऽवत"[2] इत्ययं प्रगाथो बृहत्यादिः अनुष्टुबन्तो बार्हतानुष्टुभः स्मृतः ॥

उ० भा० अ०—बृहत्यादिः='बृहती' है आदि में जिसके (और) 'अनुष्टुप्' है अन्त में जिसके ऐसा "ते नस्त्राध्वं तेऽवत"[ङ]—यह 'प्रगाथ', बार्हतानुष्टुभः स्मृतः='बार्हतानुष्टुभ'[च] माना गया है।

टि० (क) काकुभबार्हत=ककुप्+बृहती=(८+१२+८)+(८+८+१२+८)=६४

(ख) को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुताम्।
यद् युयुजे किलास्यः।
एतान् रथेषु तस्थुषः कः शुश्राव कथा ययुः।
कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः ॥

(ग) ते म आहुर्य आययु—रुप द्युभिर्विभिर्मदे।
नरो मर्या अरेपस इमान् पश्यन्निति ष्टुहि ॥
ये अञ्जिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु।
श्राया रथेषु धन्वसु ॥

(घ) आनुष्टुभौष्णिह=अनुष्टुप्+उष्णिक्=
(८+८+८+८)+(१२+८+८) (पुरउष्णिक्)=६०

(ङ) ते नस्त्राध्वं तेऽवत त उ नो अधि वोचत।
मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावतः ॥
ये देवास इह स्थन विश्वे वैश्वानरा उत।
अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत ॥

(च) बार्हतानुष्टुभ=बृहती+अनुष्टुप्=(८+८+१२+८)+(८+८+८+८)
=६८

---

[1] ऋ० ५।५३।३-४   [2] ऋ० ८।३०।३-४

अग्निं वः पूर्व्यमित्येषोऽनुष्टुप्पङ्क्तिरेव च ॥२२॥

सू० अ०—"अग्निं वः पूर्व्यम्"—यह 'अनुष्टुप्' और 'पङ्क्ति' से बना है।

उ० भा०—"अग्निं वः पूर्व्यं गिरा"[1] इति प्रगाथः; (अनुष्टुप्पङ्क्तिरेव च=) अनुष्टुप्पूर्वः पङ्क्त्यन्तः; आनुष्टुभपाङ्क्त इति स्मृतः ॥

उ० भा० अ०—(अनुष्टुप्पङ्क्तिरेव च=) 'अनुष्टुप्' है पूर्व में जिसके और 'पङ्क्ति' है अन्त में जिसके ऐसा "अग्निं वः पूर्व्यं गिरा"[क]—यह 'प्रगाथ' 'आनुष्टुभ-पाङ्क्त'[ख] माना गया है।

यदध्रिगावो अध्रिगू ककुप् च त्रिष्टुबेव च ॥२३॥

सू० अ०—"यदध्रिगावो अध्रिगू"—यह ('प्रगाथ') 'ककुप्' और 'त्रिष्टुप्' से बना है।

उ० भा०—"यदध्रिगावो अध्रिगू"[2] इत्येष प्रगाथः; (ककुप् च त्रिष्टुबेव च=) ककुप्पूर्वस्त्रिष्टुबन्तः; काकुभत्रैष्टुभ इति स्मृतः ॥

उ० भा० अ०—(ककुप् च त्रिष्टुबेव च=) 'ककुप्' है पूर्व में जिसके और 'त्रिष्टुप्' है अन्त में जिसके ऐसा; "यदध्रिगावो अध्रिगू"[ग]—यह 'प्रगाथ' 'काकुभत्रैष्टुभ'[घ] माना गया है।

यदद्य वामनुष्टुप्च त्रिष्टुप्चैवोपदिश्यते ॥२४॥

सू० अ०—"यदद्य वाम्"—यह ('प्रगाथ') 'अनुष्टुप्' और 'त्रिष्टुप्' से बना हुआ उपदिष्ट किया जाता है।

उ० भा०—"यदद्य वां नासत्या"[3] इत्ययं प्रगाथः; (अनुष्टुप्च त्रिष्टुप्चैव=) अनुष्टुप्पूर्वस्त्रिष्टुबुत्तरः; आनुष्टुभत्रैष्टुभ इति उपदिश्यते ॥

टि० (क) अग्निं वः पूर्व्यं गिरा देवमीळे वसूनाम्।
सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥
मक्षू देववतो रथः शूरो वा पृत्सु कासु चित्।
देवानां य इन्मनो यजमान इयक्ष—त्यभीदयज्वनो भुवत् ॥

(ख) आनुष्टुभपाङ्क्त=अनुष्टुप्+पङ्क्ति=
(८+८+८+८)+(८+८+८+८+८)=७२

(ग) यदध्रिगावो अध्रिगू इदा चिदह्नो अश्विना हवामहे। वयं गीर्भिर्विपन्यवः ॥
ताभिरा यातं वृषणोप मे हवं विश्वप्सुं विश्ववार्यम्।
इषा मंहिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस्ताभिरा गतम् ॥

(घ) काकुभत्रैष्टुभ=ककुप्+त्रिष्टुप्=(८+१२+८)+(११+११+१२+१२)
=७४

---

[1] ऋ० ८।३१।१४-१५  [2] ऋ० ८।२२।११-१२  [3] ऋ० ८।९।९-१०

उ० भा० अ०—(अनुष्टुप्च त्रिष्टुप्चैव=) 'अनुष्टुप्' है पूर्व में जिसके और 'त्रिष्टुप्' है बाद में जिसके ऐसा "यदद्य वां नासत्या"[क]—यह 'प्रगाथ' 'आनुष्टुभत्रैष्टुभ'[ख]; उपदिश्यते=उपदिष्ट किया जाता है।

## यत्स्थो दीर्घेति च त्वेष बृहती त्रिष्टुबेव च ॥२५॥

सू० अ०—"यत्स्थो दीर्घ..."—यह ('प्रगाथ') तो 'बृहती' और 'त्रिष्टुप्' से बना है।

उ० भा०—"यत्स्थो दीर्घप्रसद्मनि"[1] इत्येष प्रगाथः; (बृहती त्रिष्टुबेव च=) बृहतीपूर्वस्त्रिष्टुबुत्तरः; बार्हतत्रैष्टुभ इत्युच्यते ॥

उ० भा० अ०—(बृहती त्रिष्टुबेव च=) 'बृहती' है पूर्व में जिसके और 'त्रिष्टुप्' है बाद में जिसके ऐसा; "यत्स्थो दीर्घप्रसद्मनि"[ग]—इत्येषः=यह; 'प्रगाथ' 'बार्हतत्रैष्टुभ'[घ] कहा जाता है।

## आ यन्मा वेनास्त्रिष्टुप्च जगती चोपदिश्यते ॥२६॥

सू० अ०—"आ यन्मा वेनाः"—यह ('प्रगाथ') 'त्रिष्टुप्' और 'जगती' से बना हुआ उपदिष्ट किया जाता है।

उ० भा०—"आ यन्मा वेना अरुहन्नृतस्य"[2] इत्ययं प्रगाथः; (त्रिष्टुप्च जगती च=) त्रिष्टुप्पूर्वो जगत्युत्तरः त्रैष्टुभजागत इति उपदिश्यते ॥

उ० भा० अ०—(त्रिष्टुप्च जगती च=) 'त्रिष्टुप्' है पूर्व में जिसके और 'जगती'

टि० (क) यदद्य वां नासत्योक्थैराचुच्युवीमहि।
यद् वा वाणीभिरश्विनेवेत् काण्वस्य बोधतम् ॥
यद् वा कक्षीवाँ उत यद् व्यश्व ऋषिर्यद् वां दीर्घतमा जुहाव।
पृथी यद् वां वैन्यः सादनेष्वेवेदतो अश्विना चेतयेथाम् ॥

(ख) आनुष्टुभत्रैष्टुभ=अनुष्टुप्+त्रिष्टुप्=(८+८+८+८)+(११+११+११+११)=७६

(ग) यत् स्थो दीर्घप्रसद्मनि यद् वादो रोचने दिवः।
यद् वा समुद्रे अध्याकृते गृहे ऽत आ यातमश्विना ॥
यद् वा यज्ञं मनवे संमिमिक्षथुरेवेत् काण्वस्य बोधतम्।
बृहस्पतिं विश्वान् देवाँ अहं हुव इन्द्राविष्णू अश्विनावाशुहेषसा ॥

(घ) बार्हतत्रैष्टुभ=बृहती+त्रिष्टुप्=(८+८+१२+८)+(१२+१०+१२+१२)=८२

---

[1] ऋ० ८।१०।१-२ [2] ऋ० ८।१००।५-६

हैं बाद में जिसके ऐसा "आ यन्मा वेना अरुहन्नृतस्य"[क] यह 'प्रगाथ' 'त्रैष्टुभजागत'[ख]; उपदिश्यते=उपदिष्ट किया जाता है।

## ता वृधन्तावनुष्टुप्च महासतोमुखैव च ॥२७॥

सू० अ०—"ता वृधन्तौ…"—यह ('प्रगाथ') 'अनुष्टुप्' और 'महासतोमुख' से बना है।

उ० भा०—महासतोमुखेति विराट्पूर्वा त्रिष्टुबुच्यते। "ता वृधन्तावनु द्यून्"[1] इत्ययं प्रगाथः; (अनुष्टुप्च महासतोमुखैव च=) अनुष्टुप्पूर्वस्त्रिष्टुबुत्तरः; आनुष्टुभत्रैष्टुभ इत्युपदिश्यते ॥

उ० भा० अ०—'विराट्पूर्वा त्रिष्टुप्' को 'महासतोमुख' कहा जाता है। (अनुष्टुप्च महासतोमुखैव च=) 'अनुष्टुप्' है पूर्व में जिसके और 'त्रिष्टुप्' है बाद में जिसके ऐसा "ता वृधन्तावनु द्यून्"[ग]—यह 'प्रगाथ' 'आनुष्टुभत्रैष्टुभ'[घ] उपदिष्ट किया जाता है।

## जागतस्त्वददा अभ्रा प्रगाथस्त्रिष्टुबुत्तरः ॥२८॥

सू० अ०—"अददा अर्भाम्"—यह ('प्रगाथ') 'त्रिष्टुबुत्तरजागत' (अथवा 'जागतत्रिष्टुबुत्तर' अथवा 'जागतत्रैष्टुभ') (कहलाता) है।

उ० भा०—"अददा अर्भा महते वचस्यवे"[2] इति प्रगाथस्त्रिष्टुबुत्तरो जागत इत्युच्यते ॥

उ० भा० अ०—"अददा अर्भा महते वचस्यवे"[ङ]—यह 'प्रगाथ' 'त्रिष्टुबुत्तरजागत' कहलाता है।

टि० (क) आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे।
मनश्चिन्मे हृद आ प्रत्यवोच—दचिक्रदञ्छिशुमन्तः सखायः ॥
विश्वेत् ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्निन्द्र सुन्वते।
पारावतं यत् पुरुसंभृतं व—स्वपावृणोः शरभाय ऋषिबन्धवे ॥

(ख) त्रैष्टुभजागत=त्रिष्टुप्+जगती = (११+११+११+११)+(१२+१२+१२+१२)=९२

(ग) ता वृधन्तावनु द्यून् मर्ताय देवावदभा।
अर्हन्ता चित् पुरो दधे—ऽशेव देवावर्वते ॥
एवेन्द्राग्निभ्यामहावि हव्यं शूष्यं घृतं न पूतमद्रिभिः।
ता सूरिषु श्रवो बृहद् रयिं गृणत्सु दिधृत—मिषं गृणत्सु दिधृतम् ॥

(घ) आनुष्टुभत्रैष्टुभ=अनुष्टुप्+त्रिष्टुप् (विराट्पूर्वा) = (८+८+८+८)+(१०+१०+८+८+८)=७६

---

[1] ऋ० ५।८६।५-६ [2] ऋ० १।५१-१३।१४

## उत्तरस्त्रैष्टुभस्तस्माज्जगत्युत्तर उच्यते ॥२९॥

सू० अ०—इसके (१८।२८ में विहित 'प्रगाथ' के) बाद वाला ('प्रगाथ') 'जगत्युत्तरत्रैष्टुभ' (अथवा 'त्रैष्टुभजगत्युत्तर' अथवा 'त्रैष्टुभजागत') कहलाता है।

उ० भा०—तस्मादुत्तरः प्रगाथः—"इदं नमो वृषभाय स्वराजे"[1] इति जगत्युत्तरस्त्रैष्टुभं इति उच्यते ॥

उ० भा० अ०—तस्मादुत्तरः=इससे (=१८।२८ में विहित 'प्रगाथ' से) बाद वाला; 'प्रगाथ' "इदं नमो वृषभाय स्वराजे"[क]—यह; जगत्युत्तरस्त्रैष्टुभ उच्यते='जगत्युत्तर-त्रैष्टुभ'[ख] कहलाता है।

## त्वमेताञ्जन च द्वौ द्वौ स घा राजेति च स्मृतौ ॥३०॥

सू० अ०—"त्वमेताञ्जन....." और "स घा राजा....."—ये दो-दो ('प्रगाथ') (१८।२८-२९ में विहित प्रगाथों की तरह) माने गये हैं।

उ० भा०—"त्वमेताञ्जनराज्ञो द्विर्दश"[2] इति द्वौ प्रगाथौ पूर्ववद् द्रष्टव्यौ। यथा—पूर्वो जागतस्त्रिष्टुबुत्तर इत्युच्यते। तस्मादुत्तरः प्रगाथः—"य उदृचीन्द्र देवगोपाः"[3] इति त्रैष्टुभजागत इत्युच्यते। उत्तरौ—"स घा राजा सत्पतिः शूशुवज्जनः"[4] इति च द्वौ प्रगाथौ स्मृतौ। पूर्वो जागतत्रैष्टुभः। "तुभ्येदेते बहुला अद्रिदुग्धाः"[5] इति त्रैष्टुभो जगत्युत्तरः ॥

(८७७ङ) अददा अर्भां महते वचस्यवे कक्षीवते वृचयामिन्द्र सुन्वते।
मेनाभवो वृषणश्वस्य सुक्रतो विश्वेत् ता ते सवनेषु प्रवाच्या ॥
इन्द्रो अश्रायि सुध्यो निरेके पज्रेषु स्तोमो दुर्यो न यूपः।
अश्वयुर्गव्यू रथयुर्वसूयु— रिन्द्र इद्रायः क्षयति प्रयन्ता ॥
त्रिष्टुबुत्तरजागत=जगती+त्रिष्टुप्=(१२+१२+१२+१२)+
(११+११+११+११)=९२

टि० (क) इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसेऽवाचि।
अस्मिन्निन्द्र वृजने सर्ववीराः स्मत् सूरिभिस्तव शर्मन्त्स्याम ॥
त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते।
अत्यं न वाजं हवनस्यदं रथ—मेन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥

(ख) जगत्युत्तरत्रैष्टुभ=त्रिष्टुप्+जगती=
(११+११+११+११)+(१२+१२+१२+१२)=९२

---

[1] ऋ० १।५१।१५ ॥ १।५२।१
[2] ऋ० १।५३।९-११ ॥ १।५४।१
[3] ऋ० १।५३।११ ॥ १।५४।१
[4] ऋ० १।५४।७-१०
[5] ऋ० १।५४।९-१०

उ० भा० अ०—"त्वमेताञ्जनराज्ञो द्विर्दश"क—इन; द्वौ=दो प्रगाथों को पूर्व की तरह (अर्थात् १८।२८-२९ में विहित 'जागतत्रिष्टुबुत्तर' और 'त्रैष्टुभजगत्युत्तर' की तरह) समझना चाहिए। जैसे—पहले वाला ('प्रगाथ') 'जागतत्रिष्टुबुत्तर' कहा जाता है। उसके बाद वाला—"य उदृचीन्द्र देवगोपाः"—यह 'प्रगाथ' 'त्रैष्टुभजागत' ('त्रैष्टुभजगत्युत्तर') कहा जाता है। बाद वाले "स घा राजा सत्पतिः शूशुवज्जनः"ख—ये; द्वौ=दो; 'प्रगाथ' (१८।२८-२९ में विहित प्रगाथों की तरह); स्मृतौ=माने गये हैं। (इन दो में) पहले वाला 'जागतत्रैष्टुभ' है। (उसके बाद वाला) "तुभ्येदेते बहुला अद्रिदुग्धाः"—यह ('प्रगाथ') 'त्रैष्टुभजगत्युत्तर' ('त्रैष्टुभजागत') है।

**त्वमस्य पारे रजसो जागतौ त्रिष्टुबुत्तरौ ॥३१॥**

**सू० अ०—"त्वमस्य पारे रजसः"—(ये दो 'प्रगाथ') 'त्रिष्टुबुत्तरजागत' हैं।**

उ० भा०—"**त्वमस्य पारे रजसो व्योमनः**"[1] **इति द्वौ प्रगाथौ जागतौ त्रिष्टुबुत्तरौ ज्ञेयाविति ॥**

टि० (क) त्वमेताञ्जनराज्ञो द्विर्दशा—ऽबन्धुना सुश्रवसोपजग्मुषः।
षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक् ॥
त्वमाविथ सुश्रवसं तवोतिभि—स्तव त्रामभिरिन्द्र तूर्वयाणम्।
त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरन्धनायः ॥
जागतत्रिष्टुबुत्तर=जगती+त्रिष्टुप्=(१२+१२+१२+१२)+(११+११+११+११)=९२
य उदृचीन्द्र देवगोपाः सखायस्ते शिवतमा असाम।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥
मा नो अस्मिन् मघवन् पृत्स्वंहसि नहि ते अन्तः शवसः परीणशे।
अक्रन्दयो नद्यो रोरुवद् वना कथा न क्षोणीर्भियसा समारत ॥
त्रैष्टुभजागत=त्रिष्टुप्+जगती=(११+११+११+११)+(१२+१२+१२+१२)=९२
(ख) स घा राजा सत्पतिः शूशुवज्जनो रातहव्यः प्रति यः शासमिन्वति।
उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः ॥
असमं क्षत्रमसमा मनीषा प्र सोमपा अपसा सन्तु नेमे।
ये त इन्द्र ददुषो वर्धयन्ति महि क्षत्रं स्थविरं वृष्ण्यं च ॥
जागतत्रैष्टुभ=जगती+त्रिष्टुप्=(१२+१२+१२+१२)+(११+११+११+११)=९२
तुभ्येदेते बहुला अद्रिदुग्धा—श्चमूषदश्चमसा इन्द्रपानाः।
व्यश्नुहि तर्पया काममेषा—मथा मनो वसुदेयाय कृष्व ॥
अपामतिष्ठद्धरुणह्वरं तमो ऽन्तर्वृत्रस्य जठरेषु पर्वतः।
अभीमिन्द्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते ॥
त्रैष्टुभजगत्युत्तर=त्रिष्टुप्+जगती=(११+११+११+११)+(१२+१२+१२+१२)=९२

---

[1] ऋ० १।५२।१२-१५

उ० भा० अ०—"त्वमस्य पारे रजसो व्योमनः"[क]—इन दो प्रगाथों को त्रिष्टुवुत्तरजागत[ख] जानना चाहिए ।

(अक्षरसंज्ञा)

## सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम् ॥३२॥

(अक्षर-संज्ञा)

सू० अ०—'व्यञ्जन'-सहित अथवा 'अनुस्वार'-सहित अथवा शुद्ध भी 'स्वर' (-वर्ण) 'अक्षर' (-संज्ञक) होता है।

उ० भा०—(सव्यञ्जनः=) व्यञ्जनेन युक्तः; (सानुस्वारः=) अनुस्वारेण सहितः; (वा=) अथवा; (शुद्धः=) अनुस्वारेण रहितो व्यञ्जनेन रहितः; स्वरः; (अक्षरम्=) अक्षरसंज्ञः; भवति ॥

उ० भा० अ०—(सव्यञ्जनः=) 'व्यञ्जन' से युक्त; (सानुस्वारः=) 'अनुस्वार' के सहित; (वा=) अथवा; (शुद्धः=) 'अनुस्वार' से रहित और 'व्यञ्जन' से रहित; स्वरः='स्वर' (-वर्ण); (अक्षरम्=) 'अक्षर'-संज्ञक; होता है।

(अनुस्वारव्यञ्जनयोः स्वराङ्गत्वविचारः)

## व्यञ्जनान्युत्तरस्यैव स्वरस्यान्त्यं तु पूर्वभाक् ॥३३॥

(अनुस्वार और व्यञ्जन के स्वर का अङ्ग होने का विचार)

सू० अ०—'व्यञ्जन' परवर्ती ही 'स्वर' के ('अङ्ग' होते हैं)। किंतु अन्तिम ('व्यञ्जन') पूर्ववर्ती ('स्वर') का 'अङ्ग' होता है।

उ० भा०—व्यञ्जनान्युत्तरस्यैव स्वरस्य अङ्गं भवन्ति। "तदस्य"[1]; "तन्नः।"[2] अन्त्यं तु पूर्वभाक् =अन्त्यं तु व्यञ्जनं पूर्वमक्षरं भजेत्। तत्; वाक् ॥

उ० भा० अ०- व्यञ्जनानि='व्यञ्जन'; उत्तरस्यैव स्वरस्य=परवर्ती 'स्वर' के ही; 'अङ्ग' होते हैं।[ग] (उदाहरण) "तदस्य"; "तन्नः।" अन्त्यं तु पूर्वभाक् =

टि० (क) त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः।
चकृषे भूमिं प्रतिमानमोजसो ऽपः स्वः परिभूरेष्या दिवम् ॥
त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः।
विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान् ॥
न यस्य द्यावापृथिवी अनु व्यचो न सिन्धवो रजसो अन्तमानशुः।
नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमानुषक् ॥
आर्चन्नत्र मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा।
वृत्रस्य यद् भृष्टिमता वधेन नि त्वमिन्द्र प्रत्यानं जघन्थ ॥
(ख) त्रिष्टुवुत्तरजागत=(१२+१२+१२+१२)+११+११+११+११)=९२
(ग) अङ्गत्व-विचार के लिए १।२२-२६ को देखिए।

---

[1] ऋ० १।१५४।५ [2] ऋ० १।१४२।१०

(पद का) अन्तिम 'व्यञ्जन' तो पूर्ववर्ती 'अक्षर' का 'अङ्ग' होता है। (उदाहरण) तत्; वाक् ॥

### विसर्जनीयानुस्वारौ भजेते पूर्वमक्षरम् ॥३४॥

सू० अ०—विसर्जनीय और 'अनुस्वार' पूर्व 'अक्षर' का (को) 'अङ्ग' होते हैं।

उ० भा०—(विसर्जनीयानुस्वारौ=) विसर्जनीयोऽनुस्वारश्च; पूर्वमक्षरं भजेते। "यः सोम"[1]; "त्वं सोम" ॥[2]

उ० भा० अ०—(विसर्जनीयानुस्वारौ=) विसर्जनीय और 'अनुस्वार'; पूर्वमक्षरं भजेते=पूर्ववर्ती 'अक्षर' का (को) 'अङ्ग' होते हैं। (उदाहरण) "यः सोम"; "त्वं सोम"।

### संयोगादिश्च वैवं च ॥३५॥

सू० अ०—संयुक्त वर्ण ('संयोग') का प्रथम (वर्ण) भी विकल्प से इस प्रकार होता है (=अपने पूर्ववर्ती 'स्वर' का 'अङ्ग' होता है)।

उ० भा०—संयोगादिर्वा; (एवं च=) पूर्वमक्षरं भजते। तस्य; यस्य ॥

उ० भा० अ०—संयोगादिर्वा=संयुक्त वर्ण ('संयोग') का प्रथम (वर्ण) विकल्प से; (एवं च=इस प्रकार होता है=) (अपने) पूर्ववर्ती 'स्वर' ('अक्षर') का (को) 'अङ्ग' होता है। (उदाहरण) तस्य; यस्य ॥

### सहक्रम्यः परक्रमे ॥३६॥

सू० अ०—जब संयुक्त वर्ण ('संयोग') के द्वितीय वर्ण का द्वित्व होता है तब द्वित्व को प्राप्त होने वाला (क्रम्य) तथा (उस द्वितीय वर्ण) के साथ-साथ द्वित्व के परिणामस्वरूप होने वाला (क्रम) (नया) वर्ण (विकल्प से अपने पूर्ववर्ती 'स्वर' के 'अङ्ग' होते हैं)।

उ० भा०—(सहक्रम्यः=) क्रमेण सह क्रम्यो वर्णः; पूर्वमक्षरं वा भजते परक्रमे सति। अर्क्कः; ऊर्ज्जम् ॥

उ० भा० अ०—परक्रमे=संयुक्त वर्ण ('संयोग') के द्वितीय वर्ण का द्वित्व होने पर; सहक्रम्यः=द्वित्व के परिणामस्वरूप होने वाले वर्ण (क्रम) के साथ द्वित्व को प्राप्त होने वाला वर्ण (क्रम्य); विकल्प से पूर्ववर्ती 'स्वर' ('अक्षर') का 'अङ्ग' होता है। (जैसे) अर्क्कः; ऊर्ज्जम्।

### (लघ्वक्षरगुर्वक्षरादिनिरूपणम्)

### गुर्वक्षरम् ॥३७॥

### (लघु अक्षर और गुरु अक्षर आदि का निरूपण)

सू० अ०—('दीर्घ') 'अक्षर' 'गुरु' (-संज्ञक) (होता है)।

उ० भा०—दीर्घम् अक्षरम्; (गुरु=) गुरुसंज्ञम्; भवति। "नू देवासो वरिवः कर्तना नो भूत् ॥"[3]

---

[1] ऋ० १।९१।१४ [2] ऋ० १।९१।१ [3] ऋ० ७।४८।४

उ० भा० अ०—अक्षरम्=('दीर्घ') 'अक्षर'; (गुरु=) 'गुरु'-संज्ञक; होता है।[क] (उदाहरण) "नू देवासो वरिवः कर्तना नो भूत्।"

## लघु ह्रस्वं न चेत्संयोग उत्तरः ॥३८॥

सू० अ०—'ह्रस्व' ('अक्षर') 'लघु' (-संज्ञक) होता है, यदि (उसके) अव्यवहित बाद में संयुक्त वर्ण ('संयोग') न हो।

उ० भा०—ह्रस्वम् अक्षरम्; (लघु=) लघुसंज्ञम्; भवति संयोगः; (उत्तरः=) परतः; न चेत् भवति। यथा—"मित्रमहो अवद्यात्॥"[1]

उ० भा० अ०—ह्रस्वम्='ह्रस्व' 'अक्षर'; (लघु=) 'लघु'-संज्ञक; होता है; चेत्=यदि, (उत्तरः=) बाद में; संयोगः=संयुक्त वर्ण; न=नहीं; होता है। जैसे—"मित्रमहो अवद्यात्।"

## अनुस्वारश्च ॥३९॥

सू० अ०—'अनुस्वार' भी ('ह्रस्व' 'अक्षर' के अव्यवहित बाद में न हो तो वह 'ह्रस्व' 'अक्षर' 'लघु' होता है)।

उ० भा०—अनुस्वारश्च यद्युत्तरो न भवति तदा लघुसंज्ञं भवति। यथा—"अस्ति सोमो अयं सुतः"[2] इति॥

उ० भा० अ०—अनुस्वारश्च='अनुस्वार' भी; यदि बाद में नहीं होता है तो ('ह्रस्व' 'अक्षर') 'लघु'-संज्ञक होता है।[ख] जैसे—"अस्ति सोमो अयं सुतः।"

## संयोगं विद्याद्व्यञ्जनसंगमम् ॥४०॥

सू० अ०—'व्यञ्जन' (-वर्णों) के मेल (=संगम) को 'संयोग' (-संज्ञक) जानना चाहिये।

उ० भा०—(व्यञ्जनसंगमम्=) व्यञ्जनानां मेलकः; (संयोगम्=) संयोग-संज्ञः; (विद्यात्=) भवति। "आ त्वा रथम्।"[3] अनुस्वार इत्यनुवर्तते। "इदं श्रेष्ठम्"[4] इति।

उ० भा० अ०—(व्यञ्जनसंगमम्=) व्यञ्जनों का मेल; (संयोगम्=) 'संयोग'-संज्ञक; (विद्यात्=जानना चाहिये=) होता है। (उदाहरण) "आ त्वा रथम्।" (इस सूत्र में १८।३९ से) 'अनुस्वार' की अनुवृत्ति हो रही है—"इदं श्रेष्ठम्।"

टि० (क) देखिए १।२०

(ख) 'ह्रस्व' 'अक्षर' 'गुरु'-संज्ञक होता है यदि इसके अव्यवहित बाद में संयुक्त वर्ण ('संयोग') अथवा 'अनुस्वार' हो।

---

[1] ऋ० ४।४।१५ [2] ऋ० ८।९४।४ [3] ऋ० ८।६८।१
[4] ऋ० १।११३।१

## गुरु दीर्घम् ॥४१॥

सू० अ०—'दीर्घ' ('अक्षर') 'गुरु' (-संज्ञक) (होता है)।

उ० भा०—दीर्घम् अक्षरम्; (गुरु=) गुरुसंज्ञम्; भवति। "आ रुक्मैरा युधा नरः"[१] इति। सिद्धेऽप्यर्थ उत्तरक्रियार्थं पुनरुच्यते ॥

उ० भा० अ०—दीर्घम्='दीर्घ' 'अक्षर'; (गुरु=) 'गुरु'-संज्ञक; होता है। (उदाहरण) "आ रुक्मैरा युधा नरः।" इस विषय के सिद्ध होने पर भी परवर्ती (सूत्र) में (विहित) कार्य के लिये दोबारा कथन किया गया है।[क]

## गरीयस्तु यदि सव्यञ्जनं भवेत् ॥४२॥

सू० अ०—यदि ('दीर्घ' 'अक्षर') 'व्यञ्जन' के सहित हो तो वह गुरुतर होता है।

उ० भा०—गरीयस्तु=गुरुतरम्; (भवेत्=) विद्यात्; दीर्घं सव्यञ्जनं सत्। राष्ट्री इति ॥

उ० भा० अ०—यदि 'दीर्घ' ('अक्षर') 'व्यञ्जन' के सहित हो तो उसे; गरीयस्तु=गुरुतर; (भवेत्=होता है=) जानना चाहिये। (उदाहरण) राष्ट्री।

## लघु सव्यञ्जनं ह्रस्वम् ॥४३॥

सू० अ०—'व्यञ्जन'-सहित 'ह्रस्व' ('अक्षर') 'लघु' (-संज्ञक) होता है)।

उ० भा०—ह्रस्वम् अक्षरं सव्यञ्जनम्; (लघु=) लघुसंज्ञम्; भवति। क कि कु ॥

उ० भा० अ०—सव्यञ्जनम्='व्यञ्जन'-सहित; ह्रस्वम्='ह्रस्व' 'अक्षर'; (लघु=) 'लघु'-संज्ञक; होता है। (उदाहरण) क, कि, कु।

## लघीयो व्यञ्जनादृते ॥४४॥

सू० अ०—'व्यञ्जन' से रहित (=केवल) ('ह्रस्व' 'अक्षर') लघुतर होता है।

उ० भा०—ह्रस्वमक्षरम्; (व्यञ्जनादृते=) व्यञ्जनवर्जम्; (लघीयः=) लघीयः-संज्ञम्; भवति।

उ० भा० अ०—(व्यञ्जनादृते=) 'व्यञ्जन' के बिना; 'ह्रस्व' 'अक्षर'; (लघीयः=) 'लघीयः'-संज्ञक; होता है।

टि० (क) अर्थात् 'दीर्घ' 'अक्षर' 'गुरु'-संज्ञक होता है—यह १८।३७ से ही ज्ञात है; तथापि १८।४२ के लिए इसका दोबारा कथन किया गया है।

---

[१] ऋ० ५।५२।६

(एकस्य छन्दसः अन्यस्मिन् छन्दसि विपरिणमनम्)

छन्दस्तुरीयेण समानसंख्या
याश्छन्दसोऽन्यस्य भवन्त्यृचोऽन्याः।
यावत्तुरीयं भवति स्वमासां
तावत्य एता इतरा भवन्ति ॥४५॥

(एक छन्दः का दूसरे छन्दः में विपरिणमन)

सू० अ०—परवर्ती छन्दः की जो ऋचायें होती हैं वे (पूर्ववर्ती) छन्दः के (अक्षरों के) चतुर्थ भाग के समान संख्या वाली होती हैं। इनके (=परवर्ती छन्दः के अक्षरों का) जितना चतुर्थ भाग होता है, उतनी वे अन्य (=पूर्ववर्ती छन्दः की ऋचायें) होती हैं।

उ० भा०—कस्य च्छन्दसः केन सह का सपद्भवतीति विचारणायां तत इदमुच्यते। छन्दस्तुरीयेण=छन्दसो गायत्र्या अक्षराणां चतुर्थेन भागेन; समानसंख्याः; अन्यस्य (छन्दसः=)उष्णिक्छन्दसः; ऋचो भवन्ति। आसाम्=उष्णिहाम्; यावत् छन्दस्तुरीयम् भवति तावत्य एताः; इतराः=गायत्र्यः; भवन्ति। तथा चोक्तं रहस्ये—"सप्त गायत्र्यः षळुष्णिहो भवन्ति।"[1] "यदिन्द्राहं यथा त्वम्"[2] इति यथा। आभिः सप्तभिः षळुष्णिहो भवन्ति। एवं सर्वेषां छन्दसामन्योन्यस्य चतुर्थेन भागेन संपद्भवति॥

उ० भा० अ०—किस छन्दः में किस (छन्दः) का कैसे विपरिणमन होता है—यह विचार प्रस्तुत होने पर यह (सूत्र) कहा गया है। छन्दस्तुरीयेण=(जैसे) 'गायत्री' छन्दः के अक्षरों (=२४) के चतुर्थ भाग (२४÷४=६) के; समानसंख्याः=समान संख्या (=६) वाली; अन्यस्य (छन्दसः=) अन्य छन्दः की=(जैसे) 'उष्णिक्' छन्दः की; ऋचो भवन्ति=ऋचायें होती हैं। यावत्=जितना; आसाम्=इनका= 'उष्णिक्' छन्दः के (अक्षरों) (=२८ का); तुरीयम्=चतुर्थ भाग (२८÷४=७) भवति=होता है; तावत्यः=उतनी (=७); एता इतराः=ये अन्य='गायत्री' (छन्दः की ऋचायें); भवन्ति=होती हैं। ऐतरेय आरण्यक (रहस्य) में वैसा कहा भी है—"सात 'गायत्री' छः 'उष्णिक्' होती हैं।" "यदिन्द्राहं यथा त्वम्" इन सात ('गायत्री' छन्दों) से छः 'उष्णिक्' सम्पन्न होते हैं। इस प्रकार सब छन्दों में एक-दूसरे के चतुर्थ भाग से विपरिणमन किया जा सकता है।[क]

टि० (क) (१) ऐतरेय आरण्यक ५।२।११ में 'निष्केवल्य शस्त्र' के प्रसङ्ग में इन्द्रदेवताक 'उष्णिक्'—छन्दस्क २४० ऋचाओं के पाठ का विधान किया गया है। (२) इसी स्थल पर इन्द्रदेवताक 'उष्णिक्'–छन्दस्क १२६ ऋचायें गिनाई गई हैं। (३) अवशिष्ट (२४०–१२६=) ११४ इन्द्रदेवताक 'उष्णिक्'–छन्दस्क ऋचाओं की पूर्ति के लिए इन्द्रदेवताक 'गायत्री'–छन्दस्क १३० ऋचाओं का ग्रहण इसी स्थल में विहित है।

---

[1] ऐ० आ० ५।२।११ [2] ऋ० ८।१४।१

(त्रिपदादिषु ऋक्षु अवसाननिर्णयप्रकारः)

द्वाभ्यामवस्येत् त्रिपदासु पूर्वं
पादेन पश्चात्क्वचिदन्यथैतत् ॥४६॥

(तीन इत्यादि पादों वाली ऋचाओं में अवसान के निर्णय का प्रकार)

सू० अ०—तीन पादों वाली (ऋचाओं) में पहले दो (पादों) के बाद में 'अवसान' करे और फिर अन्तिम पाद के बाद में। कभी-कभी इसके विपरीत ('अवसान' होता है)।

उ० भा०—त्रिपदासु ऋक्षु द्वाभ्यां पादाभ्यां पूर्वमवस्येत्पश्चात्पादेन। "अग्निमीळे पुरोहितम्।"[1] क्वचिदेतदन्यथा = पूर्वं पादेन पश्चाद द्वाभ्याम्। "वृतेरिव तेऽवृकमस्तु सख्यम्"[2] इति ॥

उ० भा० अ०—त्रिपदासु = तीन पादों वाली; ऋचाओं में; द्वाभ्याम् = दो पादों के बाद में; पूर्वमवस्येत् = पहला 'अवसान' करे; पश्चात् पादेन = इसके बाद में एक

(५८४क) (प्रश्न) अवशिष्ट ११४ संख्या की पूर्ति के लिये इन्द्रदेवताक 'उष्णिक्'-छन्दस्क अन्य ११४ ऋचायें ही क्यों ग्रहण नहीं की गई है? (उत्तर) उपर्युक्त ११६ के अतिरिक्त इन्द्रदेवताक 'उष्णिक्'-छन्दस्क ऋचायें ऋग्वेद में उपलब्ध नहीं हैं। (प्रश्न) 'गायत्री'-छन्दस्क ऋचाओं से अवशिष्ट ११४ 'उष्णिक्'-छन्दस्क ऋचाओं की पूर्ति कैसे होगी? (उत्तर) 'गायत्री'-छन्दस्क ऋचाओं को 'उष्णिक्'-छन्दस्क ऋचाओं में विपरिणत करके। (प्रश्न) इस प्रकार विपरिणमन की क्या प्रक्रिया है? (उत्तर) देखिए दो दृष्टान्त—

**दृष्टान्त १**

गायत्री का उष्णिक् में विपरिणमन

| 'गायत्री' | 'उष्णिक्' |
|---|---|
| 'गायत्री' की 'अक्षर'-संख्या २४ ÷ ४ = ६ | 'उष्णिक्' की 'अक्षर'-संख्या २८ ÷ ४ = ७ |

प्रक्रिया का निष्कर्ष—७ 'गायत्री' = ६ 'उष्णिक्'

**दृष्टान्त २**

गायत्री का जगती में विपरिणमन

| 'गायत्री' | 'जगती' |
|---|---|
| 'गायत्री' की 'अक्षर'-संख्या २४ ÷ ४ = ६ | 'जगती' की 'अक्षर'-संख्या ४८ ÷ ४ = १२ |

प्रक्रिया का निष्कर्ष—१२ 'गायत्री' = ६ 'जगती'

यद्यपि विपरिणमन-प्रक्रिया छन्दों के सभी वर्गों में संभावित है, तथापि 'गायत्री'-'जगती' वर्ग के विषय में ही इसको लागू समझना चाहिए। १८।४५ के सूत्रानुवाद में 'पूर्ववर्ती' और 'परवर्ती' शब्दों का प्रयोग भी इसी वर्ग के किन्हीं दो छन्दों को अपनाते हुए किया गया है।

---

[1] ऋ० १।१।१ [2] ऋ० ६।४८।१८

(=अन्तिम) पाद के बाद में। (उदाहरण) "अग्निमीळे पुरोहितम्।"क क्वचिदेतद्न्यथा=कहीं पर इस (उपर्युक्त) के विपरीत ('अवसान' किया जाता है)=पहले (प्रथम) पाद के बाद में और तत्पश्चात् दो (पादों) के बाद में ('अवसान' किया जाता है)। (उदाहरण) "दृतेरिव तेऽवृकमस्तु सख्यम्।"ख

## मध्येऽवसानं तु चतुष्पदानाम् ॥४७॥

सू० अ०—चार पादों वाली (ऋचाओं) के वो मध्य में 'अवसान' होता है।

उ० भा०—चतुष्पदानां मध्येऽवसानं भवति। "गायन्ति त्वा गायत्रिणः"[१] इत्येवमादयः॥

उ० भा० अ०—चतुष्पदानाम्=चार पादों वाली (ऋचाओं) के; मध्येऽवसानम्=मध्य में 'अवसान'; होता है। (उदाहरण) "गायन्ति त्वा गायत्रिणः"ग इत्यादि।

## त्रिभिः समस्तैरवरैः परैर्वा ॥४८॥

सू० अ०—(चार पादों वाली ऋचाओं में कभी-कभी 'अवसान') या वो प्रथम तीन मिले हुए पादों के बाद में होता है या अन्तिम तीन पादों के बाद में।

उ० भा०—(अवरैः) त्रिभिः समस्तैः पादैः पूर्वम् अवसानं भवति। पादेनोत्तरम्। यथा—"एतं शंसमिन्द्रास्मयुष्ट्वम्।"[२] (परैः) पादैः वा त्रिभिः परमवसानं भवति। पादेन पूर्वम्—"अधीन्वत्र सप्तर्ति च सप्त च"[३] इति॥

उ० भा० अ०—(अवरैः) त्रिभिः समस्तैः=(पूर्ववर्ती) तीन मिले हुए पादों के बाद में; पहला 'अवसान' होता है। (अन्तिम) पाद के बाद में दूसरा ('अवसान') (होता है)। जैसे—"एतं शंसमिन्द्रास्मयुष्ट्वम्।"घ वा=अथवा; (परैः=परवर्ती) तीन पादों के बाद में दूसरा 'अवसान' होता है। (प्रथम) पाद के बाद में पहला 'अवसान' (होता है)। (उदाहरण) "अधीन्वत्र सप्तर्ति च सप्त च।"ङ

टि० (क) अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥

(ख) दृतेरिव तेऽवृकमस्तु सख्यम्। अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः॥

(ग) गायन्ति त्वा गायत्रिणो ऽर्चन्त्यर्कमर्किणः।
ब्रह्माणस्त्वा शतक्रतु उद् वंशमिव येमिरे॥

(घ) एतं शंसमिन्द्रास्मयुष्ट्वं कूचित् सन्तं सहसावन्नभिष्टये सदा पाह्यभिष्टये।
मेदतां वेदता वसो॥

(ङ) अधीन्वत्र सप्तर्ति च सप्त च।
सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः॥

---

[१] ऋ० १।१०।१ [२] ऋ० १०।९३।११ [३] ऋ० १०।९३।१५

पङ्क्त्यां द्विशो वा तत उत्तरेण
त्रिभिः परैर्वा विपरीतमेतत् ॥४६॥

सू० अ०—'पङ्क्ति' में दो-दो (पादों) के बाद में ('अवसान' होता है) और तब परवर्ती (=अन्तिम) (पाद) के बाद में ('अवसान' होता है)। अथवा (पहला 'अवसान' पहले दो पादों के बाद में और दूसरा 'अवसान') परवर्ती तीन (पादों) के बाद में होता है। (अथवा) यह विपरीत होता है (=पहला 'अवसान' पहले तीन पादों के बाद में और दूसरा 'अवसान' परवर्ती दो पादों के बाद में होता है)।

उ० भा०—पङ्क्त्याम्=पञ्चपदासु इत्यर्थः। द्विशः=द्वाभ्यां द्वाभ्यामवस्येत्। (तत उत्तरेण=) पादेनोत्तरमवसानम्। "अयं चक्रमिषणत्सूर्यस्य"[१] इति। (परैः) त्रिभिः पादैः परमवसानं वा। द्वाभ्यां पूर्वम्। "नकिष्टं कर्मणा नशत्"[२] इति। एतद्वा विपरीतम्=त्रिभिः पूर्वं द्वाभ्यामुत्तरम्। "नकिर्देवा मिनीमसि"[३] इति ॥

उ० भा० अ०—पङ्क्त्याम्='पङक्ति' में=पाँच पादों में—यह अर्थ है। द्विशः=दो-दो पादों के बाद में 'अवसान' करे। (तत उत्तरेण=तत्पश्चात् परवर्ती) एक पाद के बाद में अन्तिम 'अवसान' को (करे)। (उदाहरण) "अयं चक्रमिषणत्सूर्यस्य।"[क] वा=अथवा; (परैः=परवर्ती) त्रिभिः=तीन पादों के बाद में; अन्तिम 'अवसान' को करे। (पूर्ववर्ती) दो पादों के बाद में पहला 'अवसान' करे। (उदाहरण) "नकिष्टं कर्मणा नशत्।।[ख] एतद्वा विपरीतम्=अथवा इसके विपरीत ('अवसान' होते हैं)=तीन पादों के बाद में पहला ('अवसान' होता है), दो पादों के बाद में दूसरा ('अवसान' होता ह)। (उदाहरण) "नकिर्देवा मिनीमसि।"[ग]

द्विशस्त्रिशो वा परतश्चतुर्भिः
स्यात्षट्पदानामवसानमेतत् ॥५०॥

सू० अ०—छः पादों वाली (ऋचाओं) में दो-दो पादों के बाद में अथवा तीन-तीन पादों के बाद में 'अवसान' (होता है)। अथवा (पहला 'अवसान' दो पादों के बाद में होता है और) दूसरा 'अवसान' (अन्तिम) चार पादों के बाद में (होता है)।

टि० (क) अयं चक्रमिषणत् सूर्यस्य न्येतशं रीरमत् ससृमाणम्।
आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो बुध्नो रजस अस्य योनौ।
असिक्न्यां यजमानो न होता ॥
(ख) नकिष्टं कर्मणा नश—न्न प्र योषन्न योषति।
देवानां य इन्मनो यजमान इयक्ष—त्यभीदयज्वनो भुवत् ॥
(ग) नकिर्देवा मिनीमसि नकिरा योपयामसि मन्त्रश्रुत्यं चरामसि।
पक्षेभिरपिकक्षेभि—रत्राभि सं रभामहे ॥

---

[१] ऋ० ४।१७।१४-१५ [२] ऋ० ८।३१।१७ [३] ऋ० १०।१३४।७

उ० भा०—(द्विशः=) द्वाभ्यां द्वाभ्याम् वा; (त्रिशः=) त्रिभिस्त्रिभिः; वा अवस्येत्। "विश्वान्देवान्हवामहे।"[1] एवा तु कौषीतकिनां षट्पदा शस्यते। अस्मिन्पक्ष उदाहरणम्। त्रिशो वा=त्रिभिस्त्रिभिर्वावस्येत्। "स क्षपः परि षस्वजे।"[2] अथवा परतश्चतुर्भिः अवस्येत्। द्वाभ्यां पूर्वम्। "निष्कं वा घा कृणवते।"[3] एवं त्रिविधम् अवसानं षट्पदानां स्यात्॥

उ० भा० अ०—(द्विशः=) दो-दो (पादों) के बाद में; वा=अथवा; (त्रिशः=) तीन-तीन (पादों) के बाद में; 'अवसान' करे। (उदाहरण) "विश्वान्देवान्हवामहे।"क कौषीतकी शाखा वाले इस छः पादों वाली (ऋचा) का पाठ करते हैं। (दो-दो पादों के बाद में 'अवसान' के) पक्ष में यह उदाहरण है। त्रिशो वा=अथवा तीन-तीन (पादों) के बाद में; 'अवसान' करे। (उदाहरण) "स क्षपः परि षस्वजे।"ख अथवा; परतश्चतुर्भिः=चार पादों के बाद में दूसरा; 'अवसान' करे। पूर्ववर्ती दो (पादों) के बाद में पहला ('अवसान' होता है)। (उदाहरण) "निष्कं वा घा कृणवते।"ग इस प्रकार, षट्पदानाम् अवसानम्=छः पादों (वाली ऋचाओं) का 'अवसान'; तीन प्रकार से होता है।

**त्रिभिस्तु पूर्वं तत उत्तरं स्याद्**
**द्विशस्त्रिशो वा यदि वा समस्तम्।**
**द्वाभ्यां पुनः सप्तपदावसानम् ॥५१॥**

सू० अ०—सात पादों (वाली ऋचाओं) का पहला 'अवसान' तीन (पादों) के बाद में (होता है); तत्पश्चात् बाद वाले (दो 'अवसान') दो-दो (पादों) के बाद में (होते हैं)। अथवा यदि (पहला 'अवसान') तीन (पादों) के बाद में हो तो (दूसरा 'अवसान') सभी (=अन्तिम चार पादों) के बाद में (होगा)। अथवा (पहला 'अवसान') दो पादों के बाद में (और दूसरा 'अवसान' अवशिष्ट पाँच पादों के बाद में होगा)।

उ० भा०—(सप्तपदावसानम्=) सप्तपदानां तु पूर्वमवसानम्; त्रिभिः पादैः स्यात्। (ततः=) तस्मात् उत्तरं द्विशः। यथा—"सुषुमा यातमद्रिभिः"[4] इति।

टि० (क) विश्वान्देवान्हवामहे ऽस्मिन्यज्ञे सजोषसः।
त इमं यज्ञमागमन् देवासो देव्या धिया।
ये यज्ञस्य तनूकृतो विश्व आ सोमपीतये॥
(ख) स क्षपः परि षस्वजे न्युस्रो मायया दधे स विश्वं परि दर्शतः।
तस्य वेनीरनु व्रत—मुषस्तिस्रो अवर्धयन् नभन्तामन्यके समे॥
(ग) निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः।
त्रिते दुष्वप्न्यं सर्व—माप्त्ये परि दद्मस्य—नेहसो व ऊतयः सुऊतयो व ऊतयः॥

[1] शा० श्रौ० ७।१०।१४ [2] ऋ० ८।४१।३ [3] ऋ० ८।४७।१५
[4] ऋ० १।१३७।१

त्रिशो वा यदि पूर्वमवसानं तदोत्तरम्; समस्तम्=चतुर्भिः इत्यर्थः। यथा—"नहि वां वव्रयामहे"[१] इति। द्वाभ्यां पुनः पूर्वमवसानम्। उत्तरं समस्तं पञ्चभिः स्यात्। यथा—"प्रो ष्वस्मै पुरोरथम्"[२] इति॥

उ० भा० अ०—(सप्तपदावसानम्=) सात पादों (वाली ऋचाओं) का प्रथम 'अवसान'; त्रिभिः=तीन; पादों के बाद में होता है। (ततः=) तत्पश्चात्; उत्तरम्=बाद वाले (दो 'अवसान'); द्विशः=दो-दो पादों के बाद में (होते हैं)। जैसे—"सुषुमा यातमद्रिभिः।"[क] वा=अथवा; यदि प्रथम 'अवसान'; त्रिशः=तीन पादों के बाद में (होता है) तब बाद वाला ('अवसान'); समस्तम्=सभी अर्थात् चार पादों के बाद में होता है। जैसे—"नहि वां वव्रयामहे।"[ख] पुनः=अथवा; पहला 'अवसान'; द्वाभ्याम्=दो पादों के बाद में (होता है)। बाद वाला सभी पाँच (पादों) के बाद में होता है। जैसे—"प्रो ष्वस्मै पुरोरथम्।"[ग]

## द्वाभ्यां च मध्येऽष्टपदासु विद्यात् ॥५२॥

सू० अ०—आठ पादों वाली (ऋचाओं) के (में) मध्य में दो पादों के बाद में ('अवसान' को) जानना चाहिये।

उ० भा०—अष्टपदासु ऋक्षु मध्ये द्वाभ्याम् अवसानम्; (विद्यात्=) स्यात्। परिशेषादाद्यन्तयोस्त्रिभिस्त्रिभिरवसानं भवति। "स हि शर्धो न मारुतं तुविष्वणिः"[३] इति॥

उ० भा० अ०—अष्टपदासु=आठ पादों वाली ऋचाओं में; मध्ये=मध्य में; द्वाभ्याम्=दो (पादों) के बाद में 'अवसान'; (विद्यात्=जानना चाहिए=) होता है। अवशिष्ट रहने से आदि और अन्त में तीन-तीन पादों के बाद में 'अवसान' होता है।[घ] (उदाहरण) "स हि शर्धो न मारुतं तुविष्वणिः।"[ङ]

टि० (क) सुषुमा यातमद्रिभि—र्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे।
आ राजाना दिविस्पृशा ऽस्मत्रा गन्तमुप नः।
इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः॥

(ख) नहि वां वव्रयामहे ऽथेन्द्रमिद् यजामहे शविष्ठं नृणां नरम्।
स नः कदा चिदर्वता गमदा वाजसातये गमदा मेधसातये नभन्तामन्यके समे॥

(ग) प्रो ष्वस्मै पुरोरथ—मिन्द्राय शूषमर्चत।
अभीके चिदु लोककृत् संगे समत्सु वृत्रहा ऽस्माकं बोधि चोदिता
नभन्तामन्यकेषां ज्याका अधि धन्वसु॥

(घ) अर्थात् आठ पादों वाली ऋचाओं में पहला 'अवसान' प्रथम तीन पादों के बाद में होता है। दूसरा 'अवसान' चतुर्थ और पञ्चम—इन दोनों—को एकत्र करके इनके बाद में (अर्थात् पञ्चम पाद के बाद में) होता है। तीसरा 'अवसान' अन्तिम तीन पादों के बाद में होता है।

(ङ) स हि शर्धो न मारुतं तुविष्वणिर्
अप्नस्वतीषूर्वरास्विष्ट निरार्तनास्विष्टनिः।
आदद्धव्यान्याददिर् यजस्य केतुर्हणा।
अध स्मास्य हर्षतो हृषीवतो विश्वे जुषन्त पन्थां नरः शुभे न पन्थाम्॥

---

[१] ऋ० ८।४०।२ [२] ऋ० १०।१३३।१ [३] ऋ० १।१२७।६

अग्निमीळे दृतेरिव गायन्त्येतमधीन्न्विति ।
अयं चक्रं नकिष्टं च नकिर्देवा मिनीमसि ॥
विश्वान्देवान्हवामहे स क्षपो निष्कं सुषुम ।
नहि वां प्रो षु स हि शर्धस्ता ऋचोऽत्र निदर्शनम् ॥५३॥

सू० अ०—"अग्निमीळे···"; "दृतेरिव···"; "गायन्ति···"; "एतम्···"; "अधीन्नु···"; "अयं चक्रम्···"; "नकिष्टम्···"; "नकिर्देवा मिनीमसि···"; "विश्वान्देवान्हवामहे···"; "स क्षपः···"; "निष्कम्···"; "सुषुम···"; "नहि-वाम्···"; "प्रो षु···"; "स हि शर्धः···"—ये ऋचायें यहाँ (अर्थात् सूत्र १८।४६-५२ के) उदाहरण हैं।

उ० भा०—यथाक्रमं पुरस्तादेव निर्दर्शितानि ॥

उ० भा० अ०—क्रमानुसार पहले ही उदाहरण दिये जा चुके हैं।

द्वाभ्यां पादेन द्वाभ्यां तु तव त्यत्पञ्चपदाष्टिः ।
अव्यूहेनातिशक्वरी तृतीयः षोळशाक्षरः ॥५४॥

सू० अ०—"तव त्यत्···" ( यह ऋचा ) पाँच पादों की है और 'अष्टि' है। संधि-विच्छेद ('व्यूह') किये बिना यह 'अतिशक्वरी' है। इसका तृतीय (पाद) १६ अक्षरों का है। ( इसमें पहला 'अवसान') दो (पादों) के बाद में (होता है); ( तब दूसरा 'अवसान') एक पाद के बाद में (होता है); (और तब तीसरा 'अवसान') दो पादों के बाद में होता है।

उ० भा०—द्वाभ्याम् अवस्येत्। ततः पादेन। पुनः द्वाभ्याम्—"तव त्यन्नर्यं नृतोऽप इन्द्र"[1] इति। सेयं पञ्चपदाष्टिः विज्ञेया। अव्यूहेनातिशक्वरी। अस्याम् तृतीयः षोडशाक्षरः ॥

उ० भा० अ०—द्वाभ्याम्=दो पादों के बाद में; 'अवसान' करे। तत्पश्चात्; पादेन=एक पाद के बाद में (दूसरा 'अवसान' करे)। पुनः; द्वाभ्याम्=दो पादों के बाद में (तीसरा 'अवसान' करे)—"तव त्यन्नर्यं नृतोऽप इन्द्र।"[क] इसे; पञ्चपदाष्टिः=पाँच पादों वाली 'अष्टि' जानना चाहिए। अव्यूहेनातिशक्वरी=संधि-विच्छेद ('व्यूह') न करने पर यह 'अतिशक्वरी' है। इसमें; तृतीयः षोडशाक्षरः=तृतीय ( पाद ) १६ अक्षरों वाला है।

टि० (क) तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यद् देवस्य शवसा प्रारिणा असुं रिणन्नपः ।
भुवद्विश्वमभ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषम् ॥

---

[1] ऋ० २।२२।४

## चतुर्भिस्तत एकेनाग्ने तमद्येति च ॥५५॥

सू० अ०—"अग्ने तमद्य...." में (पहला 'अवसान') चार (पादों) के बाद में (होता है) और तब (दूसरा 'अवसान') एक पाद के बाद में (होता है)।

उ० भा०—चतुर्भिः पूर्वमवसानं तत एकेन—"अग्ने तमद्याश्वं न स्तोमैः"[१] इति ॥

उ० भा० अ०—पहला 'अवसान'; चतुर्भिः=चार पादों के बाद में (होता है); ततः=तत्पश्चात् (दूसरा 'अवसान'); एकेन=एक (पाद) के बाद में (होता है)—"अग्ने तमद्याश्वं न स्तोमैः।"[क]

## चतुर्भिस्तु परं द्वाभ्यां तव स्वादिष्ठा तच्छंयोः ॥५६॥

सू० अ०—"तव स्वादिष्ठा..." और "तच्छंयोः...."—(इन दो ऋचाओं में) (पहला 'अवसान') चार (पादों) के बाद में (होता है) और दूसरा ('अवसान') दो पादों के बाद में (होता है)

उ० भा०—चतुर्भिः पूर्वमवसानं परं द्वाभ्याम्—"तव स्वादिष्ठाग्ने संदृष्टिः"[२] इति। "तच्छंयोरा वृणीमहे॥"[३]

उ० भा० अ०—पहला 'अवसान'; चतुर्भिः=चार पादों के बाद में (होता है); परम्=दूसरा ('अवसान'); द्वाभ्याम्=दो पादों के बाद में (होता है)—"तव स्वादिष्ठाग्ने संदृष्टिः।"[ख] "तच्छंयोरा वृणीमहे।"[ग]

## भरद्वाजाय तच्चक्षुरधीद् वृक्षा दृतेरिव।
## एतासु न व्यवस्यन्त्येके द्वादशकादिषु ॥५७॥

सू० अ०—"भरद्वाजाय....", "तच्चक्षुः...", "अधीत्...", "वृक्षाः...." और "दृतेरिव..."—बारह अक्षरों के (पाद) से प्रारम्भ होने वाली इन (ऋचाओं) में कतिपय (आचार्य) कोई 'अवसान' नहीं करते हैं।

उ० भा०—एतासु द्वादशकादिषु ऋक्षु एके; (न व्यवस्यन्ति=) अवसानं न कुर्वन्ति। "भरद्वाजायाव धुक्षत द्विता धेनुं च"[४-घ] "तच्चक्षुर्देवहितं शुक्रमुच्चरत्प-

टि० (क) अग्ने तमद्या ऽश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम्। ऋध्यामा त ओहैः॥
(ख) तव स्वादिष्ठा ऽग्ने संदृष्टि—रिदा चिदह्न इदा चिदक्तोः।
श्रिये रुक्मो न रोचत उपाके॥
(ग) तच्छंयोरा वृणीमहे गातुं यज्ञाय गातुं यज्ञपतये
दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः।
ऊर्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे॥
(घ) भरद्वाजायाव धुक्षत द्विता।
धेनुं च विश्वदोहसम् इषं च विश्वभोजसम्॥
अथवा
भरद्वाजायाव धुक्षत द्विता धेनुं च विश्वदोहसम् इषं च विश्वभोजसम्॥

[१] ऋ० ४।१०।१ [२] ऋ० ४।१०।५ [३] ऋ० खि० १०।१९१।५ [४] ऋ० ६।४८।१३

श्येम।"[१]-क "अधीन्वत्र सप्ततिं च सप्त च सद्यो दिदिष्ट।"[२]-ख "वृक्षाश्चिन्मे अभिपित्वं अरारणुर्गाम्।"[३]-ग "दृतेरिव तेऽवृकमस्तु सख्यमच्छिद्रस्य॥"[४]-घ

उ० भा० अ०—एतासु द्वादशकादिषु=बारह अक्षरों के (पाद) से प्रारम्भ होने वाली इन (ऋचाओं) में; एके=कतिपय आचार्य; (न व्यवस्यन्ति=) 'अवसान' नहीं करते हैं।.........।

(प्रश्नस्वरूपमध्यायस्वरूपं च)

प्रश्नस्तृचः पङ्क्तिषु तु द्वृचो वा
द्वे द्वे च पङ्क्तेरधिकाक्षरेषु।
एका च सूक्तं समयास्त्वगण्याः
परावरार्ध्या द्विपदे यथैका॥
सूक्तस्य शेषोऽल्पतरो यदि स्यात्
पूर्वं स गच्छेद्यदि तु द्वृचो वा।
ते षष्टिरध्याय उपाधिका वा
सूक्तेऽसमाप्ते यदि ते समाप्ताः॥५८॥

(प्रश्न का स्वरूप और अध्याय का स्वरूप)

सू० अ०—तीन ऋचाओं का एक 'प्रश्न' होता है। 'पङ्क्ति' (छन्दः की ऋचाओं) में दो ऋचायें अथवा (तीन ऋचायें) ('प्रश्न' होती हैं)। 'पङ्क्ति' से अधिक अक्षरों वाले (छन्दों) में दो-दो ऋचाओं का ('प्रश्न' होता है)। एक

टि० (क) तच्चक्षुर्देवहितं शुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतम्॥

अथवा

तच्चक्षुर्देवहितं शुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतम्॥

(ख) अधीन्वत्र सप्ततिं च सप्त च।
सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः॥

अथवा

अधीन्वत्र सप्ततिं च सप्त च सद्यो दिदिष्ट तान्वः
सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः॥

(ग) वृक्षाश्चिन्मे अभिपित्वे अरारणुः।
गां भजन्त मेहनाऽश्वं भजन्त मेहना॥

अथवा

वृक्षाश्चिन्मे अभिपित्वे अरारणुः
गां भजन्त मेहनाऽश्वं भजन्त मेहना॥

---

[१] ऋ० ७।६६।१६ [२] ऋ० १०।९३।१५ [३] ऋ० ८।४।२१ [४] ऋ० ६।४८।१८

(ऋचा) सूक्त (हो तो वह एक ऋचा भी 'प्रश्न' होती है)। 'समय'-संज्ञक पुनरुक्त मंत्रांशो को नहीं गिना जाता है, चाहे वे (मंत्रांश) बड़े हों अथवा छोटे हों। दो द्विपदाओं को एक (ऋचा) करके (गिना जाता है)। यदि सूक्त का शेष भाग ('प्रश्न' से) अल्पतर हो तो वह पूर्ववर्ती ('प्रश्न') को प्राप्त होगा। यदि (शेष भाग) दो ऋचायें हों तो विकल्प से (वे दो ऋचायें पूर्ववर्ती 'प्रश्न' का अंग होती हैं)। एक अध्याय में ६० ('प्रश्न') होते हैं। यदि सूक्त के समाप्त न होने पर ही वे (६० 'प्रश्न') समाप्त (पूरे) हो जावें तो (एक अध्याय में ६० से भी) अधिक ('प्रश्न' हो जाते हैं)।

उ० भा०—इत्युक्तौ श्लोकावोङ्कारपटले अत्र च। तत्रैव व्याख्यातौ॥

उ० भा० अ०—ये दोनों श्लोक ओङ्कार पटल(१५।२३-३१)में कहे गये हैं और यहाँ भी। उनकी व्याख्या वहीं पर(=ओंकार पटल में)की जा चुकी है (दे० पृ० ७७४-७७६)।

(त्रिष्टुब्जगत्योश्छन्दोज्ञानस्य च महिमा)

सर्वाणि भूतानि मनो गतिश्च
स्पर्शाश्च गन्धाश्च रसाश्च सर्वे।
शब्दाश्च रूपाणि च सर्वमेतत्
त्रिष्टुब्जगत्यौ समुपैति भक्त्या ॥५६॥

(त्रिष्टुप्, जगती और छन्दोज्ञान की महिमा)

सू० अ०—सब भूत, मनः, गति, स्पर्श, गन्ध, सब रस, शब्द, रूप—ये सब 'त्रिष्टुप्' और 'जगती' को अनुपात-विशेष से प्राप्त होते हैं (अर्थात् ऋग्वेद में मुख्यतः 'त्रिष्टुप्' और 'जगती' से ही बाह्य तथा आन्तर पदार्थजात का सविशेष वर्णन किया गया है)।

उ० भा०—सर्वाणि भूतानि मनो गतिश्च स्पर्शाश्च गन्धाश्च सर्वे रसाः शब्दाश्च रूपाणीत्येतत्सर्वम्; त्रिष्टुब्जगत्यौ=त्रिष्टुभं च जगतीं च; भक्त्या; (समुपैति=) समुपगच्छति॥

उ० भा० अ०—सर्वाणि भूतानि=सब भूत; मनो गतिश्च=मनः और (उसका धर्म) गति; स्पर्शाश्च गन्धाश्च सर्वे रसाः शब्दाश्च रूपाणि-एतत्सर्वम्=स्पर्श, गन्ध, सब रस, शब्द और रूप—ये सब; भक्त्या=उचित अनुपात में; त्रिष्टुब्जगत्यौ='त्रिष्टुप्' और 'जगती' को; (समुपैति=) प्राप्त होते हैं[क]।

टि० (क) बाह्य तथा आन्तर जगत् सूक्तों के वर्ण्य होने के कारण देवता भी भौतिक ही हैं—ऐसा सूत्रकार का मत सूचित होता है।

गुर्वक्षराणां गुरुवृत्ति सर्वं
गुर्वक्षरं त्रैष्टुभमेव विद्यात् ॥६०॥

सू० अ०—गुरु स्वभाव वाले सब (पदार्थ) 'गुरु' अक्षरों से सम्बद्ध हैं। 'गुरु' 'अक्षर' वाला 'त्रिष्टुप्' को ही जानना चाहिए (क्योंकि 'त्रिष्टुप्' का उपोत्तम 'अक्षर' 'गुरु' होता है)।

उ० भा०—यत् किंचित्स्थावरं जङ्गमं गुरुवृत्ति तत्सर्वं गुर्वक्षराणामेव। किं पुनर्गुर्वक्षरम्? (गुर्वक्षरम्) त्रैष्टुभम् इति ॥

उ० भा० अ०—जो कोई स्थावर और जङ्गम; गुरुवृत्ति=गुरु स्वभाव वाला है; वह; सर्वम्=सब; गुर्वक्षराणामेव (विद्यात्)='गुरु' अक्षरों ही से सम्बद्ध हैं (यह जानना चाहिए)। 'गुरु' 'अक्षर' वाला कौन है? (उत्तर) (गुर्वक्षरम्) त्रैष्टुभम्=('गुरु' अक्षरों वाला) 'त्रिष्टुप्' है।

लघ्वक्षराणां लघुवृत्ति सर्वं
लघ्वक्षरं जागतमेव विद्यात् ॥६१॥

सू० अ०—लघु स्वभाव वाले सब (पदार्थ) 'लघु' अक्षरों से सम्बद्ध हैं। 'लघु' अक्षर' वाला 'जगती' को ही जानना चाहिए (क्योंकि 'जगती' का ही उपोत्तम 'अक्षर' 'लघु' होता है)।

उ० भा०—यत्स्थावरं जङ्गमं लघुवृत्ति तत्सर्वं लघ्वक्षराणामेव विद्यात्। किं पुनस्तल्लघ्वक्षरम्? (लघ्वक्षरम्) जागतम् इति ॥

उ० भा० अ०—जो कोई स्थावर और जङ्गम; लघुवृत्ति=लघु स्वभाव वाला है; वह; सर्वम्=सब; लघ्वक्षराणामेव विद्यात्='लघु' अक्षरों ही से सम्बद्ध है—यह जानना चाहिए। 'लघु' अक्षर' वाला कौन है? (उत्तर) ( लघ्वक्षरम् ) जागतम्=('लघु' 'अक्षर' वाला) 'जगती' है।

यश्छन्दसां वेद विशेषमेतं
भूतानि च त्रैष्टुभजागतानि।
सर्वाणि रूपाणि च भक्तितो यः
स्वर्गं जयत्येभिरथामृतत्वम् ॥
स्वर्गं जयत्येभिरथामृतत्वम् ॥६२॥

सू० अ०—जो (व्यक्ति) छन्दों के विशेष को जानता है और 'त्रिष्टुप्' तथा 'जगती' से सम्बद्ध भूतों और सब रूपों को सविशेष जानता है, वह इन (छन्दों) से स्वर्ग को जीत लेता है और तदनन्तर अमृतत्व को प्राप्त कर लेता है।

उ० भा०—यो ब्राह्मणश्छन्दसामेतं विशेषं वेद=भूतानि च त्रैष्टुभजागतानि यो वेद; सर्वाणि रूपाणि च। यो द्वादशाध्यायानां त्रयाणां चाभ्यासं करोति। भूतानि

च त्रैष्टुभजागतानि सर्वाणि रूपाणि च भक्तितः। स स्वर्गं जयत्येभिरथामृतत्वम्
त्रैष्टुभजागतानि यो वेदः भक्तितः स स्वर्गं लोकं जयति एभिश्छन्दोभिः; अथामृतत्वं च गच्छति—इत्याह भगवाञ्छौनकः। श्लोकाः—

गायत्र्यादीनि च्छन्दांसि सोमो यैराहृतः पुरा।
तानि सर्वमिदं कृत्स्नं त्रैलोक्यं सच राचरम्॥
स्वर्ग्यं यशस्यमायुष्यं पुण्यं वृद्धिकरं शुभम्।
कीर्तिमृग्यं यशस्यं च छन्दसां ज्ञानमुच्यते॥

छन्दोज्ञानं नान्यत्; तस्मात् प्रयत्नं कुरु। महाज्ञानानां नान्यदस्तीति तत्त्वम्।

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्रउवट-
कृतौ प्रातिशाख्यभाष्येऽष्टादशं पटलं समाप्तम्॥

## प्रातिशाख्यभाष्ये तृतीयोऽध्यायः॥

## इति उवटकृतभाष्यसहितमृग्वेदप्रातिशाख्यं समाप्तम्।

उ० भा० अ०—यश्छन्दसामेतं विशेषं वेद=जो ब्राह्मण छन्दों के इस विशेष को जानता है=जो 'त्रिष्टुप्' और 'जगती' से सम्बद्ध भूतों और सब रूपों को जानता है। और जो (प्रथम पटल से लेकर पञ्चदश पटल तक के) पन्द्रह (=१२+३) पटलों (अध्यायों) का अभ्यास करता है। भूतानि च त्रैष्टुभजागतानि सर्वाणि रूपाणि च भक्तितः। स स्वर्गं जयत्येभिरथामृतत्वम्=जो (व्यक्ति) 'त्रिष्टुप्' और 'जगती' से सम्बद्ध (भूतों और सब रूपों को) सविशेष जानता है, वह इन छन्दों से स्वर्ग लोक को जीत लेता है और तदनन्तर अमरत्व को प्राप्त कर लेता है–ऐसा भगवान् शौनक ने कहा है। (इस विषय में ये) श्लोक हैं–

जो 'गायत्री' आदि छन्दः प्राचीन काल में सोम को लाये थे वे ('गायत्री' आदि छन्दः ही) ये सम्पूर्ण चराचर तीन लोक हैं।[क] छन्दों का ज्ञान स्वर्ग को प्रदान करने वाला, यश और आयु को बढ़ाने वाला, पवित्र, समृद्धि करने वाला, शुभ, कीर्ति के लिए अन्वेषणीय और यश को बढ़ाने वाला है।

छन्दोज्ञान से अन्य नहीं है। इसलिए (छन्दोज्ञान की प्राप्ति के लिये) प्रयत्न करो। महा-ज्ञानों में (छन्दोज्ञान के समान) दूसरा ज्ञान नहीं है—यह तात्पर्य है।

टि० (क) सोम के पलायन तथा आहरण की कथा के लिये बृहद्देवता ६।१०९-११४ को देखिय।

आनन्दपुर निवासी वज्रट के पुत्र उवट की कृति पार्षदव्याख्यात्मक प्रातिशाख्य-
भाष्य में अष्टादश पटल समाप्त हुआ।

## प्रातिशाख्य में तृतीय अध्याय समाप्त हुआ।

## उवटकृत भाष्य के सहित ऋग्वेद-प्रातिशाख्य समाप्त हुआ॥

---

परावरे ब्रह्मणि यं सदाहुर्
वेदात्मानं वेदनिधिं मुनीन्द्राः।
तं पद्मगर्भं परमं त्वादिदेवं
प्रणम्यर्चां लक्षणमाह शौनकः ॥१॥

माण्डूकेयः संहितां वायुमाह
तथाकाशं चास्य माक्षव्य एव।
समानतामनिले चाम्बरे च
मत्वागस्त्योऽविपरिहारं तदेव ॥२॥

अध्यात्मक्लृप्तौ शूरवीरः सुतश्च
वाङ्मनसयोर्विवदन्त्यानुपूर्व्ये।
सन्धेर्विवर्तनं निर्भुजं वदन्ति
शीघ्राक्षरोच्चारणं च प्रतृण्णम् ॥३॥

उभयं व्याप्तमुभयन्तरेण
तथा परे कामा अन्ननाकोभयाख्याः।
प्राणः षकारो यच्च बलं णकारो
वाक्प्राणयोर्यश्च होमः परस्परम् ॥४॥

गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च।
लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः ॥५॥

स्वरितोदात्तनीचत्वं श्वासो नादस्तथोभयम्।
एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयता ॥६॥

छन्दोज्ञानमाकारं भूतज्ञानं
छन्दसां व्याप्तिं स्वर्गामृतप्राप्तिम्।
अस्य ज्ञानार्थमिदमुत्तरत्र
वक्ष्ये शास्त्रमखिलं शैशिरीये ॥७॥

पदक्रमविभागज्ञो वर्णक्रमविचक्षणः।
स्वरमात्राविशेषज्ञो गच्छेदाचार्यसंपदम् ॥८॥

अकारर्कारावि उ ए ओ ऐ औ
पदाद्यन्तयोर्न ऌकारः स्वरेषु।
आकारादीन्दीर्घरूपान्द्वितीयान्
ह्रस्वेषु पञ्चस्वपि तानि सन्ति ॥९॥

कखौ गघौ ङ चछौ जझौ ञ
टठौ डढौ ण तथौ दधौ न।
पफौ बभौ म यरलवा हशषसा
अः ᳵक ᳶप अं इति वर्णराशिः क्रमश्च ॥१०॥

# अथ ऋग्वेदप्रातिशाख्यम्

## अथ प्रथमं पटलम्

[१]अष्टौ समानाक्षराण्यादितस् [२]ततश् चत्वारि सन्ध्यक्षराण्युत्तराणि ।
[३]एते स्वरा [४]इपरो दीर्घवत्प्लुतो ऽ[५]नुस्वारो व्यञ्जनं वा स्वरो वा ॥१॥

[६]सर्वः शेषो व्यञ्जनान्येव[७] तेषामाद्या स्पर्शाः [८]पञ्च ते पञ्चवर्गाः ।
[९]चतस्रोऽन्तस्थास्तत [१०]उत्तरेऽष्टा ऊष्माणोऽ[११]न्त्याः सप्त तेषामघोषाः ॥२॥

[१२]वर्गे वर्गे च प्रथमावघोषौ [१३]युग्मौ सोष्माणाव[१४]नुनासिकोऽन्त्यः ।
[१५]तस्मादन्यमवसाने तृतीयं गार्ग्यं स्पर्शं [१६]प्रथमं शाकटायनः ॥३॥

[१७]ओजा ह्रस्वाः सप्तमान्ताः स्वराणाम् [१८]अन्ये दीर्घा [१९]उभये त्वक्षराणि ।
[२०]गुरूणि दीर्घाणि [२१]तथेतरेषां संयोगानुस्वारपराणि यानि ॥४॥

[२२]अनुस्वारो व्यञ्जनं चाक्षराङ्गं [२३]स्वरान्तरे व्यञ्जनान्युत्तरस्य ।
[२४]पूर्वस्यानुस्वारविसर्जनीयौ [२५]संयोगादिर्वा [२६]च परक्रमे द्वे ॥५॥१॥

[२७]मात्रा ह्रस्वस् [२८]तावदवग्रहान्तरं [२९]द्वे दीर्घं[३०]स्तिस्रः प्लुत उच्यते स्वरः।
[३१]अधः स्विदासी३दुपरि स्विदासी३दर्थे प्लुतिर्भीरिव विन्दती३त्रिः ॥६॥

[३२]स्वरभक्तिः पूर्वभागक्षराङ्गं [३३]द्राघीयसी सार्धमात्रे[३४]तरे च ।
[३५]अर्धोनान्या [३६]रक्तसंज्ञोऽनुनासिकः [३७]संयोगस्तु व्यञ्जनसंनिपातः ॥७॥

[३८]कण्ठ्योऽकारः [३९]प्रथमपञ्चमौ च द्वा ऊष्मणां [४०]केचिदेता उरस्यौ ।
[४१]ऋकारल्कारावथ षष्ठ ऊष्मा जिह्वामूलीयाः प्रथमश्च वर्गः ॥८॥

[४२]तालव्यावेकारचकारवर्गाविकारैकारौ यकारः शकारः ।
[४३]मूर्धन्यौ षकारटकारवर्गौ [४४]दन्तमूलीयस्तु तकारवर्गः ॥९॥

[४५]सकाररेफलकाराश्च [४६]रेफं बर्स्व्यमेके [४७]शष ओष्ठ्योऽपवाद्य ।
नासिक्यान् [४८]नासिक्ययमानुस्वारान् [४९]इति स्थानान्य[५०]त्र यमोपदेशः ॥१०॥२॥

[५१]जिह्वामूलं तालु चाचार्य आह स्थानं डकारस्य तु वेदमित्रः ।
[५२]द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकारः ॥११॥

ळ्हकारतामेति स एव चास्य ढकारः सन्नूष्मणा संप्रयुक्तः ।
इळा साळ्हा चात्र निदर्शनानि वीड्वङ्ग इत्येतदवग्रहेण ॥१२॥

[५३]न्यायैर्मिश्रानपवादान्प्रतीयात् [५४]सर्वशास्त्रार्थं प्रतिकण्ठमुक्तम् ।
[५५]स्थानप्रश्लेषोपदेशे स्वराणां ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णौ ॥१३॥

[५६]असावमुमिति तद्भावमुक्तं यथान्तर [५७]पादवच्चैव प्रैषान् ।
[५८]प्राक्चानार्षादितिकरणात्पदान्तांस् तद्युक्तानां [५९]तेन येऽसंहितानाम् ॥१४॥

[६०]सामवशा इति चैवापवादान् कुर्वन्ति ये संपदं पादवृत्तयोः ।
[६१]अप्रत्याम्नाये पदवच्च पद्यान् [६२]ऋते नतोपाचरितक्रमस्वरान् ॥१५॥३॥

[६३]अष्टावाद्यानवसानेऽप्रगृह्यानाचार्या आहुरनुनासिकान्स्वरान् ।
[६४]तत्तिमात्रे शाकला दर्शयन्त्याचार्यशास्त्रापरिलोपहेतवः ॥१६॥

[६५]ऋकारादयो दश नामिनः स्वराः [६६]पूर्वो नन्ता नतिषु नम्यमुत्तरम् ।
[६७]सहोपधोऽरिफित एकवर्णवद् विसर्जनीयः स्वरघोषवत्परः ॥१७॥

[६८]ओकार आमन्त्रितजः प्रगृह्यः [६९]पदं चान्यो [७०]ऽपूर्वपदान्तगश्च ।
[७१]षष्ठादयश्च द्विवचोऽन्तभाजस् त्रयो दीर्घाः [७२]साप्तमिकौ च पूर्वौ ॥१८॥

[७३]अस्मे युष्मे त्वे अमी च प्रगृह्या [७४]उपोत्तमं नानुदात्तं न पद्यम् ।
[७५]उकारश्चेतिकरणेन युक्तो रक्तोऽपृक्तो द्राघितः शाकलेन ॥१९॥

[७६]ऊष्मा रेफी पञ्चमो नामिपूर्वो [७७]महोऽपोवर्जमितरो यथोक्तम् ।
[७८]अन्तोदात्तमन्तर[७९]क्षाविपर्यये [८०]स्पर्शे चोषः प्रत्यये पूर्वपद्यः ॥२०॥४॥

[८१]प्रातर् [८२]देवं भार् [८३]वधराद्युदात्तं [८४]करनुदात्तम् [८५]अबिभस् [८६]तदादः ।
[८७]स्तः प्रागाथमे[८८]तशे कर् [८९]दिवे कर् [९०]अपस्कर[९१]त्सार[९२]विपूर्वमस्तः ॥२१॥
[९३]स्वः स्वरितं [९४]न समासाङ्गमुत्तरं [९५]स्वरादेशोऽपूर्वपदेष्व[९६]वर्महः ।
[९७]अनर्थर्चान्ते स्वरघोषजत्परमूधर् [९८]न रेफेऽरुषासोऽतृणन्महो ॥२२॥
[९९]वरवरावरिति- चैकपादे व्यपपूर्वाण्यसमासाङ्गयोगे ।
[१००]पथ्या मघोनी दिवि चक्षसा मदे पूर्वोऽर्चिषातीतृषामोत्तरेषु न ॥२३॥

[१०१]होतः सनितः पोतर्नेष्टः सोतः सवितर्नेतस्त्वष्टः ।
मातर्जनितर्भ्रातस्त्रात स्थातर्जरितर्धातर्धर्तः ॥२४॥
[१०२]जामातर्दुहितर्दर्तः प्रशास्तरवितः पितः ।
दोषावस्तरवस्पर्तः प्रयन्तश्चेङ्गथमुत्तमम् ॥२५॥
[१०३]दीवरभारवरीवरदर्दर् दर्दरदर्धरजागरजीगः ।
वारपुनः पुनरस्परक स्पः सस्वरहः सनुतः सबरस्वाः ॥२६॥५॥

॥ इति ऋग्वेदप्रातिशाख्ये प्रथमं पटलम् ॥

## अथ द्वितीयं पटलम्

[१]संहिता पदप्रकृतिः [२]पदान्तान् पदादिभिः संदधदेति यत्सा ।
कालाव्यवायेन [३]स्वरान्तरं तु विवृत्तिः [४]सा वा स्वरभक्तिकाला ॥१॥
[५]पदान्तादिष्वेव विकारशास्त्रं पदे दृष्टेषु वचनात्प्रतीयात् ।
[६]पदं पदान्तादिवदेकवर्णं प्रश्लिष्टमप्या[७]नुपूर्व्येण संधीन् ॥२॥
[८]एष स्य स च स्वराश्च पूर्वे भवन्ति व्यञ्जनमुत्तरं यदेभ्यः ।
तेऽन्वक्षरसंधयोऽनुलोमाः [९]प्रतिलोमास्तु विपर्यये त एव ॥३॥

[१०]तत्र प्रथमास्तृतीयभावं प्रतिलोमेषु नियन्त्य[११]थेतरेषु ।
ऊष्मा परिलुप्यते त्रयाणां स्वरवर्जं [१२]न तु यत्र तानि पद्याः ॥४॥

[१३]पुरएता तितउना प्रउगं नमउक्तिभिः ।
अन्तःपदं विवृत्तयो [१४]अतोऽन्याः पदसंधिषु ॥५॥१॥

[१५]समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम् ।
[१६]इकारोदय एकारमकारः सोदयस् [१७]तथा ॥६॥

उकारोदय ओकारं [१८]परेष्वैकारमौजयोः ।
[१९]औकारं युग्मयो[२०]रेते प्रश्लिष्टा नाम संधयः ॥७॥

[२१]समानाक्षरमन्तस्थां स्वामकण्ठ्यं स्वरोदयम् ।
[२२]न समानाक्षरे स्वे स्वे [२३]ते क्षैप्राः प्राकृतोदयाः ॥८॥

[२४]विसर्जनीयोऽरिफितो दीर्घपूर्वः स्वरोदयः ।
आकार[२५]मुत्तमौ च द्वौ स्वरौ [२६]ताः पदवृत्तयः ॥९॥

[२७]ह्रस्वपूर्वस्तु सोऽकारं [२८]पूर्वौ चोपोत्तमात्स्वरौ ।
[२९]त उद्ग्राहा [३०]दीर्घपरा उद्ग्राहपदवृत्तयः ॥१०॥२॥

[३१]ओष्ठ्ययोन्योर्भुग्नमनोष्ठ्ये वकारोऽत्रान्तरागमः ।
[३२]ऋकार उदये कण्ठ्यावकारं तदुद्ग्राहवत् ॥११॥

[३३]उद्ग्राहाणां पूर्वरूपाण्यकारे प्रकृत्या द्वे ओ भवत्येकमाद्यम् ।
प्राच्यपञ्चालपदवृत्तयस्ताः पञ्चालानामोष्ठ्यपूर्वा भवन्ति ॥१२॥

[३४]अथाभिनिहितः संधिरेतैः प्राकृतवैकृतैः ।
एकीभवति पादादिरकारस्तेऽत्र संधिजाः ॥१३॥

[३५]अन्तःपादमकाराच्चेत् संहितायां लघोर्लघु ।
यकाराद्यक्षरं परं वकाराद्यपि वा भवेत् ॥१४॥

[३६]अन्याद्यपि तथायुक्तमावोऽन्तोपहितात्सतः ।
[३७]अयेऽयोऽवेऽव इत्यन्तैरकारः सर्वथा भवन् ॥१५॥३॥

[३८]व इत्येतेन चा न प्र क्व चित्रः सवितैव कः ।
पदैरुपहितेनैतैः [३९]सर्वैरेवोदयाः परे ॥१६॥

[४०]अदादवत्रोऽजनयन्ताव्यत्या अभेदयोऽपाष्टिरवन्त्ववीरता ।
अमुमुक्तममतयेऽनशामहा अव त्वचोऽवीरतेऽवांस्यवोऽरयाः ॥१७॥

[४१]वासोवायोऽभिभुवे कवष्यः संक्रन्दनो धीजवनः स्वधावः ।
उत्सादत ऋतावः सगम्यौ हिरण्यंभृङ्ङ इति चोपधाभिः ॥१८॥

[४२]येऽरा रायोऽब मेऽधायि नोऽहिरग्नेऽभिदासति ।
जायमानोऽभवोऽग्नेऽयं नृतोऽपोंऽहोऽतिपिप्रति ॥१९॥

[४३]जम्भयन्तोऽहिं मरुतोऽनुभर्त्री यवसेऽविष्यन्वयुनेऽजनिष्ट ।
वृत्रहत्येऽवीः समरेऽत्तमाना मरुतोऽमदन्नभितोऽनवन्त ॥२०॥४॥

[४४]ब्रुवतेऽध्वँस्तवसेऽवाचि मेऽरपद् दधिरेऽग्ना नहुषोऽस्मत्पुरोऽभिनत् ।
उप तेऽवां वहतेऽयं यमोऽदितिर् जनुषोऽया सुवितोऽनु श्रियोऽधित ॥२१॥

[४५]वपुषेऽनु विशोऽयन्त सन्तोऽवद्यानि खेऽनसः ।
भरन्तोऽवस्यवोऽवोऽस्तु बुध्न्योऽज्जो मायिनोऽवमः ॥२२॥

[४६]देवोऽनयत्पुरूवसोऽसुरघ्नो भूतोऽभि श्वेतोऽरुषस्तेन नोऽद्य ।
येऽजामयस्तेऽरदन्नोऽधिवक्ता तेऽवर्धन्त तेऽरुणेभिः सदोऽधि ॥२३॥

[४७]स्वाध्योऽजनयन्वन्वनोऽभिमातीरग्नेऽप दह मनसोऽधि योऽध्वनः ।
योऽह्यस्तेऽविन्दँस्तपसोऽधि न योऽधि पादोऽस्य योऽति ब्राह्मणोऽस्य योऽनयत् ॥२४॥

[४८]सोऽस्माकं यो द्वेषोभ्योऽन्यकृतेभ्यस् तेभ्योऽकरं पयस्वन्तोऽमृताश्च ।
[४९]अन्योऽवर्किऽथो इति नोदयेषु पुत्रः पराके च परावतश्च ॥२५॥५॥

[५०]अन्तःपादं च वयो अन्तरिक्षे वयो अस्याश्रयो हेतयस्त्रयः ।
वो अन्धसः शयवे अश्विनोभये श्रवो अधि साञ्जयो जामयः पयः ॥२६॥

[५१]प्रकृत्येतिकरणादौ प्रगृह्याः [५२]स्वरेषु चार्ध्यं [५३]प्रथमो यथोक्तम् ।
[५४]सहोदयास्ताः प्रगृहीतपदाः सर्वत्रैव [५५]त्र्यक्षरान्तास्तु नैवे ॥२७॥

[५६]आध्यमिव संध्ययकारपूर्वो विवृत्तेश्च प्रत्ययः सन्नुकारः ।
[५७]ऊकारादौ स्विति [५८]पूषेत्यकारे न चेत्तदेकाक्षरतत्रपूर्वम् ॥२८॥

[५९]श्रद्धा सम्राज्ञी सुशमी स्वघोती पृथुज्रयी पृथिवीषा मनीषा ।
अया निद्रा ज्या प्रपेति स्वराणां मुख्ये परे पञ्चमषष्ठयोश्च ॥२९॥

[६०]स्वरे पादादा उदये सचेति [६१]ध्वन्तं जोषं चर्षणीश्चर्षणिभ्यः ।
एकारान्तं मित्रयोरस्मदीवन् नमस्युरित्युपधं चेत्यपृक्तम् ॥३०॥६॥

[६२]एकारौकारपरौ च कण्ठ्यौ लुशादर्वाग् [६३]गोतमे चामिनन्त ।
[६४]विम्वा विघर्ता विपन्या कदा या मातेत्यृकारेऽप्यपादादिभाजि ॥३१॥

[६५]परुच्छेपे मीषा पथेत्यकार [६६]एवौ अग्निमत्रिषु सा प्लुतोपधा ।
[६७]सचादयो या विहिता विवृत्तयः प्लुतोपधान्ता अनुनासिकोपधाः ॥३२॥

[६८]सेदु सास्मिन्सेमभि साभिवेगः सेदृभवः सोपमा सौषधीरनु ।
सास्मा अरं सोत नः सेन्द्र विश्वा सेति सास्माकमनवद्य सासि ॥३३॥

[६९]सेदग्ने सेदग्निर्वासिष्ठं सास्माकेभिः सेदुग्रः सेमे ।
सैना सनं सेमं सोदञ्चं सेमां सोषां सेशे सेदीशे ॥३४॥

[७०]नू इत्था ते सानो अव्ये वो अस्मे वासौ वेद्यस्याम् ।
धिष्ण्येमे नू अन्यत्रा चित् पादादौ नू इन्द्रेत्यर्वाक् ॥३५॥७॥

[७१]उद्रू अयान्व्रजेषितं धनर्चं शतर्चसं दशोणये दशोण्यं ।
यथोहिषे यथोचिषे दशोणि स्वरोदयं पिबा इमं रथोळ्ह ॥३६॥

[72]वीरास एतन तमू अकृण्वँस् ततारेव प्रैषयू रोदसीमे ।
धन्वर्णसः सरपसः सचोत प्रधीव वीळू उत सर्तवाजौ ॥३७॥
[73]अश्विनेव पीवोपवसनानां महो आदित्याँ उषसामिवेतयः ।
स्तोतव अम्व्यं वं सृजा इयर्ध्यै सचेन्द्र सानो अव्यये स्वधामिता ॥३८॥
[74]गोओपशागोऋजीकप्रवादो मनीषा आ त्वा पृथिवी उत द्यौः ।
मनीषावस्यू रणया इहाव बृहतीइवेति च यथागृहीतम् ॥३९॥
[75]योनिमारैंगगादारैंग् आरैंग्दुर्योण आवृणक् ।
हृन्त्यासद्भुप आरुपितमनायुधास आसता ॥४०॥८॥
[76]अस्त्वासतो निराविध्यद् अभ्यादेवं क आसतः ।
न्यावृणङ्क्ष्किरादेवो न्याविध्यदेनमायुनक् ॥४१॥
[77]अहिहत्नारिणक्पथ आयुक्षातामुदावता ।
रिक्थमारैंग्य आयुक्त कुरुश्रवणमावृणि ॥४२॥
[78]शुनश्चिच्छेपं निदितं नरा वा शंसं पूषणम् ।
नरा च शंसं दैव्यं तां अनानुपूर्व्यसंहिताः ॥४३॥
[79]यतो दीर्घस्ततो दीर्घा विवृत्तयो [80]द्विसंधयस्तूभयतःस्वरस्वराः ।
[81]प्राच्यपञ्चालउपधानिभोदयाः शाकल्यस्य स्थविरस्ये[82]तरा स्थितिः ॥४४॥९॥

॥ इति ऋग्वेदप्रातिशाख्ये द्वितीयं पटलम् ॥

## अथ तृतीयं पटलम्

[1]उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः ।
आयामविश्रम्भाक्षेपैस् त उच्यन्तेऽ[2]क्षराश्रयाः ॥१॥
[3]एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः ।
[4]तस्योदात्ततरोदात्तादर्धमात्रार्धमेव वा ॥२॥
[5]अनुदात्तः परः शेषः स उदात्तश्रुति[6]र्न चेत् ।
उदात्तं वोच्यते किञ्चित् स्वरितं वाक्षरं परम् ॥३॥
[7]उदात्तपूर्वं स्वरितमनुदात्तं पदेऽक्षरम् ।
[8]अतोऽन्यत्स्वरितं स्वारं जात्यमाचक्षते पदे ॥४॥
[9]उभाभ्यां तु परं विद्यात् ताभ्यामुदात्तमक्षरम् ।
अनेकमप्यनुदात्तं[10] न चेत्पूर्वं तथागतात् ॥५॥१॥
[11]उदात्तवत्येकीभाव उदात्तं संध्यमक्षरम् ।
[12]अनुदात्तोदये पुनः स्वरितं स्वरितोपधे ॥६॥
[13]इकारयोश्च प्रश्लेषे क्षैप्राभिनिहितेषु च ।
उदात्तपूर्वरूपेषु शाकल्यस्यैवमाचरेत् ॥७॥

[१४]माण्डूकेयस्य सर्वेषु प्रश्लिष्टेषु तथा स्मरेत् ।
[१५]इत्येकीभाविनां धर्माः[१६] परैः प्रथमभाविनः ॥८॥

[१७]उदात्तपूर्वं नियतं विवृत्त्या व्यञ्जनेन वा ।
स्वर्यतेऽन्तर्हितं न चेदुदात्तस्वरितोदयम् ॥९॥

[१८]वैवृत्ततैरोव्यञ्जनौ क्षैप्राभिनिहितौ च तान् ।
प्रश्लिष्टं च यथासंधि स्वारानाचक्षते पृथक् ॥१०॥२॥

[१९]स्वरितादनुदात्तानां परेषां प्रचयः स्वरः ।
उदात्तश्रुतितां यान्त्येकं द्वे वा बहूनि वा ॥११॥

[२०]केचित्त्वेकमनेकं वा नियच्छन्त्यन्ततोऽक्षरम् ।
आ वा शेषा[२१]न्नियुक्तं तूदात्तस्वरितोदयम् ॥१२॥

[२२]नियमं कारणादेके प्रचयस्वरधर्मवत् ।
प्रचयस्वर आचारः शाकल्यान्यतरेययोः ॥१३॥

[२३]परिग्रहे त्वनार्षान्तात् तेन वैकाक्षरीकृतात् ।
परेषां न्यासमाचारं व्यालिस्तौ चेत्स्वरौ परौ ॥१४॥

[२४]यथा संधीयमानानामनेकीभवतां स्वरः ।
उपदिष्टस्तथा विद्यादक्षराणामवग्रहे ॥१५॥३॥
[२५]पद्यादीँस्तु द्व्युदात्तानामसंहितवदुत्तरान् ।
[२६]जात्यवद्वा तथा वान्तौ तनू शचीति पूर्वयोः ॥१६॥

[२७]त्रिमात्रयोरुत्तरयोरन्त्यापि प्रचयस्वरे ।
मात्रा न्यस्ततरैकेषाम्[२८] उभे व्यालिः समस्वरे ॥१७॥

[२९]असंदिग्धान्स्वरान्ब्रूयात् [३०]अविकृष्टान[३१]कम्पितान् ।
[३२]स्वरितं नातिनिर्हण्यात् [३३]पूर्वौ नातिविवर्तयेत् ॥१८॥

[३४]जात्योऽभिनिहितश्चैव क्षैप्रः प्रश्लिष्ट एव च ।
एते स्वाराः प्रकम्पन्ते यत्रोच्चस्वरितोदयाः ॥१९॥४॥

॥ इति ऋग्वेदप्रातिशाख्ये तृतीयं पटलम् ॥

## अथ चतुर्थं पटलम्

[१]स्पर्शाः पूर्वे व्यञ्जनान्युत्तराण्यास्थापितानामवशंगमं तत् ।
[२]घोषवत्पराः प्रथमास्तृतीयान् स्वानु[३]त्तमानुत्तमेषूदयेषु ॥१॥

[४]सर्वैः प्रथमैरुपधीयमानः शकारः शाकल्यपितुश्छकारम् ।
[५]पदान्तैस्तैरेव तृतीयभूतैस्तेषां चतुर्थानुदयो हकारः ॥२॥

[६]विस्थाने स्पर्श उदये मकारः सर्वेषामेवोदयस्योत्तमं स्वम् ।
[७]अन्तस्थासु रेफवर्जं परासु तां तां पदादिष्वनुनासिकां तु ॥३॥

[9]तथा नकार उदये लकारे [9]ञकारं शकारचकारवर्गयोः ।
[10]तकारो जकारलकारयोस्तौ [11]तालव्येऽघोष उदये चकारम् ॥४॥

[12]छकारं तयोरुदयः शकारो [13]न शाकल्यस्य [14]ता वशंगमानि ।
[15]रेफोष्मणोरुदययोर्मकारोऽनुस्वारं तत्परिपन्नमाहुः ॥५॥१॥

[16]ङकारेऽघोषोष्मपरेऽन्तरेके ककारं [17]टकारनकारयोस्तु ।
आहुः सकारोदययोस्तकारं [18]ञकारे शकारपरे चकारम् ॥६॥

[19]तेऽन्तःपाता [20]अकृतसंहितानामूष्मान्तानां पटलेऽस्मिन्विधानम् ।
[21]चित्कम्भनेनोष्मलोपः [22]ककुद्मान् [23]सम्राट्शब्दः परिपन्नापवादः ॥७॥

[24]विसर्जनीय आकारमरेफी घोषवत्परः ।
[25]ओकारं ह्रस्वपूर्व[26]स्तौ संधी नियतप्रश्रितौ ॥८॥

[27]सर्वोपधस्तु स्वरघोषवत्परो रेफं रेफी ते पुना रेफसंधयः ।
[28]रेफोदयो लुप्यते [29]द्राघितोपधा ह्रस्वस्य[30]कामनियता उभाविमौ ॥९॥

[31]अघोषे रेफ्यरेफी चोष्माणं स्पर्श उत्तरे ।
तत्सस्थानमनूष्मपरे [32]तमेवोष्माणमूष्मणि ॥१०॥२॥

[33]प्रथमोत्तमवर्गीये स्पर्शे वो[34]ष्मणि चानते ।
[35]व्यापन्न ऊष्मसंधिः स विक्रान्तः प्राकृतोपधः ॥११॥

[36]ऊष्मण्यघोषोदये लुप्यते परे नतेऽपि [37]सोऽन्वक्षरसंधिर्वक्रः ।
[38]अव्यापत्तिः कलपफेषु वृत्ती [39]रेफं स्वर्घूः पूरघोषेष्वविग्रहे ॥१२॥

[40]नाक्षा इन्दुः स्वधितीवाह एव भूम्याददेऽह्नोभिरुषर्वसूयवः ।
आवर्तमोऽह्नोराव्याण्यदो पितो प्रचेता राजन्वर्तनीरहेति च ॥१३॥

[41]यथादिष्टं नामिपूर्वः षकारं सकारमन्योऽरिफितः ककारे ।
पकारे च प्रत्ययेऽन्तःपदं तु सर्वत्रैवोपाचरितः स संधिः ॥१४॥

[42]अन्तःपादं विग्रहेऽकारपूर्वः पतिशब्दे द्व्यक्षरे पुंस्प्रवादे ।
[43]करं कृतं कृधि करत्करित्यपि परेषु [44]पादान्तगते परीति च ॥१५॥३॥

[45]असोऽन्तोऽरेफवतः पारशब्दे परि कृतानि करतीति चैषु ।
अपादान्तीयेष्वपि प्रत्ययेषु [46]वास्तोरित्येतत्पतिशब्द उत्तरे ॥१६॥

[47]आविर्हविर्ज्योतिरित्युत्तरश्चेत् ककारो[48]ऽथो प्रान्तपश्यन्तिशब्दौ ।
[49]इळाया गा नमसो द्वेषयुर्द्रुहो मातुरिळस्तानि पदप्रवादे ॥१७॥

[50]पूर्वः पुरः पूरिति पूर्वपद्यान् पदानि चापोद्य नवैतदेवम् ।
[51]अस्या यः सोमो बृहतोऽस्य पूर्व्यं उरु ज्योतिर्जात इमो वृधोऽन्यः ॥१८॥

[52]ब्रह्मणो द्वे त्रातऋतो विदुर्वसुः पशुरेतानि कविशब्द उत्तरे ।
[53]पथिशब्दे जिन्वथश्चेतयोमहः[54] पृथुशब्दे विवस्तो वीळितो रजः ॥१९॥

[५५]कामपोषपूर्विशब्देषु रायः [५६]पादादिरन्तश्च दिवस्परीति च ।
[५७]दिवस्पृथिव्या अधमस्पदीष्ट पूर्वं पादादौ यदि [५८] सस्पदीष्ट ॥२०॥४॥

[५९]शवसो महः सहस इळायाः पात्वित्येकं पुत्रशब्दे पराणि ।
[६०]रायस्खां महस्करथो महस्परं निष्कव्यादं निष्कृथ निष्पिपर्तन ॥२१॥

[६१]कबन्धं पृथु कण्वासः पुत्रः पातु पथा पयः ।
पायुः पृष्ठं पदं तेषां प्रवादा उदये दिवः ॥२२॥

[६२]रजसस्पात्यन्तस्पथाः कस्काव्या चतुरस्कर ।
स्वादुष्किल निदस्पातु द्यौष्पितर्वसतिष्कृता ॥२३॥

[६३]तपोष्पवित्रं त्रिष्पूत्वी घीष्पीपाय विभिष्पतात् ।
द्यौष्पिता रजसस्पृष्टो ददुष्पज्राय नस्करः ॥२४॥
[६४]वसुष्कुविन्मनुष्पिता पितुष्पिता पितुष्परि ।
प्र णस्पुरो मयस्करन् नभस्पयस्त्रयस्परः ॥२५॥५॥

[६५]नकार आकारोपधः पद्यान्तोऽपि स्वरोदयः ।
लुप्यतेऽ[६६]त्राञ्च् जग्रसानाञ्च् जघन्वान् देवहूतमान् ॥२६॥
बद्बधानाँ इन्द्र सोमाँस् तृषाणान् नो देव देवान् ।
हन्त देवाँ इति [६७]चैता आन्पदाः पदवृत्तयः ॥२७॥

[६८]विवृत्यभिप्रायेषु च पीवोअन्नाँ रयिवृधः ।
वधन्वाँ यो जुजुर्वाँ यः स्ववाँ या तु दद्वाँ वेति ॥२८॥
[६९]हतं योनौ वचोभिर्यान् युवन्यूँर् वनिषीष्टेति ।
ईकारोकारोपहितो रेफमेषु [७०] स्वरेषु च ॥२९॥
[७१]दस्यूँरेको नूँरभि च [७२]ते स्पर्शरेफसंधयः ।
[७३]नास्मानुपैतावान्स्फुरान् गच्छान् देवानयाड् वहान् ॥३०॥६॥

हिरण्यचक्रान्मायावान् घोषांस् तानश्विनाविद्वान् ।
पयस्वान्पुत्राना वेह्या यजीयान्पतीनुरोः ॥३१॥
[७४]चरति चक्रे चमसांश्च चो चिष् चरसि च्यौत्नश्चतुरश्चिकित्वान् ।
एतेषु सर्वत्र विसर्जनीयवद् दीर्घोपघोऽ[७५]स्मान् चमसान्पशून्न ॥३२॥
[७६]तांस्ते सर्वांस्तान्देवांस्त्वं तांस्त्रायस्वावदेस्त्वं च ।
[७७]विसर्जनीयं परेष्विति ते स्पर्शोष्मसंधयः ॥३३॥

[७८]नॄः पतिभ्यो नॄः प्रणेत्रं नॄः पात्रं स्वतवाः पायुः ।
संधिर्विक्रान्त एवैप [७९]नॄँ पाहि शृणुधीति च ॥३४॥

[८०]नकारस्य लोपरेफोष्मभावे पूर्वस्ततस्थानादनुनासिकः स्वरः ।
[८१]आदिस्वरश्चोत्तरेषां पदेऽपि [८२]माँस्पचन्या माँश्चत्वे मँश्चतोश्च ॥३५॥७॥
[८३]ईमित्यन्तलोप एपूदयेषु गर्भं गावो वत्सं मृजन्ति पृच्यते ।
सखायो दिव्याच पुना रिणन्ति रथमित्यन्वक्षरमंधिरेव सः ॥३६॥

[८४]पुरु पृथ्वधि पूर्वेषु शकार उपजायते।
ह्रस्वे च पूर्वपद्यान्ते चन्द्रशब्दे परेऽन्तरा ॥३७॥

[८५]परीति पद्ये कृपरे षकारो [८६]वनेति रेफः सदशब्द उत्तरे।
[८७]परिष्कृण्वन्ति वेधसोऽ[८८]स्कृतोषसं [८९]शौद्धाक्षराः संघय एत उक्ताः ॥३८॥

[९०]मेघातिथौ वरुणान्तव्रतान्तौ स्पर्शान्तस्थाप्रत्ययौ निर्ह्लसेते।
[९१]आदित्या देवा वरुणासुरेति येत्यादिषु [९२]वयमित्यत्र मित्रा ॥३९॥

[९३]या सुप्रतीकं निष्कृतं पुरोहितिः क्षत्रं दाशति शवसा भिषज्यथः।
[९४]सो चिन्न्वगस्त्ये दशमे च मण्डले[९५]सा न्वीयते[९६]सः पलिक्नी[९७]हि षस्तव॥४०॥

[९८]जुगुक्षतो दुदुक्षन्गा अदुक्षद् दुक्षन् वृधेऽस्य दुक्षतानु दक्षि।
दक्षन्न परमन्दक्षुषोऽभि दक्षत् कृष्णासो दक्षि हियानस्य दक्षोः ॥४१॥८॥

॥इति ऋग्वेदप्रातिशाख्ये चतुर्थं पटलम्॥

## अथ पञ्चमं पटलम्

[१]अन्तःपादं नाम्युपधः सकारः षकारमप्यूष्मपरैर्यथोक्तम्।
अन्यैरेकारान् [२]नतिरत्र पूर्वा ततो व्यापत्तिर्भवतीति विद्यात् ॥१॥

[३]सूती नकिः स्वैर्व्युरु नह्यभि त्री नि हीति स [४]द्व्यक्षरेणैव सत्स्यः।
[५]स्वबह्वरेण [६]पदादयश्च स्यिति स्किति स्नित्य[७]रेफस्य च स्मिति ॥२॥

[८]एकारेणापि स्विति नःपरं चेद् [९]दीर्घो न स्यिर[१०]यु च नास्पर्शपूर्वम्।
[११]तकारवर्गस्तु टकारवर्गमन्तःपदस्थोऽपि षकारपूर्वः ॥३॥

[१२]सितां सधस्थात्स्तनिहि स्तवाम स्तवे स्तुवन्ति स्तुहि सीं स्तुत स्थ।
साहि स्त स्तुप्सत्सि सत्सत्स्वनीति स्तोभेत्यादिश्चापि बह्वक्षरान्त्यैः ॥४॥

[१३]नि परीति स्व सीत्यादी चकारवर्गीयोदयौ।
[१४]दकारे चोत्तरे परान् से स सीति स्वरोदये ॥५॥१॥

[१५]सेध स्वापय सस्वजे सस्वजाते ससाद च।
[१६]सन्तं सन्तः सन्ति पूर्वी स्थु स्था स्यादिति चोत्तरः ॥६॥

[१७]हि षिञ्च तू षिञ्च रजःसु षीदन्नितो षिञ्चताभि षतः किमु ष्वित्।
सूरिभिष्ष्याम दिवि षन्तु के ष्ठ प्रति ष्फुर त्री षधस्था कमु ष्वित् ॥७॥

[१८]उ षुवाणो दिवि षन्सूरिभिष्ष्यामृञ्छन्ति ष्म नू ष्ठिरं वसु षीदति।
नु ष प्र हि ष्ठो यशसा मही षा वि षा भूयामो षु यति ष्ठनेति च ॥८॥

[१९]वाजी स्तुतो वहन्ति सीं पतिः स्यां दित्ससि स्तुतः।
अपो सु म्यक्ष श्रुधि सु त्रिः स्म स्तुहि स्तुहीति न ॥९॥

[२०]युग्मान्तस्थादन्तमूलीयपूर्वैरन्तःपदं नम्यतेऽन्तःपदस्थैः।
[२१]अन्यपूर्वैरपि पद्यादिभाक्सन्ने[२२]काररेफपृतनोपधश्च ॥१०॥२॥

[२३]रेफकारर्कारपरः प्रकृत्या [२४]सं स्पृक्स्व सस्वंरिति चाक्षराणाम् ।
[२५]सेति चास्य परिपन्नोपधा चेत् [२६]संयोगस्य चाप्यनुनासिकादेः ॥११॥

[२७]सहस्रं सनिता स्थात्रां सावित्रं सूवरी स्नुषे ।
समुद्रं सदृशा सारे सायकः साधनी सह ॥१२॥

सनित स्पष्टः सदृशः सखायं सप्तैरेते सानुशब्दश्च पद्याः ।
[२८]सुते सोमे वक्षणेऽप्रामि चर्षणि स्वभिष्टीत्येवमुपधाश्च सर्वे ॥१३॥

[२९]अभिसत्वा रयिस्थानो यासिसीष्ठाः सिसक्षि च ।
तिस्तिरे तिस्तिराणा च सिसिचे सिसिचुश्च न ॥१४॥

[३०]गोष्ठादिव गोषतमा उपष्टुत् सप्रवादो नार्षदः पर्यषस्वजत् ।
स्वादुषंसदः पुरुषन्तिशब्दः सुषंसदं सुषमिधानुसेषिधत् ॥१५॥३॥

[३१]तकारे पूर्वपद्यान्तो व्यापन्नोऽरेफसंहिते ।
नामिपूर्वो [३२]विग्रहे तु त्वा त इत्यनुदात्तयोः ॥१६॥

[३३]अग्निरेकाक्षरस्यादौ [३४]नकिश्चाथो[३५] तनुष्विति ।
[३६]तत्ततन्युस्ततक्षुस्तं तौग्र्यमित्युत्तरेषु निः ॥१७॥

[३७]पायुभिः पर्तृभिस्त्रिभिर् ददिर्वैरस्मयुः शुचिः ।
उत्तरे त्वमितीयुष्टे[३८] वावृधुष्टे सधिष्टव ॥१८॥

गोभिष्टरेम क्रतुष्टं [३९]नाहुर्निष्षिध्वरीः प्रभोः ।
वन्दारुः षष्टिराविस्त्विर बाह्वोरित्यनुदात्तयोः ॥१९॥

[४०]ऋकाररेफषकारा नकारं समानपदेऽवगृह्ये नमन्ति ।
अन्तःपदस्थमककारपूर्वा अपि संध्याः [४१]संध्य ऊष्माप्यनिङ्ग्ये ॥२०॥४॥

[४२]न मध्यमं स्पर्शवर्गेर्व्यवेतं [४३]परिप्रऋषीन्द्रादिषु चोत्तमेन ।
[४४]तथा शकारसकारव्यवेतं सर्वादिषु [४५]पूर्वपदान्तगं च ॥२१॥

[४६]नाभिर्निर्णिक्प्रवादादी [४७]यकारस्पर्शसंहितम् ।
[४८]कर्मनिष्ठां दीर्घनीथे [४९]भानुशब्दे [५०]हिनोमि च ॥२२॥

[५१]ह्रस्वोदयं त्वेषपुर्वेवमादिषु [५२]त्रिशुभ्रयुष्मादिषु चोभयोदयम् ।
[५३]अह्नकारेष्वधिकत्र्यक्षरेषु च पुरःपुनर्दुश्चतुर्ज्योतिरादिषु ॥२३॥

[५४]उरुयाम्णेऽनुरुयाम्णे सुषाम्णे वृषमण्यवोऽधिषवण्या प्रण्यः ।
[५५]दूढ्यदूणाशदूळभप्रवादा दुर्दूभूतमक्षरं तेषु नन्तृ ॥२४॥

[५६]अव्यवेतं विग्रहे विघ्नकृद्भ्री रेफोष्माणौ सर्वपूर्वौ यथोक्तम् ।
[५७]आनीन्नु त्यं नोनुवुर्नोनुमश्च नयत्यर्थं च प्र परीति पूर्वौ ॥२५॥५॥

[५८]पुरुप्रिया ब्रह्म सुतेषु नेषि प्लुताकारान्तं सषकारमिन्द्र ।
नते सु स्मेति सवनेषु पर्षि स्वरयंमा प्रोरु परीति तैर्नः ॥२६॥

[५९]हेळो मुञ्चतं मित्राय राया पूषा गव्यविषञ्छकारवत् ।
नव्येभिस्त्मने वाजान्कृणोत द्वे नय प्रतरं परेषु न ॥२७॥

[६०]गोरोहेण निर्गमाणीन्द्र एणा इन्द्र एणं स्वर्णं परा णुदस्व ।
अग्नेरवेण वार्णं शक्र एणमे[६१]षा नतिर्दन्त्यमूर्धन्यभावः ॥२८॥६॥

॥ इति ऋग्वेदप्रातिशाख्ये पञ्चमं पटलम् ॥

## अथ षष्ठं पटलम्

[१]स्वरानुस्वारोपहितो द्विरुच्यते संयोगादिः स क्रमोऽविक्रमे सन् ।
[२]सोष्मा तु पूर्व्येण सहोच्यते सकृत् स्वेना[३]संयोगादिरपि च्छकारः ॥१॥

[४]परं रेफात् [५]स्पर्श एवं लकाराद् [६]ऊष्मणो वा [७]नावसितं [८]न रेफः ।
[९]वोष्मा संयुक्तोऽनुपधो [१०]न तूष्मा स्वरोष्मपरो [११]न परक्रमोपधा ॥२॥

[१२]सहातिहाय पवमान यस्य द्वे तने चेत्युपहितः पदादिः ।
छकारो [१३]दीर्घेण च मेतिवर्जं [१४]संयुक्तं तु व्यञ्जनं शाकलेन ॥३॥

[१५]पदान्तीयो ह्रस्वपूर्वो ङकारो नकारश्च क्रामत उत्तरे स्वरे ।
[१६]अनादेशे पटलेऽस्मिन् विधानं सर्वत्र विद्यादपि वैकृतानाम् ॥४॥

[१७]अभिनिधानं कृतसंहितानां स्पर्शान्तस्थानामपवाद्य रेफम् ।
संधारणं संवरणं श्रुतेश्च स्पर्शोदयाना[१८]मपि चावसाने ॥५॥१॥

[१९]अन्तस्थाः स्वे स्वे च परेऽपि रक्ता [२०]लकार ऊष्मस्वपि शाकलेन ।
[२१]ळकारे चैवमुदये ककारः स्यातेर्घातो [२२]रप्शतेर्वा पकारः ॥६॥

[२३]पदान्तीया यरवोष्मोदयाश्च स्पर्शा पदादिष्ववरे मकारात् ।
[२४]असंयुक्तं शाकलं [२५]तन्न पद्ये स्वित्युत्तरे [२६]वा त्वनेकाक्षरान्त्याः ॥७॥

[२७]सर्वत्रैके करणस्थानभेदे वा शाकलं [२८]प्रथमे स्पर्शवर्गे ।
[२९]स्पर्शा यमाननुनासिकाः स्वान् परेषु स्पर्शेष्वनुनासिकेषु ॥८॥

[३०]न स्पर्शस्योष्मप्रकृतेः प्रतीयाद् यमापत्तिं [३१]नाभिनिधानभावम् ।
[३२]यमः प्रकृत्यैव सदृक् [३३]श्रुतिर्वा यमेन मुख्यास्ति समानकाला ॥९॥

[३४]अनन्यस्तु प्रकृतेः प्रत्ययार्थे [३५]न संयोगं स्वरभक्तिर्विहन्ति ।
[३६]यमान्नासिक्या स्वरभक्तिरुत्तरा गार्ग्यस्यो[३७]ष्मा सोऽष्मणो [३८]वर्जयेत्तम् ॥१०॥२

[३९]नादः परोऽभिनिधानाद् ध्रुवं तत् तत्कालस्थान[४०]मश्रुति त्वघोषात् ।
[४१]नासिकास्थानमनुनासिकाच्चेद् [४२]अन्तस्थायाः पूर्वस्वरूपमेव ॥११॥

[४३]व्याळेः सर्वत्राभिनिधानलोपः [४४]परक्रमस्वररेफोपधे न ।
[४५]सवर्णपूर्वस्य सहध्रुवस्य विपर्ययो ध्रुवशिष्टेऽपरेषाम् ॥१२॥

[४६]रेफात्स्वरोपहिताद् व्यञ्जनोदयादृकारवर्णा स्वरभक्तिरुत्तरा ।
[४७]विच्छेदात् स्पर्शोष्मपराच्च घोषिणो [४८]द्राघीयसी तूष्मपरे[४९]तरा क्रमे ॥१३॥

[५०]सर्वत्रैके स्वरभक्तेरभावं [५१]रेफोपधामपरे विद्यमानाम् ।
[५२]अक्रान्तोष्मप्रत्ययाभावमेके [५३]पूर्वोत्तरस्वरसरूपतां च ॥१४॥

[५४]ऊष्मोदयं प्रथमं स्पर्शमेके द्वितीयमाहुरपदान्तभाजम् ।
[५५]क्शातौ खकारयकारा उ एके [५६]तावेव ख्यातिसदृशेषु नामसु ॥१५॥३॥

॥ इति ऋग्वेदप्रातिशाख्ये षष्ठं पटलम् ॥

॥ इति प्रथमोऽध्यायः ॥

## अथ सप्तमं पटलम्

[१]दीर्घं ह्रस्वो व्यञ्जनेऽन्यस्त्वृकाराद् यथादिष्टं सामवशः स संधिः ।
[२]सैव प्लुति[३]र्या स्वरेषूपदिष्टा [४]योनिमारंगादिषु चोदयादेः ॥१॥

[५]मक्षित्युकारः प्लवते सर्वत्राप्यपदान्तभाक् ।
[६]सुता याहीत्यतोऽन्येषु पदेष्वच्छेति विग्रहे ॥२॥

[७]अनाकारोपधश्चान्त्यो येत्युत्तरपदस्य यः ।
उदात्तादेर्द्व्यक्षरस्य [८]नास्येति व्यञ्जनोपधः ॥३॥

[९]नियूय पिष्टतमयाभिपद्य प्रास्य संगत्यानुदृश्याभिवृत्य ।
आरभ्य संमील्य मक्षुङ्गमाभिरभिव्लग्य यत्र निषद्य वीति च ॥४॥

[१०]नाहि जह्यभि वीर्येण कृधीति कृणुथेति च ।
एतान्येकाक्षरे पदे क्षैप्रीभाव्ये [११]पराणि च ॥५॥

[१२]युक्ष्व मन्दस्व विद्येति हीति [१३]विद्धि पिब स्विति ।
[१४]जुहोत यज घासथ शिशीत भरेति स्विति ॥६॥

[१५]सु नु हीत्येतेषु परेष्वघेति [१६]तृम्पतेन मुञ्चताघेति वीति ।
[१७]सु न्वित्यनर्यपरयोरुकारः पदं [१८]तयोरुत्तरे योज घेति ॥७॥

[१९]मृळयद्भ्यां वसुवित्तमं यत्सोमं जातवेदसम् ।
भरतेत्येतेष्व[२०]पादान्तो[२१]ऽच्छेति करणादिषु ॥८॥

[२२]करणं च चित्करते वृणीमहे भवतं कृणोतु भवत स्वस्तये ।
[२३]पुर्वेति चित्पुरुहूतो नृषूतः सहस्राणि पुरुभुजा धियायते ॥९॥

[२४]वहेति त्वंदुहितर्दैव्यमुत्तरं [२५]द्युम्नं रुद्रं नव्यमेतेषु वर्धय ।
[२६]चिन्महित्वंगीर्गृणानः सतेपरं न्वित्यन्त्ये चेन्मतंशब्दाद्रिवःपरे ॥१०॥२॥

[२७]तूतुजानो मतिभिर्भोजनानि नो दद्धि स्तोमं भूरि योनिं त्वमेषु ।
भरेत्येतन् [२८]न नु चिद्यो [२९]भवेति स्तोतृभ्यो द्युम्नी शत मे परेषु ॥११॥

[३०]शोचा यविष्ठयेवा यथा कर्ता यत्सादया सप्त ।
अर्चा मरुद्भ्यस्तिष्ठा नः सना स्वः पारया नव्यः ॥१२॥

[३१]बोधा स्तोत्रे चकृमा ब्रह्मवाहः शंसा गोषूच्छा दुहितर्वदा तना ।
अजा नष्टं जम्भया ता अघा महो गन्ता मा युक्ष्वा हि सृजा वनस्पते ॥१३॥

[३२]अग्ने रक्षा णस्तिष्ठा हिरण्ययं सोता वरेण्यं शोचा मरुद्वृधः ।
शिक्षा स्तोतृभ्यो भूमा त्रिवन्धुरः पिबा मधूनां सोता परीति च ॥१४॥

[३३]सक्ष्व मिमिक्ष्व दधिष्व वसिष्व श्रोत सुनोत हिनोत पुनात ।
विद्म जगृम्म ररम्म ववन्म क्षाम सुपप्तनि मन्थत मत्स्व ॥१५॥३॥

सर रद रण जिन्व धारयार्षं क्षर यज यच्छ दशस्य साध सेध ।
तप रुज मृळ वर्धं यावयात्र श्रवय नमस्य विदाष्ट कृष्व जोष ॥१६॥
शृणुधि शृणुत यन्त यच्छत स्तव सिम गूहत कुत्र मोषथ ।
दिधृत पचत वृश्च विध्यताथ मदथात्त यदीत पायन ॥१७॥
उपागत्याच्छलीकृत्य वन्नाजाविष्टनोरुष्य ।
इष्कर्तेळिष्व मर्मृज्म बिभयेयर्त तच्छतम् ॥१८॥

सार्धमद्यादिभिः प्लुतैः पादादौ व्यञ्जनोदयम् ।
न्वेववर्जं न संयोगे शेषे चापठिते सति ॥१९॥

[३४]वर्ध शुभ्रे रुज यः सेध राजन् वह हव्यानि यदि मेऽध यामनि ।
विद्म दातारमध धारयाध यदध ते विश्वं पुरु वाचं गाय ॥२०॥४॥

वह वायो पिब मध्वः पुरु विश्वान्यध वायुं पुरु शस्त ।
यदि मृत्योरध जिह्वा पुरु विश्वा पिब शुद्धं पिब राये वह कुत्सम् ॥२१॥

भरद्वाजेऽर्चं देवाय यदि वा पुरु दाशुषे ।
वह शुष्णायाध बह्वध यत्पुरु हीति न ॥२२॥

[३५]कृधीति परेषु सहस्रसां धियं जरित्रे न इति [३६]तत्रेति चान्त्ये ।
[३७]सहस्येन सुश्रवसं पवस्व द्वे नो अधीत्येषु परेषु तेन ॥२३॥

[३८]देवं वेनं केतमित्युत्तरेषु दधातेति [३९]श्रुधि वंस्वेति नःपरे ।
[४०]वेदेति विश्वस्यमृमंमउत्तर [४१]शुनःशेपे च प्लवते यकारे ॥२४॥

[४२]ब्रह्मेति नो द्वे च गिरः कृणोति ते कृणोत तूतोदिति चोत्तरेषु ।
[४३]अभीति नो नु नवन्ते सतो नरं द्वा सत्स्वित्याग्ने[४४]ऽर्धपरे तु मुख्ये ॥२५॥५॥

[४५]चक्रुर्वेदेते दशस्यन्समुद्रो रथेन नः सप्तऋषीन्मदन्ति ।
ते वो भयन्ते नियुद्भिः कृपीटं रथस्य सोमस्य मती रणन्ति ॥२६॥

[४६]समुद्रं द्वे स्वर्णं नवग्वशब्दो दशग्वं दंसिष्ठ वसूनि नो वसु ।
वृत्रं निर्द्वे नु यतिभ्यः सहन्तः पृथिव्यां निर्हंसि समत्सु पावक ॥२७॥

[४७]यत्रेति चक्रुरादिषु नरः सुपर्णा इति च ।
[४८]समुद्रादिषु येनेति [४९]तत्रेति मे सदो रथम् ॥२८॥

[५०]अवेति नो नु कल्पेषु नूनं वाजेषु पृत्सुषु ।
[५१]आद्ये चेद्वाजयुंपार्येकमग्नेमघवन्परे ॥२९॥

[५२]रास्वा पितः शतेना नो वर्धस्व सु श्रुधी हवम् ।
मन्दस्वा सु वहस्वा सु वनेमा ते नही नु वः ॥३०॥६॥

[५३]पाथा दिवो धाता रयिं सृजता गयसाधनम् ।
रास्वा चोरू न शग्धी नः सृजता मधुमत्तमम् ॥३१॥

[५४]जही चिकित्वो वेत्था हि रक्षथा न हता मखम् ।
युयोता शरुं स्वेना हि वनेमा ररिमा वयम् ॥३२॥

[५५]प्रप्रा वो अस्मे धामा ह सना ज्योतिरपा वृधि ।
[५६]ऋध्यामा ते वामदेवे जुहोता मधुमत्तमम् ॥३३॥

यक्ष्वा महे धिष्वा शवो जनिष्वा देववीतये ।
अधा त्वं ह्यद्याद्या श्वःश्वः सचस्वा नः स्वस्तये ॥३४॥७॥

॥ इति ऋग्वेदप्रातिशाख्ये सप्तमं पटलम् ॥

## अथाष्टमं पटलम्

[१]अन्तःपादं विग्रह एष्वपृक्त उकारो व्रजस्य सु धा नमोभिः ।
शुचिं पवित्रं तु महीर्नु चाप्लुतं सुतस्येति [२]यद्युदयोदया न ॥१॥

सोमसुतिं चर्किराम स्तवाम स्तवाना गृभाय रथं श्रुधीति ।
[३]ते अस्ति ते महिमनः प्र वोचत प्र वोचं नः सुमना द्वैपदाश्च ॥२॥

[४]महे दधिध्वं तिर मुञ्च नो मृधश् चर नमध्वं नम ते नयन्त ।
स्वित्येतेष्वे[५]काक्षरयोः पराणि चेदुपेन्द्राग्नेऽश्वाध्वरमायुरेत्विति ॥३॥

[६]सदेत्येतद्योनिषुपीतयेपरं [७]धन्वेत्येतत्सोम राट् पूयमानः ।
[८]यदीति क्रथो मनसः कवीनां सबन्धवो गोः सरमेति तेषु ॥४॥

[९]चरेति पुष्टिं सोम चर्षणिप्रा [१०]जनिमेति हन्ति सं जातवेदाः ।
[११]रन्धयेति येषुकंशासदुत्तरं [१२]न नःकारे स्वित्युपसातयेपरे ॥५॥१॥

[१३]महयात्र जय काव्येन गूर्वय भरेति च स्वरिंति प्रत्यये षट् ।
[१४]मद पर्षं पिपृत धन्व यच्छत रुहेमेति स्वस्तयउत्तराणि ॥६॥

[१५]दधिम मदत तन्वि सिञ्चत स्तव वदतानज रक्षतोक्षत ।
पिपृत पृणत पृच्छत प्रुष स्थ घ हिनवाय जुहोत पश्यत ॥७॥

चक्रमाकुत्र भूम स्म शिशीत स्तोत पप्तत ।
यथोदयानि सर्वाणि [१६]त्विति चैकाक्षरोपधम् ॥८॥

[१७]कदा हरिवो वरुणस्य चक्रतुः सूर्यस्य निष्टया इव भूम तेषु न ।
[१८]वस्त्राणि हि बावधे यज्ञियानां ते दंसो द्वे नः स च शक्र तेषु तु ॥९॥

[१९]चक्रमेति द्वैपदे भूरि दुष्कृतं वर्धतां विप्रवचसो जिह्वयेति ।
[२०]काण्वायना निष्कृतीरेतयो स्थ [२१]जाताः सुरथा हवनश्रुतश्च ॥१०॥२॥

[२२]सवापरं घेति न कौत्सवैमदं [२३]स्म राशिमित्यादिषु न [२४]प्रति ष्मं च ।
[२५]स्म ते परेषु व्रजनं वनस्पते शुभे- परुष्ण्यां [२६]स्म पुरा वृषाकपौ ॥११॥

[२७]राशिं वाजेषु मे सध पूषणं तं तूंहद्धायि मा दुर्हृणायतः ।
यस्मै यद् वृत्रहत्येषु मावते वातो यं यस्य मद्दुर्गृभीयसे ॥१२॥
[२८]पृच्छा विपश्चितमवा पुरंध्या घा त्वद्रिग्वीरान्वनुयामा त्वोताः ।
जनया दैव्यं भुजेमा तनूभिर् हा वहतो वासया मन्मना च ॥१३॥
[२९]वेदा वसुधितिं रोमा पृथिव्या वोचा सुतेषु धावता सुहस्त्यः ।
मुञ्चा सुषुवुषः स्वाद्या पितॄनामिहा वृणीष्व वोचया पुरंधिम् ॥१४॥
[३०]अवया स कृणुथा सुप्रतीकं तिरा शचीभिः कृणुता सुरत्नान् ।
रमन्ता नहुषोऽनयता वियन्तः स्मा च्यावयन्नीरया वृष्टिमन्तम् ॥१५॥३॥
[३१]असृजता मातरं सू रथं हुवे नयता बद्धं स्वापया मिथूदृशा ।
इता जयता गता सर्वतातय ईरयथा मरुतो नेषथा सुगम् ॥१६॥
[३२]अन्यत्रा चित्पिबता मुञ्जनेजनं घा स्या वोचेमा विदथेष्विता धियम् ।
इता नि यत्रा वि दशस्यथा क्रिविं चा बोधाति द्रावया त्वं किरा वसु ॥१७॥
[३३]हा पदेव कर्तना श्रुष्टिं योधया च जग्रभा वाचम् ।
पायया च तर्पया कामं गातुया च मन्दया गोभिः ॥१८॥
[३४]घा स्यालादेना सुमतिं वोचा नु व्यथया मन्युम् ।
नेथा च चक्रा जरसं भवता मृळयन्तश्च ॥१९॥
[३५]एवा चन भजा राये ररिमा ते भजा भूरि ।
श्रुधी न उभयत्रा ते भजा त्वं मृळया नश्च ॥२०॥४॥
[३६]एकादशिद्वादशिनोर् लघावष्टममक्षरम् ।
उदये संहिताकाले [३७]नःकारे च गुरावपि ॥२१॥
[३८]दशमं चैतयोरेवं [३९]षष्ठं चाष्टाक्षरेऽक्षरम् ।
[४०]व्यूहैः संपत्समीक्ष्योने क्षैप्रवर्णैकभाविनाम् ॥२२॥
[४१]न वावृधन्त वातस्यावद्यानि जिघांससि ।
सासह्याम ववृत्याम दीदिह्यष्टममूर्णुहि ॥२३॥
[४२]पुरुप्रजातस्याभि नः कृणुहि द्व्यक्षरोपधम् ।
हर्यश्वोत भवन्त्विन्द्र सदनायास्ति नाम चित् ॥२४॥
[४३]चमसाँ इवाग्नि वसवान द्वादशिनः सुजास्य विमदस्य ।
सुमखाय धारय ददातु रक्ष धिया दधातु दिधिषेय ॥२५॥५॥
[४४]अङ्ग सरस्वति पञ्च चरन्ति ग्नाभिरिहेन्वसि रण्यसि धाव ।
विद्धि षु णोऽभि षतः सुविताय त्वा समिधान दधीमहि देव ॥२६॥
[४५]जामिषु जासु चिकेत किरासि स्मस्युप पात्यसि सोम शतस्य ।
आयुषि चेतति विष्टपि मास्व प्रोश्मसि मूर्धनि सद्म वरन्त ॥२७॥
[४६]प्रदिवि वरुण तमसि तिरसि घृतमिव दिवि मम हि नु विशः ।
उषसि पृथिवि रजसि वहसि हनति पितरि वि विहि नि मधु ॥२८॥

⁴⁷सहस्राणि श्रोमतेनासनाम च्छायामिवेषण्यसि सस्तु पाहि ।
गोपीथ्याय पवमानो वसन्तान् सख्याय वोचेमहि मानुषस्य ॥२९॥
⁴⁸आव्य भूमेति पादान्तौ व्यञ्जनेषु ⁴⁹श्रुधी हवम् ।
⁵⁰सखा होता स्मा सनेमि घर्मा सं भूषता रथः ॥३०॥६॥

॥ इति ऋग्वेदप्रातिशाख्येऽष्टमं पटलम् ॥

## अथ नवमं पटलम्

¹सर्वत्र पूर्वपदान्ताः प्लवन्ते वसुमघयोः परयो ²रवे तुवि ।
³विश्व विभ्व धन्व रथर्ति शत्रु द्युम्न यज्ञेति सहतौ ⁴प्र चाप्लुते ॥१॥

⁵सहप्रवादा उदयास्तमान्ताः ⁶पर्यम्यपापीति वृतावृवण ।
⁷अभीवर्तः सूयवसो रथीतमः पुरूतमोऽनन्तरर्घचे उत्तमः ॥२॥

⁸कवर्दु धान्य मिथु चर्षणि स्तन पिवेति सर्वत्र यथोदयं च ।
⁹त्विष्युक्थेत्येता उदये मकारे ¹⁰पर्युवंक्षेत्यमकारेऽनुनासिके ॥३॥

¹¹पित्र्य माहिनाक्रुषि भङ्गुराश्व विश्व विश्वदेव्य भेषज तुग्र्य पस्त्य ।
सुम्नर्तारातीत्युदये वकारे ¹²वैम्वादयश्च ¹³पृशनादयस्तु ॥१४॥

यकारेऽ¹⁴राति कवि सुक्रतु श्रुधि पितु सुम्न रय्यृताश्वेति चैते ।
¹⁵न स्वश्व सुम्नतं वृषेति पद्या एकाक्षरादा उदये यकारे ॥५॥१॥

¹⁶पृशिनाजिरर्जु मधु पुत्रि जनि क्रतु वल्गु वन्धुर वृकाङ्कु दम ।
वृजिनाम्बरीषु वृष मव्य सखि स्तभु दुच्छुनाद्य यवि शत्रु वसु ॥६॥

¹⁷वैभु ह्लादुनि पुष्ट पर्वताहुति शुभ्र हृदयामति सह वृष्ण्य शक्ति ।
सप्ति स्वधिति कृशन वयुनर्ण घृणि हित धित विषु सुतर्त्विय नीथ ॥७॥

¹⁸नर्तवाकेनाश्वविरसुम्नयन्ता वसुवसु प्रसहानोऽभिवावृते ।
परिवृतं नाभिवृत्याश्ववच्च¹⁹ पादान्ते ²⁰सर्वत्र परे मघस्य ॥८॥

²¹अश्वयूपायाश्वयुजोऽश्वयोगाः सहवाहः सुम्नयन्तर्तयन्त ।
सहवसुं सहवत्सर्तयुक्ति सहवीरं वयुनवच्चकार ॥९॥

²²सुम्नायुर्जुह्व ऋतायन्नृतायुमुग्रादेवं दक्षिणावानृतायोः ।
वृषारवाय सूमयं शतावन्नपीजुवारीवृतोऽनपावृत् ॥१०॥२॥

²³इन्द्रावतः सोमावतीमवायती दीर्घाधियोऽमित्रायुधो रथीतरः ।
अन्नावृधं विश्वापुषं वसुजुवं विश्वाभुवे यज्ञायते घृतावृधा ॥११॥

²⁴सुम्नायन्निन्मित्रायुव ऋषीवो देवावान्दिवः ।
एवावदस्य क्षेत्रासाम् ऋताव्ने सदनासदे ॥१२॥

²⁵पदेष्वन्तरनिङ्ग्येषु प्लुतिः पद्येषु चोत्तरा ।
²⁶वृषस्व वन्य वृद्ध्वांसं वाता वातुर्वनो वृतुः ॥१३॥

वृते वृषाणा वृषाणो वृजे वन्वि मृजुमृंशुः ।
मृजे मृजीत वानेषां व भेति सदृशादिषु ॥१४॥
[27]सहेत्यादिः पूर्वपदोपधः सन्नेकाक्षरचर्षणिधन्ववर्जम् ।
[28]न तु पादस्याष्टिनोऽन्तं गतस्य [29]न द्वादशिनोऽनभिमातिपूर्वः ॥१५॥३॥
[30]अभिमातिनृपृतनोपधस्तु सर्वत्र परे प्लवते यकारे ।
[31]आयवादीनामुदयास्त्रिवर्णाः पदैकदेशा इति तान्प्रतीयात् ॥१६॥
[32]आयव यावय च्यावय यामय रामय मामह् वावस ।
द्रावय दादृह वावृध तातृष सासह रारप ॥१७॥
आद्यक्षरं प्लुतं तेषाम[33]नन्वित्यस्य मध्यमम् ।
[34]द्विवर्णः प्रत्ययोऽन्त्यस्य [35]प्रवादाः षळितः परे ॥१८॥
[36]द्रूणाश [37]उक्थशासश्चे[38]कारान्तश्च दाधृषिः ।
[39]पादान्तेऽप्यः सादनम[40]र्षन्ति तु पूरुषः ॥१९॥
[41]दोषामस्मै राजतोऽक्न्वनस्पतीन् महीयमानां कति तुभ्यमेभ्यः ।
उषासमित्युत्तरं सर्वदेश्यं [42]पादस्य चैकादशिनो यदन्ते ॥२०॥४॥
[43]यवयुररमयः ससाहिषे ववृधन्तो रमया गिरा ररम्म ।
यवयसि ततृषाणमोषति श्रवयन्तोऽददृहन्त ते नृषह्ये ॥२१॥
[44]श्रवयतं वाजसातौ नृसह्ये विश्वासहं द्रूणशा रोचनानि ।
न ततृषाणो यमयो ररप्शे पुरुषीणां यवयन्त्विन्दवश्च ॥२२॥
[45]ररक्ष यवय स्तेनं ससाहे यवया वधम् ।
परमया द्रवयन्त श्रवयन् ररते च न ॥२३॥
[46]साह्वांसो वः सत्रासाहं सादन्यं सत्यं तातान ।
नानाम श्रूयाः शुश्रूया रीषन्तं गातूयन्तीव ॥२४॥
[47]वावर्त येषां रीषतोऽदकारे सान्त्यभि नृषाहमपूरुषघ्नः ।
सान्ति गुहा तन्वं रीरिषोऽष्ट जानि पूर्व्योऽभीवृतेव श्रथाय ॥२५॥५॥
[48]साहन्साहा जर्हृषन्त प्रसाहं नक्तोषासा सूर्यमुषासमग्निम् ।
परिरापः सूनृते जारयन्ती शुश्रूयातं युयुविः सादना ते ॥२६॥
[49]करन्सुषाहा घृतवान्ति साह्वान्नूयेव सूयवसाद् वृषाय ।
उषासानक्ता पृथुजाघने च राध्यभी रीरिषत ग्लापयन्ति ॥२७॥
[50]अश्वानयद्रीरिषतप्रावणेभी रथायन्तीवादमायः ससाहे ।
सासाह यूयुधिरिवाश्रथायः पुरुषघ्नं रीरिपः पूरुषादः ॥२८॥
[51]अपूरुषं जाहृषाणेन रीषत ऋतायुभी रथीनां साहिषामहि ।
पवीतारः कियात्ये पूरुषत्वत ऋतावरीरिव हव्यानि गामय ॥२९॥
[52]वृषायस्व प्रसवीता ससाहिषे तातृपाणा तातृपि सादनस्पृशः ।
साह्यामेयान्ति पशुमान्ति जागृधुः पवीतारं सूर्यमुषासमीमहे ॥३०॥६॥

॥ इति ऋग्वेदप्रातिशाख्ये नवमं पटलम् ॥

## अथ दशमं पटलम्

[१]क्रमो [२]द्वाभ्यामभिक्रम्य प्रत्यादायोत्तरं तयोः ।
उत्तरेणोपसंदध्यात् तथार्धर्चं समापयेत् ॥१॥

[३]एकवर्णमनोकारं नते सु स्मेति नःपरे ।
पदेन च व्यवेतं यत् पदं तच्च व्यवायि च ॥२॥

ईं लुप्तान्तं प्लुतादीनि स्कम्भनेनेति लुप्तवत् ।
इतो विष्वतावर्तमः पूर्वे द्विपदयोर्द्वयोः ॥३॥

स्वसारमस्कृतेत्युभे परं वीरास एतन ।
अतीत्यैतान्यवस्यन्ति प्लुतादिप्रभृतीनि च ॥४॥

[४]पूर्वोत्तरकृतं रूपं प्रत्यादानावसानयोः ।
न ब्रूयात् [५]सर्वमेवान्यद्यथासंहितमाचरेत् ॥५॥१॥

[७]अवगृह्याप्यतिक्रम्य सहेतिकरणानि च ।
घक्षिघुक्षिप्रवादी च विकृतादी प्लुतादि च ॥६॥

अन्तःपदं च येषां स्याद् विकारोऽन्यकारितः ।
एतानि परिगृह्णीयाद् बहुमध्यगतानि च ॥७॥

[९]अर्धर्चान्त्यं च [१०]नाकारं प्रागतोऽननुनासिकम् ।
[११]प्रत्यादायैव तं ब्रूयादुत्तरेण पुनः सह ॥८॥

[१२]उपस्थितं सेतिकरणं [१३]केवलं तु पदं स्थितम् ।
[१४]तत्स्थितोपस्थितं नाम यत्रोभे आह संहिते ॥९॥

[१५]अष्टवर्णे प्रथमे चोदकः स्यात्प्रदर्शकः ।
एतदिष्टं [१६]समासांस्तु पुनर्वचन इङ्गयेत् ॥१०॥२॥

[१७]इतिपूर्वेषु संधानं पूर्वैः स्वः स्यादसंहितम् ।
तदवग्रहवद् ब्रूयात् [१८]संधिनर्धर्चयोर्भवेत् ॥११॥

[१९]दृष्टक्रमत्वात्समयान् संदध्यात्सर्वशः क्रमे ।
पदेन च पदाभ्यां च प्रागवस्येदतीत्य च ॥१२॥

[२०]नकारस्योष्मवद्वृत्तं प्लुतोपाचरिते नतिः ।
प्रश्लेषश्च प्रगृह्यस्य प्रकृत्या स्युः परिग्रहे ॥१३॥

[२१]शौद्धाक्षरागमोऽऽपैति [२२]न्यायं यान्त्युत्तरे त्रयः ।
रिफितान्यूष्मणोऽघोषे द्रूभावः स्वघितीव च ॥१४॥३॥

॥ इति ऋग्वेदप्रातिशाख्ये दशमं पटलम् ॥

## अथैकादशं पटलम्

[१]अथार्ध्यलोपेन यदाह स क्रमः समानकालं पदसंहितं द्वयोः ।
[२]अथो बहूनामविलोपकारणः परैरवस्यन्त्यतिगम्य कानिचित् ॥१॥

[3]अपृक्तमेकाक्षरमद्वियोनि यत् तदानुनासिक्यभयादतीयते ।
[4]नतं च पूर्वेण परस्य कारणं नतेः परस्योभयहेतुसंग्रहात् ॥२॥
[5]परीत इत्युत्तरमेतयोर्द्वयोः परं हि पूर्वं नमतीत्यतीयते ।
[6]ततोऽपरे संध्यमवेक्ष्य कारणं तदर्थजं द्विक्रममत्र कुर्वते ॥३॥
[7]तमःपरं रेफनिमित्तसंशयात् तथावरित्येतदपोद्यते पदम् ।
[8]अदो पितो सो चिदुषर्वसूयवो न घक्षि घृक्षीत्यपि चातियन्ति किम् ॥४॥
[9]स्वसारमित्येतदपोद्यते पदं परः सकारोपजनोऽस्कृतेति च ।
निरस्कृतेति ह्युपसर्गकारितस् तदन्वयादाचरितं तु पञ्चभिः ॥५॥
[10]सहेति चेमेति च रक्तसंहितं गुणागमादेतनभावि चेतन ।
पदं च चास्कम्भ चिदित्यतः परं प्लुतादि चैतानि निमित्तसंशयात् ॥६॥१॥
[11]द्वयभिक्रमं पूर्वनिमित्तमानिनस् त्रिषूत्तमेष्वाहुरनन्तरं हि तत् ।
[12]अनन्तरं त्वेव चतुर्थषष्ठयोः परं कथं तत्र च न द्वयभिक्रमम् ॥७॥
[13]अनानुपूर्व्ये पदसंध्यदर्शनात् पदव्यवेतं च पदं व्यवायि च ।
[14]ततोऽपरे द्विक्रमम हुराश्रयात् कृताविलुप्तात्र हि वर्णसंहिता ।८॥
[15]पदानुपूर्व्येण सपूर्व आ ततस्ततो व्यवेतं च सह व्यवायि च ।
[16]ततो निराहेतरयोश्च ते पदे ततोऽव्यवेतेन परस्य संहिता ॥९॥
[17]अनन्तरे त्रिक्रमकारणे यदि त्रिभिश्च गार्ग्यः पुनरेव च त्रिभिः ।
[18]त्रिसंगमे पञ्चभिरार्ष्यनुग्रहश[19] चतुःक्रमस्त्वाचरितोऽत्र शाकलैः ॥१०॥
[20]अलोपभावादपरे बहुक्रमं प्रतिस्वमार्षीति न कुर्वते क्वचित् ।
[21]असर्वशस्त्रिप्रभृतिष्वनेकशः स्मरन्ति संख्यानियमेन शाकलम् ॥११॥
[22]अयावने पूर्वविधानमाचरेद् [23]यथापदं संधिमपेतहेतुषु ।
[24]अथो पदाभ्यां समयं पदेन च क्रमेष्ववस्येदतिगम्य संदधत् ॥१२॥२॥
[25]सहेतिकाराणि समासमन्तभाग् बहुक्रमे मध्यगतानि यानि च ।
तृतीयतां गच्छति यस्य सोष्मवाननन्ययोगं विकृतं प्लुतादि च ॥१३॥
अतीत्य तेषां पदतां प्रदर्शयेत् [26]कृते तु गार्ग्यस्य पुनस्त्र्यभिक्रमे ।
[27]अदृष्टवर्णे प्रथमे प्रदर्शनं स्मरन्ति तत्त्वत्र निराह चोदकः ॥१४॥
[28]पदं यदा केवलमाह सा स्थितिर [29]यदेतिकारान्तमुपस्थितं तदा ।
[30]अथो विपयस्य समस्य चाह ते यदा स्थितोपस्थितमाचरन्त्युत ॥१५॥
[31]पुनर्ब्रुवंस्तत्र समासमिङ्गयेत् [32]स्वरित्यतोऽन्येषु च संधिमाचरेत् ।
अवग्रहस्येव हि कालधारणा परिग्रहेऽस्तीत्युपधेत्यनुस्मृता ॥१६॥
[33]अभिक्रमेतोभयतोऽनुसंहितं ततोऽस्य पश्चात्पदतां प्रदर्शयेत् ।
यथापदं वान्यतरेण संदधत् त्रिषूत्तमेष्वेतदलोपसंभवात् ॥१७॥
[34]अरक्तसंध्येत्यपवाद्यते पदं पुनस्तदुक्त्वाध्यवसाय पूर्ववत् ।
[35]तथा यदृच्छोपनते बहुक्रमे क्रमेत तस्यैकपदानि निःसृजन् ॥१८॥३॥

[३६]नकारलोपोष्मरभावमानयेदपेतराणां प्रकृतिं परिग्रहे ।
[३७]नर्ति [३८]प्लुतोपाचरिते च [३९]यत्र च प्रगृह्यमेकीभवति स्वरोदयम् ॥१९॥

[४०]प्रवादिनो दूणाशदूळ्यदूळभान् [४१]परेष्वघोषेषु च रेफमूष्मणः ।
[४२]महाप्रदेशं स्वधितीव चानयेन् [४३]नुदेचच शौद्धाक्षरसंख्यमागमम् ॥२०॥

[४४]अभिक्रमे पूर्वविधानमाचरेत् पुनर्ब्रुवंस्तूत्तरकारितं क्रमे ।
विकारमन्यद्वदतोऽनुसंहितं तदाचरेदन्तगताद्ययोस्तु न ॥२१॥

[४५]सकृद्यथासंहितमेषु वाचरेत् पुनर्विवक्षन्पदमप्यसंदधत् ।
परिग्रहे संधिषु कारणान्वयाद[४६]विक्रमं द्व्यूष्मसु चोष्मसंधिषु ॥२२॥

[४७]समानकालावसमानकारणावनन्तरौ वा यदि संनिगच्छतः ।
पदस्य दोषावथ हेत्वसंग्रहे नियुक्तमार्ष्यन्यतरेण लुप्यते ॥२३॥

[४८]मकारलोपे विकृतस्वरोपधे तृतीयभावे प्रथमस्य च ध्रुवम् ।
[४९]विपर्ययो वेतरथाभ्युपेयुषा[५०]मथोभयेषामनुनासिकोदये ॥२४॥

[५१]अथो नतेनोपहितेऽनुनासिके [५२]तथाक्षरस्य क्रम एकपातिनः ।
[५३]न चात्र पूर्वः स्वरितेन संहितां लभेत तस्मिन्नियतस्वरोदये ॥२५॥४॥

[५४]यदा च गच्छत्यनुदात्तमक्षरं वशं पदादेरुदयस्य तेन च ।
[५५]उदात्तपूर्वं नियतस्वरोदये परो विलोपोऽनियतो यदावरः ॥२६॥

[५६]स्वरैकदेश स्वरितस्य चोत्तरं यदा निहन्यादनिमित्तमक्षरम् ।
[५७]उदात्तपूर्वोऽप्यनुदात्तसंगमो यदा स्वरी द्वौ लभतेऽपि वा बहून् ॥२७॥

[५८]यथा प्रक्लृप्ते स्वरवर्णसंहिते तयोस् तयोरक्षरवर्णयोस्तथा ।
अदर्शनेऽनार्ष्यविलोप उच्यते क्रमेष्वनार्षं ब्रुवतेऽपरे स्वरम् ॥२८॥

[५९]अदृष्टमार्ष्यां यदि दृश्यते क्रमे विलोपमेवं ब्रुवतेऽपरे तथा ।
स करणान्यार्ष्यविलोपविक्रम क्रमेण युक्तोऽपि बहूनि संदधत् ॥२९॥

[६०]पदं पदान्तश्च यदा न गच्छति स्वरावसानं स तु योऽत्र युज्यते ।
तदा न रूपं लभते निराकृतं न चेन्निराहोपनिवृत्य तत्पदम् ॥३०॥

[६१]स्थितिस्थितोपस्थितयोश्च दृश्यते पदं यथावद्व्ययवद्व्युपस्थिते ।
क्वचित्स्थितौ चैवमतोऽधि शाकलाः क्रमे स्थितोपस्थितमाचरन्त्युत ॥३१॥

[६२]क्रमेत सर्वाणि पदानि निर्ब्रुवन्निति स्मरन्त्या[६३]चरितं तु नोत्क्रमेत् ।
क्रमस्य वर्त्म स्मृतिसंभवौ ब्रुवन् समाधिमस्यान्वितराणि कीर्तयेत् ॥३२॥

[६४]यथोपदिष्टं क्रमशास्त्रमादितः पुनः पृथक्त्वैर्विविधैर्नं साधुवत् ।
[६५]इति प्र बाभ्रव्य उवाच च क्रमं क्रमप्रवक्ता प्रथमं शशंस च ॥३३॥

[६६]क्रमेण नार्थः पदसंहिताविदः पुराप्रसिद्धाश्रयपूर्वसिद्धिभिः ।
अकृत्स्नसिद्धश्च न चान्यसाधको न चोदयापायकरो न च श्रुतः ॥३४॥

[१७]असिध्यतः सिद्धिविपर्ययो यदि प्रसिध्यतोऽसिद्धिविपर्ययस्तथा ।
[१८]सहापवादेषु च सत्सु न क्रमः प्रदेशशास्त्रेषु भवत्यनर्थकः ॥३५॥
[१९]विपर्ययाच्छास्त्रसमाधिदर्शनात् पुराप्रसिद्धेरुभयोरनाश्रयात् ।
समभ्युपेयाद् बहुभिश्च साधुभिः श्रुतेश्च सन्मानकरः क्रमोऽर्थवान् ॥३६॥

[२०]ऋते न च द्वैपदसंहितास्वरौ प्रसिध्यतः पारणकर्म चोत्तमम् ।
क्रमा[२१]दतोऽप्यृग्यजुषां च बृंहणं पदैः स्वरैश्चाध्ययनं तथा त्रिभिः ॥३७॥६॥

॥इति ऋग्वेदप्रातिशाख्ये एकादशं पटलम्॥

## अथ द्वादशं पटलम्

[१]ऊष्मान्तस्थसोष्मचकारवर्गा नान्तं यान्त्यन्यत्र विसर्जनीयात् ।
[२]ऋकारल्कारौ परमर्धमूष्मणां नादिं तकारादवरे च सप्त ॥१॥
[३]नान्योन्येन मध्यमा स्पर्शवर्गाः संयुज्यन्ते [४]न लकारेण रेफः ।
[५]स्पर्शैर्वकारो न परैरनुत्तमैस् [६]तथा तेषां घोषिणः सर्वथोष्मभिः ॥२॥
[७]नान्त्यान्तस्था न प्रथमोष्मभिः परैर् [८]न रेफो रेफेण [९]न सोष्मणोष्मवान् ।
[१०]न स्पर्शरूष्मा प्रथमः परः सन् [११]नानुत्तमैः स च सोष्मा च पूर्वौ ॥३॥
[१२]नानुत्तमा घोषिणोऽघोषिभिः सह स्पर्शौ स्पर्शा [१३]नोत्तमा ऊष्मभिः परैः ।
[१४]लकारस्पर्शैर्न यकार उत्तरै[१५]रूष्माणोऽन्योन्येन च [१६]नर्क् पदेष्विदम् ॥४॥१॥
[१७]नामाख्यातमुपसर्गो निपातश् चत्वार्याहुः पदजातानि शाब्दाः ।
[१८]तन्नाम येनाभिदधाति सत्त्वं [१९]तदाख्यातं येन भावं सधातु ॥५॥
[२०]प्राभ्या परा निर्दुरनु व्युपाप सं परि प्रति न्यत्यधि सूदवापि ।
उपसर्गा विंशतिरर्थवाचकाः सहेतराभ्या[२१]मितरे निपाताः ॥६॥
[२२]विंशतेरुपसर्गाणामुच्चा एकाक्षरा नव ।
[२३]आद्युदात्ता दशैतेषाम् [२४]अन्तोदात्तस्त्वभीत्ययम् ॥७॥
[२५]क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् ।
सत्त्वाभिधायकं नाम निपातः पादपूरणः ॥८॥
[२६]निपातानामर्थवशान्निपातनाद् अनर्थकानामितरे च सार्थकाः ।
नेयन्त इत्यस्ति संख्येह वाङ्मये मिताक्षरे चाप्यमिताक्षरे च ये ॥९॥२॥

॥इति ऋग्वेदप्रातिशाख्ये द्वादशं पटलम्॥
॥इति द्वितीयोऽध्यायः॥

## अथ त्रयोदशं पटलम्

[१]वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा ।
आपद्यते श्वासतां नादतां वा वक्त्रीहाया[२]मुभयं वान्तरोभौ ॥१॥
[३]ता वर्णानां प्रकृतयो भवन्ति [४]श्वासोऽघोषाणामि[५]तरेषां तु नादः ।
[६]सोष्मोष्मणां घोषिणां श्वासनादौ [७]तेषां स्थानं प्रति नादात्तदुक्तम् ॥२॥

[८]तद्विशेषः करणं [९]स्पृष्टमस्थितं [१०]दुस्पृष्टं तु प्राग्घकाराच्चतुर्णाम् ।
[११]स्वरानुस्वारोष्मणामस्पृष्टं स्थितं [१२]नैके कण्ठ्यस्य स्थितमाहुरूष्मणः ।।३।।

[१३]प्रयोक्तुरीहागुणसंनिपाते वर्णीभवन्गुणविशेषयोगात् ।
एकः श्रुतीः कर्मणाप्नोति बह्वीर् [१४]एके वर्णाञ्छाश्वतिकान्न कार्यान् ।।४।।

[१५]आहुर्घोषं घोषवतामकारमेकेऽनुस्वारमनुनासिकानाम् ।
[१६]सोष्मतां च सोष्मणामूष्मणाहुः सस्थानेन [१७]घोषिणां घोषिणैव ।।५।।१।।

[१८]अत्रोत्पन्नावपर ऊष्मघोषौ [१९]शीघ्रतरं सोष्मसु प्राणमेके ।
[२०]रक्तो वचनो मुखनासिकाभ्याम् [२१]एतद्वर्णात्मगुणशास्त्रमाहुः ।।६।।

[२२]नपुंसकं यदूष्मान्तं तस्य बह्वभिधानजः ।
अनुस्वारो दीर्घपूर्वः सिष्यन्तेषु पदेषु सः ।।७।।

[२३]सः सा सो सं पदान्तेभ्यः पूर्वोऽनाम्युपधस्तथा ।
यकारो वा वकारो वा पुरस्ताच्चेदसंधिजः ।।८।।

[२४]जिघांसन्पांसुरे मांसं पुमांसं पौंस्यमित्यपि ।
पदेष्वेवंप्रवादेषु [२५]नामकार उपोत्तमे ।।९।।

[२६]प्रश्लिष्टादभिनिहितान् [२७]मांश्चत्वेऽयांसमित्यपि ।
[२८]एतावानृक्ष्वनुस्वारो दीर्घादि[२९]तरथेतरः ।।१०।।२।।

[३०]समापाद्यान्युत्तरे पद् पकारे राघो रथो ग्ना दिवो जा ऋतश्च ।
अञ्जःपा दुःप्रेति च पूर्वपद्यावनिङ्गयन्विक्रममेषु कुर्यात् ।।११।।

[३१]समापाद्यं नाम वदन्ति षत्वं तथा णत्वं सामवशांश्च संधीन् ।
उपाचारं लक्षणतश्च सिद्धमाचार्या व्याळिशाकल्यगार्ग्याः ।।१२।।

[३२]ह्रस्वामर्धस्वरभक्त्यासमाप्तामनुस्वारस्योपधामाहुरेके ।
अनुस्वारं तावतैवाधिकं च ह्रस्वोपधं [३३]दीर्घपूर्वं तदूनम् ।।३।।

[३४]रेफोऽस्त्यृकारे च परस्य चार्धे पूर्वे ह्रसीयांस्तु न वेतरस्मात् ।
मध्ये स [३५]तस्यैव लकारभावे घातौ स्वरः कल्पयताव्लृकारः ।।१४।।३।।

[३६]अनन्तस्थ तमनुस्वारमाहुर् [३७]व्याळिर्नासिक्यमनुनासिकं वा ।
[३८]संध्यानि संध्यक्षराण्याहुरेके द्विस्थानतैतेषु तथोभयेषु ।।१५।।

[३९]संध्येष्वकारोऽर्धमिकार उत्तरं युजोरुकार इति शाकटायनः ।
[४०]मात्रासंसर्गादवरे पृथक्श्रुती [४१]ह्रस्वानुस्वारव्यतिषङ्गवत्परे ।।१६।।

[४२]त्रीणि मन्द्रं मध्यममुत्तमं च स्थानान्याहुः सप्तयमानि वाचः ।
[४३]अनन्तरश्चात्र यमोऽविशेषः [४४]सप्त स्वरा ये यमास्ते [४५]पृथग्वा ।।१७।।

[४६]तिस्रो वृत्तीरुपदिशन्ति वाचो विलम्बितां मध्यमां च द्रुतां च ।
[४७]वृत्त्यन्तरे कर्मविशेषमाहुर् [४८]मात्राविशेषः प्रतिवृत्त्युपैति ।।१८।।

[४९]अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ।
शिष्याणामुपदेशार्थे कुर्याद् वृत्तिं विलम्बिताम् ॥१९॥
[५०]चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत् ।
शिखी त्रिमात्रो विज्ञेय एष मात्रापरिग्रहः ॥२०॥४॥

॥इति ऋग्वेदप्रातिशाख्ये त्रयोदशं पटलम्॥

## अथ चतुर्दशं पटलम्

[१]समुद्दिष्टा वर्णगुणाः पुरस्तान् निर्दिष्टानां सांहितो यश्च धर्मः ।
तदायापायव्यथनानि दोषास्तान्व्याख्यास्यामोऽत्र निदर्शनाय ॥१॥
[२]निरस्तं स्थानकरणापकर्षे [३]विहारसंहारयोर्व्यासपीळने ।
[४]ओष्ठाभ्यामम्बूकृतमाह नद्धं दुष्टं [५]मुखेन सुषिरेण चूनम् ॥२॥
[६]संदष्टं तु व्रीळन आह हन्वोः [७]प्रकर्षणे तद्‍ विक्लिष्टमाहुः ।
[८]जिह्वामूलनिग्रहे ग्रस्तमेतन् [९]नासिकयोस्त्वनुषङ्गेऽनुनासिकम् ॥३॥
[१०]अयथामात्रं वचनं स्वराणां [११]संदंशो व्यासः पीळनं निरासः ।
[१२]ग्रासः कण्ठ्ययोर[१३]नुनासिकानां संदष्टता विषमरागता वा ॥४॥
[१४]सान्तस्थानामादिलोपान्तलोपाव् [१५]अदेशे वा वचनं व्यञ्जनस्य ।
[१६]अन्योन्येन व्यञ्जनानां विरागो [१७]लेशेन वा वचनं पीळनं वा ॥५॥१॥
[१८]घोषवतामनुनादः पुरस्तादादिस्थानां क्रियते धारणं वा ।
[१९]सोष्मोष्मणामनुनादोऽप्यनादो [२०]लोमश्यं च क्ष्वेलनमूष्मणां तु ॥६॥
[२१]वर्गेषु जिह्वाप्रथनं चतुर्षु [२२]ग्रासो मुख्ये [२३]प्रतिहारश्चतुर्थे ।
[२४]सरेफयोर्मध्यमयोर्निरासो [२५]विक्लेश स्थाने सकले चतुर्थे ॥७॥
[२६]अतिस्पर्शो बर्बरता च रेफे [२७]जिह्वान्ताभ्यां च वचनं लकारे ।
[२८]श्वासोऽघोषनिभता वा हकारे [२९]निरासोऽन्येषूष्मसु पीळनं वा ॥८॥
[३०]स्वरात्परं पूर्वसस्थानमाहुर् दीर्घान्निरस्तं तु विसर्जनीयम् ।
[३१]कण्ठ्याद्यथा रेफवतस्तथाहू [३२]रक्तात्तु नासिक्यमपीतरस्मात् ॥९॥
[३३]संयोगादेरूष्मणः पूर्वमाहुर् विसर्जनीयमधिकं स्वरोपधात् ।
[३४]परं यमं रक्तपरादघोषाद् [३५]ऊष्माणं वा घोषिणस्तत्प्रयत्नम् ॥१०॥२॥
[३६]शुनश्शेपो निष्षपी शास्सि निष्षाळविक्रमा ब्रह्म विष्णुः स्म पृश्निः ।
[३७]स्पर्शोष्मसंघीन्स्पर्शरेफमध्यानभिप्रायांश्च परिपादयन्ति ॥११॥
[३८]स्वरौ कुर्वन्त्योष्ठ्यनिभौ सरेफौ तिस्रो मातॄस्त्रीन्पितॄन्यन् नृभिर्नॄन् ।
[३९]दन्त्यान् सकारोपनिभानघोषान् रथ्यः पृथ्वी पृथिवी त्वा पृथीति ॥१२॥
[४०]ऊष्मान्तस्थाप्रत्ययं रेफपूर्वं ह्रस्वं लुम्पन्त्याहुरथाप्यसन्तम् ।
पुरुषन्ति पुरुवारार्यमाष्ट्र्यां हरियोजनाय हरियूपीयायाम् ॥१३॥

[४१]ऐयेरित्यैकारमकारमाहुर् वैयश्वेति क्रमयन्तो यकारम् ।
[४२]तदेवान्येषु विपरीतमाहुस् ते रय्या वय्यं च हृदय्ययेति च ॥१४॥

[४३]अकारस्य स्थान ऐकारमाहुर् लुम्पन्ति च सयमीकारमुत्तरम् ।
बह्वक्षरं द्व्यक्षरतां नयन्ति यथोनयीर्घ्वनयीत्कोशयीरिति ॥१५॥३॥

[४४]तदेव चान्यत्र विपर्ययेण कार्यं ऐत्वे सयमीकारमाहुः ।
धातोर्बिभेतेर्जयतेर्नियश्चाभैष्म चाजैष्म नैष्टेति चैषु ॥१६॥

[४५]इकारस्य स्थान ऋकारमाहुर् लृकारं वा चन्द्रनिर्णिक्सुशिल्पे ।
[४६]अनन्तरे तद्विपरीतमाहुस् तालव्ये शृङ्गे बिभयाद्विचृत्ताः ॥१७॥

[४७]तालुस्थानो व्यञ्जनादुत्तरश्चेदयकारस्तत्र यकारमाहुः ।
शुनःशेपः शास्सि ववर्जुषीणामत्के विरप्शीति निदर्शनानि ॥१८॥

[४८]लुम्पन्ति वा सन्तमेवं व्यकारं ज्यैष्ठचाय सम्वारन्नापृच्छयमृम्वा ।
[४९]व्यस्यन्त्यन्तमहतोऽव्यायतं तं दीर्घायुः सूर्यो रुशदीर्त ऊर्जम् ॥१९॥

[५०]लुम्पन्त्यन्तस्थां क्रमयन्ति वैतां स्वरात्सस्थानादवरां परां वा ।
स्वस्तयऽधायि भुवनेयमूव [५१]रक्तं ह्रस्वं द्राघयन्त्युग्रं ओकः ॥२०॥४॥

[५२]हकारसोष्मोपहिताद्यकाराद् वकाराद्वा सर्वसोष्मोष्मपूर्वात् ।
तत्सस्थानं पूर्वमूष्माणमाहुस् तुच्छ्यान्दध्या आपृच्छ्यमृम्वा ह्वयेऽह्वः ॥२१॥

[५३]पकारवर्गोपहिताच्च रक्तादत्यं यमं तृप्णुताप्नानमौम्नात् ।
[५४]अनुस्वारमुपधां वान्यवर्णां स्वरोपधात्सोष्मयमोदयश्चेत् ॥२२॥

तङ्ष्नंन्त्यङ्ग्मो जङ्ष्नत ईङ्खयन्तीः सञ्ज्ञातरूपोऽथ सञ्ज्ञानमिन्द्रः ।
[५५]सान्तस्थादौ धारयन्तः परक्रमं शर्मन्स्यामास्मिन्सु जनाञ्छ्रुधीयतः ॥२३॥

[५६]रक्ते रागः समवाये स्वराणां न नूनं नृम्णं नृमणा नृभिर्नॄन् ।
[५७]रक्तात्तु सोष्मा क्रियते हकारो दध्यङ्ह देवान्ह्वते महान्हि ॥२४॥

[५८]संयोगानां स्वरभक्त्या व्यवायो विक्रमणं क्रमणं वायथोक्तम् ।
विपर्ययो वा व्यततिल्विलेऽज्मन् द्रप्सोऽजुषन्साञ्जयोऽष्ट्रांप्रनेष्ट्रात् ॥२५॥५॥

[५९]विवृत्तिषु प्रत्ययादेरदर्शनं यथा या ऐच्छश्च य औशिजश्च ।
[६०]इउसंधौ संध्यवचनं च कासुचित् स इदस्ता कस्त उषो यथैते ॥२६॥

[६१]समानवर्णासु विपर्ययो वा यथा ह्यूती इन्द्र क आसतश्च ।
[६२]अभिव्यादानं च विवृत्तिपूर्वे कण्ठ्ये ता आपोऽवसा एति दीर्घे ॥२७॥

[६३]न दोषाणां स्वरसंयोगजानामन्तो गम्यः संख्ययाथेतरेषाम् ।
[६४]शक्यस्तु शास्त्रादधि साधु धर्मो युक्तेन कृत्स्नः प्रतिपत्तुमस्मात् ॥२८॥

[६५]अकारस्य करणावस्थयान्यान् स्वरान्ब्रूया[६६]त्तद्धि संपन्नमाहुः ।
[६७]परानकारोदयवद्विवक्षेत् सर्वत्र वर्णानिति संपदेषा ॥२९॥

[१८]शास्त्रापवादात् प्रतिपत्तिभेदात् निन्दन्त्यकृत्स्नेति च वर्णशिक्षाम् ।
[१९]सैतेन शास्त्रेण विशिष्यतेऽन्यैः कृत्स्नं च वेदाङ्गमनिन्द्यमार्षम् ॥३०॥६॥

॥इति ऋग्वेदप्रातिशाख्ये चतुर्दशं पटलम् ॥

## अथ पञ्चदशं पटलम्

[१]पारायणं वर्तयेद् ब्रह्मचारी गुरुः शिष्येभ्यस्तदनुव्रतेभ्यः ।
अध्यासीनो दिशमेकां प्रशस्तां प्राचीमुदीचीमपराजितां वा ॥१॥

[२]एकः श्रोता दक्षिणतो निषीदेद् द्वौ वा [३]भूयांसस्तु यथावकाशम् ।
[४]तेऽधीहि भो३इत्यभिचोदयन्ति गुरुं शिष्या उपसंगृह्य सर्वे ॥२॥

[५]स ओ३मिति प्रस्वरति त्रिमात्रः प्रस्वार स्थाने स भवत्युदात्तः ।
चतुर्मात्रो वार्षपूर्वानुदात्तः षण्मात्रो वा भवति द्विःस्वरः सन् ॥३॥

[६]अध्येतुरध्यापयितुश्च नित्यं स्वर्गद्वारं ब्रह्म वरिष्ठमेतत् ।
